आर.एन.आई. सं.58951/94

ISSN 0975 - 0061

# आरण्यकम्

अर्धवार्षिकी सन्दर्भिता संस्कृतशोधपत्रिका

(Bi-annual Refereed Sanskrit Research Journal)

विश्वविद्यालयानुदानायोगस्य( UGC )यत्सूच्याम्( Carelist )अन्तर्भुक्ता

संस्कृतप्रसारपरिषद्

आरा (विहार:)

द्वात्रिंशं वर्षम्-द्वितीयोऽङ्क:

सितम्बर 2024

# ‘आरण्यक’स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत ‘आरण्यकम्’ इतीयं षाण्मासिकी शोधपत्रिका (UGC Carelisted) संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः) मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कम् द्विशतं (200) रूप्यकाणि। एकस्याङ्कस्य शुल्कम् एकशतं (100) रूप्यकाणि।
4. आजीवनं ग्राहकताशुल्कं द्विसहस्रं (2000) रूप्यकाणि।
5. शुल्कप्रेषणस्योपायाः-

   **(i) NEFT Banking**

   Bank - Indian Bank, Ara (Bihar)
   IFSC - IDIB000A047
   Name - Sanskrit Prasara Parishad
   Acc. No. - 552203784
   शुल्कं संप्रेष्य तस्य सन्देशसूचना (Message) अत्र देया-
   डॉ. नीलमणि पाठकः, दूरभाषः 8102327064
   Email-**nilmanipathak19@gmail.com**

   **(ii) बैंक ड्राफ्ट ‘संस्कृतप्रसारपरिषद्’** इति नाम्ना आरा (बिहार) नगरे व्यवहरणीयम्।
   **ड्राफ्ट प्रेषणस्थलम् -** डॉ. नीलमणि पाठकः, गणपति ज्वेलर्स के पीछे, महावीर स्थान, मौलाबाग, आरा (विहार)-802301
6. आरण्यकस्य बेबसाईट-**www.aranyakam.in**
7. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते।
8. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
9. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनान्ते रचयितुः स्वनाम पदनिर्देशश्च देवनागरीलिप्याम्, ई-मेल संकेतः, पत्रसङ्केतः, दूरभाषसंख्या च रोमनलिप्याम् उल्लिखिताः स्युः।
10. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
11. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
12. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
13. शोधलेखप्रेषणम् ‘आरण्यक’सम्बद्धा सर्वविधा जिज्ञासा च।
    **प्रो. गोपबन्धु मिश्रः, संस्कृतविभागः, काशीहिन्दूविश्वविद्यालयः, वाराणसी (उ.प्र.)-221005 इति सङ्केतेन** (चल.) 9450870788 विधेया।
    Email-**gopabandhuh@gmail.com**
14. शोधलेखसम्प्रेषणं तत्सम्बद्धपत्रव्यवहारश्च
    Email-**aranyakam94@gmail.com** इति सङ्केतेनापि कर्तुं शक्यते।

# आरण्यकम्

संस्कृतप्रसारपरिषदः अर्धवार्षिकी सन्दर्भिता संस्कृतशोधपत्रिका

विश्वविद्यालयानुदानायोगस्य ( UGC ) यत्नसूच्याम् ( Carelist ) अन्तर्भुक्ता

वर्षाङ्कौ - द्वात्रिंशं वर्षम् - द्वितीयोऽङ्कः

**चैत्रः, वि.सं.२०८१**

**सितम्बर २०२४**

**प्रतिवर्ष प्रकाशनकालः**
**चैत्रः, आश्विनः-विक्रमाब्दः**
**मार्च, सितम्बर**

*प्रत्यङ्कम् - 100 रूप्यकाणि*

*वार्षिकं शुल्कं 200 रूप्यकाणि*

*'आरण्यकम्' इदं केन्द्रीयसंस्कृतविश्वविद्यालयः, नई दिल्ली इत्यनेन प्रदत्तेन आर्थिकानुदानेन प्रकाश्यते।*

**परामर्शदात्री समितिः**

डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. राय अश्विनी कुमारः, बोधगया

संस्थापकः
**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

सम्पादकः
**प्रो.गोपबन्धु मिश्रः**
वरिष्ठ आचार्यः, संस्कृतविभागः
काशीहिन्दूविश्वविद्यालयः, वाराणसी
पूर्वकुलपतिः
श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम् (गुजरात)
gopabandhuh@gmail.com

सह-सम्पादकौ
**डॉ. सञ्जय कुमार चौबे**
sanjaychaubey.lbs@gmail.com
**डॉ. सुनीलकुमार प्रधानः**
sunilkumarp435@gmail.com

प्रकाशिका
**संस्कृतप्रसारपरिषद्**
रामेश्वरलीलासदनम्
महावीरस्थानम्
मौलाबाग, आरा (विहारः) 802301

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, दी महावीर प्रेस, बी.20.44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।

**प्रो. गोपबन्धु मिश्रः**
सम्पादकः

# सम्पादकीयम्

भगवान् विष्णुः वैकुण्ठम् अधिवसति। विगता कुण्ठा यस्मात् तद् विकुण्ठम्, विकुण्ठस्य भावो वैकुण्ठम्। अर्थात् यत्र कुण्ठा न भवति तत्र वसति परमेश्वरः। कुण्ठा कुत्र कथं वोत्पद्यते इति चेत् श्रीभगवता गीतायां यदुक्तम् –

**इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।**
**तयोर्न वशमागच्छेत् तौ ह्यस्य परिपन्थिनौ॥** (गीता ३.३४)

तद् विवरणं पश्यामश्चेत् संसारे इन्द्रियार्थविषये इन्द्रियाणां रागश्च द्वेषश्चेति द्वावेव भावौ समुपपद्येते इति कथनात् तावेव अखिलां सहजां सरलां प्रवृत्तिं कुण्ठितां कुरुत इति भावयितुं शक्यते। चक्षुरादीनां पञ्चानां ज्ञानेन्द्रियाणां, वाक्पाण्यादीनां पञ्चानां कर्मेन्द्रियाणां किं च अन्तरिन्द्रियस्य मनसः तत्तद्विषयेण सह सन्निकर्षेण रागो द्वेषो वा उपजायते। उभावपि रागद्वेषौ अयं निजः स च परः इत्यादीन् कुण्ठितान् भावान् जनयतः। सामान्यतः सर्वोऽपि जनः एतयोः रागद्वेषयोः वशीभूतः कुण्ठितं सङ्कुचितं सङ्कीर्णं वा आत्मभावं पोषयति। अतः मानवजीवनेन यादृशं व्यापकं सर्वहितकरं सर्वसमावेशि कल्याणं साधयितुं वैकुण्ठवासिना परमेश्वरेण मानवाय क्षमता प्रदत्ता शक्तिः कौशलं च प्रदत्तमस्ति, तत् सर्वम् अधिकांशतः अनुपयोगि एव तिष्ठति। कदाचित् विपरीतभावनया दैवसम्पदा सम्पन्नः भवितुं योग्योऽपि मानवः दम्भदर्पाभिमानाहङ्काराद्यासुरसम्पदाऽभिषिक्तः सन् आत्मनः नाशं किं च अपरेषाम् अहितमेव साधयति। अत एव श्रीभगवानाह– '**तयोर्न वशमागच्छेत्**' इति। अर्थात् इन्द्रियार्थेषु इन्द्रियाणाम् एष रागः द्वेषो वा सहजतया उत्पद्यते एव, किन्तु मानवः रागद्वेषयोः अन्यतरस्य वशीभूतो न भवेत्। अत्रेदमप्यवधेयं यत् इन्द्रियार्थेषु यथा द्वेषः कुण्ठाजनको भवति, तथैव रागोऽपि कुण्ठावाहकः एव। अतः सामान्यप्रवृत्त्या द्वेषाद् दूरे स्थातुं प्रयासरतेन मानवेन रागादपि दूरे एव स्थातव्यमिति भावः। अर्थात् ,मानवजीवनस्य यात्रा रागद्वेषजन्यसहजसुलभकुण्ठातः वैराग्याभ्याससाध्यपरमेश्वरावास्यवैकुण्ठं प्रति भवेदिति विमर्ष्टुं शक्यते। सा च यात्रा आदौ अन्तःकरणशुद्धिसाध्या अन्तरङ्गा किं च तदनु तत्समकालं वा सर्वत्र समदर्शनतत्परा वैकुण्ठवृत्तिः ''**यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति**'' (गीता ६.२) इति दृष्टिसम्पन्ना बहिरङ्गरूपा भवितुमर्हति। एषा स्थितिरेषा यात्रा वा कष्टसाध्या समयसापेक्षा सत्यपि असाध्या नेति बहुभिः महापुरुषैः स्वस्वजीवने तादृशीमात्मीयस्थितिमुपस्थापयन्तः समुपस्थापितवन्तश्चेति बहुशः प्रमाणं विद्यत एव। प्रत्येकमन्तः सच्चिदानन्दरूपं

यत् तत्त्वं विराजते तदेव अखण्डं सत्यं ज्ञानमनन्तं परं ब्रह्मेति हेतोः सर्वथा सर्वस्मिन्नपि तादृशशुद्धचैतन्यस्वरूपस्य वैकुण्ठवासिनः परमेश्वरस्य स्वरूपं प्रतिभासमानं भवितुम् अर्हत्येव। यस्य हृदि एतत् स्वरूपं प्रतिभासते तस्य स्थितिं काञ्चिदेवंभूता भवति यत् तत्र तस्य सकला अपि समारम्भाः कामेन सङ्कल्पेन च हीनाः सञ्जायन्ते, तद्यथा श्रीभगवानाह–

**यस्य सर्वे समारभ्याः कामसंकल्पवर्जिताः।**
**ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः॥** (गीता ४.१९)

तथा च आत्मस्थज्ञानाग्निना सः दग्धसकलकर्मा भवतीत्यतः 'पण्डित' पदवाच्यो भवति। अत्र तत्त्वज्ञानम् अग्निरूपं किं च कामसङ्कल्पसहितं सर्वविधं कर्म तेन तत्त्वज्ञान-रूपिणाऽग्निना यस्य दग्धं भवति स एव पण्डितः, तस्यैव पाण्डित्यं बुधैरवगम्यते परिगण्यते चेति भावोऽत्रोदीरितोऽस्ति। एतदनुसारं ग्रन्थलेखनवाचनव्याख्यानादिभिः लौकिकदृष्ट्या साध्यमानस्य पाण्डित्यस्यापेक्षया अन्ततो रागद्वेषान्यतरयुक्तकामसङ्कल्पसहितस्य कर्मणो येन नाशनं भवति तादृशं समबुद्धिसहिततत्त्वज्ञानविदग्धपाण्डित्यमेव वरमित्यतः तत्पाण्डित्यार्जनायैव पूर्णं जन्म जन्मान्तरं च समर्पणीयमिति भावो जन्यते। तदनुरूपं श्रीभगवानेतदप्याह –

**बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते।**
**वासुदेवः सर्वमिति स महात्मा सुदुर्लभः॥** (गीता ७.१९)

विविधैः शास्त्रैः तद्गतनानातत्त्वजिज्ञासया च उपर्युक्तं पाण्डित्यमुररीकर्तुं यतमानैः नानासांस्थानिककार्यकुशलतायां निपुणैः प्राध्यापकैः शोधच्छात्रैः **आरण्यकस्या**स्य कलेवरं सुतरां समृद्धं विद्यते। मध्ये यथावसरं अष्टाध्याय्याः प्रसिद्धायां 'काशिका'ख्यायां वृत्तौ नैकेषां शब्दानां यत् पारिभाषिकं स्वरूपमुक्तम् अस्ति तद् व्याख्यां विना सन्दर्भसहितं तथैव 'किञ्चित् पारिभाषिकम्' इति शीर्षकेण प्रदत्तमस्ति।

शोधपत्रिकायाः अस्याः प्रकाशनप्रसङ्गे मुद्रणव्ययस्य वृद्धौ जातायामपि बहुकालतः प्रत्यङ्कं ५० रूप्यकाणि किं च वार्षिकम् (अङ्कद्वयस्य कृते) १०० रूप्यकाणीति शुल्कं निश्चितमासीत्। किन्तु मुद्रणमूल्यवृद्धिकारणेन तदिदानीं क्रमशः प्रत्यङ्कं १०० रूप्यकाणि, वार्षिकम् अङ्कद्वयस्य कृते २०० रूप्यकाणि देयशुल्करूपेण वृद्धिं गच्छतीति एतद्विषयं सर्वेऽपि सहृदयाः समानुभूत्या विवेचयिष्यन्तीति निवेद्यन्ते।

**आरण्यक**मिदं सर्वेषां विदुषां शास्त्रतत्त्वानुसन्धित्सूनां ज्ञानपिपासां शमयितुं यथाशक्ति प्रवर्ततामिति सर्वेषां शुभाशयान् काङ्क्षमाणो विरमति–

गोपबन्धु मिश्र
सम्पादकः
आरण्यकस्य

# सूचीपत्रम्


| | विषयः | लेखकः | पृष्ठम् |
|---|---|---|---|
| 1. | **संस्कृतसाहित्ये शब्दालङ्काराणां पौर्वापर्यमीमांसा** | डॉ. कामेश्वर शुक्लः<br>आचार्यः, संस्कृतविभागः<br>गुवाहाटी विश्वविद्यालयः,<br>गुवाहाटी | 1-10 |
| 2. | **हेलाराजटीकायां धात्वर्थविश्लेषणम्** | डॉ. विकास शर्मा<br>सहायकाचार्यः<br>संस्कृतपालिप्राकृतप्राच्यभाषाविभागः,<br>इलाहाबाद विश्वविद्यालयः, प्रयागराजः | 11-17 |
| 3. | **किञ्चित् पारिभाषिकम्** | | 18 |
| 4. | **'मर्त्यप्रवासः'-क्षणविध्वंसिजीवन-दर्शनम्** | डॉ. शैलेश कुमार मिश्रः<br>असिस्टेंट प्रोफेसर, राजकीय-<br>संस्कृतमहाविद्यालयः, राँची | 19-24 |
| 5. | **अभिलेखसाहित्ये कविः वत्सभट्टिः** | डॉ. सुस्मिता गोस्वामी<br>सहायकाचार्या, संस्कृतविभागः<br>लेडि ब्रेबोर्न महाविद्यालयः, कलकाता | 25-37 |
| 6. | **किञ्चित् पारिभाषिकम्** | | 38 |
| 7. | **सन्निपातलक्षणपरिभाषायां सन्निपातस्वरूपम्** | डॉ. गोपीकृष्णन् रघुः<br>सहायकाचार्यः,संस्कृतदर्शनविभागः<br>रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-<br>संस्थानम्, बेलुडमठः, हौरा, पश्चिमबङ्गः | 39-44 |
| 8. | **विध्यर्थविषये गदाधरभट्टाचार्य-मतोपस्थापनम्** | डॉ. छबिलालन्यौपानेः<br>सहायक-प्राचार्यः (दर्शनम्)<br>नागार्जुन-उमेशसंस्कृतमहाविद्यालयः<br>तरौनीग्रामः, दरभङ्गाजनपदः, बिहारः | 45-54 |

| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| 9. न्यायदर्शने प्रत्यक्षप्रमाणतत्त्व-मीमांसा | डॉ. गोबिन्ददासः<br>सहायकाचार्यः, संस्कृतविभागः<br>डेबरा-थाना-शहीद-क्षुदिराम-स्मृति-महाविद्यालयः, पश्चिम मेदिनीपुर (पं.बं.) | 55-63 |
| 10. किञ्चित् पारिभाषिकम् | | 64 |
| 11. भामहोपेक्षितानां शब्दशास्त्रीय-सिद्धान्तानां समीक्षात्मकमध्ययनम् | डॉ.मृत्युञ्जय गराँइ<br>सहायकाचार्यः, संस्कृतविभागः<br>रामकृष्ण-महाविद्यालयः<br>मधुबनी, बिहारः | 65-74 |
| 12. शब्दकौस्तुभ-उद्द्योतदिशा कारकलक्षणविमर्शः | डॉ. लक्ष्मीकान्त मुर्मू<br>असिस्टेंट प्राफेसर, संस्कृतविभागः<br>सरकारी जनरल डिग्री कॉलेज,<br>रानीबन्ध, बाँकुडा (प.बं.) | 75-79 |
| 12. किञ्चित् पारिभाषिकम् | | 80 |
| 13. अनन्तदेवकृतश्रीकृष्णभक्ति-चन्द्रिकानुसारेण वैष्णवमते परमपुरुषार्थस्वरूपम् | डॉ. सनातन दासः<br>असिस्टेंट प्राफेसर, संस्कृतविभागः<br>भट्टर कालेज, दांतन,<br>पश्चिम मेदिनीपुर, पश्चिम बंगाल | 81-88 |
| 14. श्रीमद्भगवद्गीतायाः दार्शनिक-मीमांसा | डॉ. प्रीति वर्मा<br>सहायकाचार्या, संस्कृतविभागः<br>कलासङ्कायः, का.हि.वि.वि., वाराणसी | 89-94 |
| 15. पुरुषोत्तमदेवविरचितायाः भाषावृत्तेः टीकासम्पदः | शङ्खशुभ्र-गच्छितः<br>शोधच्छात्रः, संस्कृतदर्शनविभागः<br>रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोध-संस्थानम्, बेलुर-मठः, हावड़ा | 95-106 |


*

# संस्कृतसाहित्ये शब्दालङ्काराणां पौर्वापर्यमीमांसा

**डॉ. कामेश्वर शुक्लः**

अलङ्कारस्तावत् काव्यशास्त्राणां प्रमुखमङ्गम्। शब्दालङ्काराः अर्थालङ्काराः उभयालङ्काराश्चेति अलङ्काराणां भेदत्रयं प्रसिद्धम्। अलङ्काराणामेतस्मिन् वर्गीकरणे आलङ्कारिकाणां कीदृशी प्रवृत्तिः, को वा हेतुरिति जिज्ञासायां वक्तुं युज्यते यल्लोकाः खलु चिन्तन–मननशीलाः। एते हि वैज्ञानिकदृष्ट्या कस्यचित् वस्तुनः विषयस्य वा सूक्ष्मतरं ज्ञानमधिगन्तुं किं वा तस्य वास्तविकं रूपं विज्ञातुं यतमानास्तिष्ठन्ति। आलङ्कारिकाणामपि तदेषा अलङ्कारविषयिणी विचारविवेचनात्मिका प्रवृत्तिरेवाऽस्मिन् वर्गीकरणे हेतुरिति अस्मन्मतम्।

आचार्यः विश्वेश्वरमहाभागोऽलङ्काराणामितिहासं चतुर्धा विभक्तवानस्ति– (1) प्रारम्भिककालः (2) रचनात्मककालः (3) निर्णयात्मककालः (4) व्याख्याकालश्चेति। प्रारम्भिके काले आदिकालतः भामहपर्यन्तं, रचनात्मके काले भामहादारभ्य आनन्दवर्धनपर्यन्तं, निर्णयात्मके काले आनन्दवर्धनादारभ्याचार्यमम्मटं यावत्, व्याख्याकाले मम्मटप्रभृतिभ्य आचार्यजगन्नाथं यावत् सोऽलङ्कारशास्त्राणां विवेचनमुपस्थापितवानस्ति। ध्वनिसिद्धान्तं काव्यशास्त्रस्य मुख्यं सिद्धान्तं मत्वा कैश्चित् समालोचकैरलङ्काराणां तच्छास्त्राणाञ्चेतिहासः (1) पूर्वध्वनिकालः (2) ध्वनिकालः (3) पश्चाद्ध्वनिकाल इति त्रिधा विभक्तो वर्तते। डॉ. रुद्रदेवत्रिपाठिमहाभागेन (1) आदिकालः (2) पूर्वमध्यकालः (3) उत्तरमध्यकालः (4) आधुनिककाल इति कृत्वा कालचतुष्टये अलङ्काराणामितिहासः विभक्तोऽस्ति। डॉ. त्रिपाठिमहाभागानाम् एतत् कालविभाजनमेवोत्तमं युक्तिसङ्गतञ्च प्रतिभाति। यतोऽत्र समग्रायाः अलङ्कारशास्त्रीयपरम्परायाः विवेचनं तु भवत्येव, अर्वाचीनानामपि विपश्चितां विचाराणां ज्ञानं संजायते। अत्रास्माभिः सुप्रसिद्धानां कतिपयानामालङ्कारिकाणामलङ्कार-ग्रन्थानेवाधारीकृत्य प्रबन्धोऽयं प्रस्तुतोऽस्ति।

भरतमुनिः अलङ्ककाराणां वर्गीकरणे किमपि निश्चितं मतं नोपस्थापयति परन्तु तस्य ''शब्दाभ्यासस्तु यमकम्'' इति लक्षणेन यमकः शब्दालङ्कार एवेति धारणाऽवश्यं सञ्जायते।

आचार्यः भामहः नामतः शब्दालङ्काराणामर्थालङ्काराणाञ्च न कुत्रापि निर्देशं करोति किन्तु अनुप्रास-यमक-रूपक-दीपकोपमालङ्कारेषु प्राथम्येन शब्दालङ्कारस्य निर्देशं विधाय अलङ्काराणां वर्गीकरणस्य कञ्चित् सङ्केतमवश्यं ददाति। आचार्यः दण्डी काव्यादर्शस्य प्रथमपरिच्छेदेऽनुप्रासस्य, तृतीये परिच्छेदे यमकस्य तथा च द्वितीये परिच्छेदे उपमाद्यलङ्काराणां वर्णनं विधाय मध्यमं मार्गमेवाश्रयते। उद्भटोऽपि प्रथमे वर्गीकरणे शब्दपरकार्थपरकाणाम् अष्टानामलङ्काराणां वर्णनं करोति किन्तु सोऽपि वर्गीकरणमेतत् स्पष्टतया न कुत्रापि निर्दिशति। आचार्यः वामन एवेदम्प्रथमतया स्वस्य काव्यालङ्कारसूत्रस्य चतुर्थाधिकरणस्य प्रथमाध्यायं ''शब्दालङ्कारविचारः''अथ च द्वितीयमध्यायम् 'उपमाविचार' इत्यभिदधाति। आचार्यः रुद्रट एव ईदृगाचार्यो वर्तते योऽलङ्काराणां स्पष्टं स्वतन्त्रञ्च वर्गीकरणं प्रस्तौति। विषयेऽस्मिन् तस्येयमुक्तिरुल्लेखयोग्या -

**वक्रोक्तिरनुप्रासो यमकं श्लेषस्तथा परं चित्रम्।**
**शब्दस्यालङ्काराः श्लेषेऽर्थस्यापि सोऽन्यत्तु॥**

किन्त्विदमत्रावधानयोग्यं यदलङ्काराणां वर्गीकरणविषये सुस्पष्टं स्पष्टीकरणम् अग्निपुराण एवाधिगम्यते। तत्र न केवलं निर्देशमात्रमपि तु शब्दालङ्कारस्यार्थालङ्कारस्य शब्दार्थालङ्कारस्य च लक्षणान्यपि समुपलभ्यन्ते। तद्यथा -

**ये व्युत्पत्त्यादिना शब्दमलङ्कर्तुमिह क्षमाः।**
**शब्दालङ्कारमाहुस्तान् काव्यमीमांसका विदः॥**
**अलङ्करणमर्थानामर्थालङ्कार इष्यते।**
**तं विना शब्दसौन्दर्यमपि नास्ति मनोहरम्॥**
**शब्दार्थयोरलङ्कारौ द्वावलङ्कुरुते समम्।**
**एकत्र निहितो हारः स्तनं ग्रीवामिव स्त्रियः॥**[1]

भोजराजेन तु स्वकीये सरस्वतीकण्ठाभरणे शब्दालङ्कारार्थालङ्कारोभयालङ्कारेष्वलङ्कारान् विभज्य त एवालङ्काराः बाह्य–आभ्यन्तर–बाह्याभ्यन्तरालङ्कारनाम्नाभिहितास्सन्ति। यथोक्तं तत्र –

**शब्दार्थोभयसंज्ञाभिरलङ्कारान् कवीश्वराः।**
**बाह्यानाभ्यन्तरान् बाह्याभ्यन्तरांश्चानुशासति॥**
**ये व्युत्पत्त्यादिना शब्दमलङ्कर्तुमिह क्षमाः।**
**शब्दालङ्कारसंज्ञास्ते ज्ञेया जात्यादयो बुधैः॥**

**अलमर्थमलङ्कर्तुं यद्व्युत्पत्त्यादिवर्त्मना।**
**ज्ञेया जात्यादयः प्राज्ञैस्तेऽर्थालङ्कारसंज्ञया।।**
**शब्देभ्यो यः पदार्थेभ्य उपमादिः प्रतीयते।**
**विशिष्टोऽर्थः कवीनां ता उभयालङ्क्रिया मताः।।**[2]

काव्यप्रकाशकारः मम्मटाचार्यस्त्वन्वयव्यतिरेकस्य सिद्धान्त एवात्र नियामकत्वेन स्वीकरोति।[3] तथा चोत्तरवर्तिभिः आलङ्कारिकैः पूर्वोक्तं वर्गीकरणमेव स्वीकृतं बहुधा विवेचितञ्चास्ति। किन्त्वितः परमुक्तेषु विभागेषु कस्यालङ्कारस्य कस्मिन् विभागेऽन्तर्भुक्तिर्भवेदित्यस्मिन् विषयेऽवश्यं विसंवादः परिलक्ष्यते। अत्र नायमस्माकमालोच्यविषयः। अतः प्रकृतमेवानुसरामः।

यद्यपि वैदिकवाङ्मय एव अर्थालङ्काराणामिव शब्दालङ्काराणामपि बीजमुपलभ्यते किन्तु तस्याङ्कुरितं रूपं भरतमुनेः नाट्यशास्त्रे एव दृग्गोचरतामायाति। नाटकमुद्दिश्यानेन प्रणीतस्य नाट्यशास्त्रस्य अलङ्कारलक्षणाख्ये षोडशेऽध्याये काव्यशास्त्रीयसिद्धान्ताः विवेचिताः वर्तन्ते। तत्र निर्दिष्टेषु चतुर्ष्वलङ्कारेषु यमकाख्यश्चतुर्थोऽलङ्कारः पादान्त-काञ्ची–समुद्ग–विक्रान्त–चक्रवाल–सन्दष्ट–पादादि–पादान्ताम्रेडित–मालाः चेति दशभिर्भेदैः सह वर्णितोऽस्ति। अतः भरतमुनिना निर्दिष्टः यमकालङ्कार एव शब्दालङ्काराणां मूलमिति वक्तुं शक्यते।

भामहपूर्ववर्तिनामालङ्कारिकाणां कश्चन ग्रन्थः साम्प्रतं नोपलभ्यते किन्तु भामहेन स्वकीये काव्यालङ्कारे प्रयुक्तानाम् '**अन्यः कश्चित्, अपरे, केचिदिति**' पदानां प्रयोगेणानुमीयते यत् ततः प्रागेवालङ्काराणां तेषां सम्प्रदायानाञ्च विवेचनं प्रारब्धमासीत्। किन्तु शब्दालङ्काराणां क्षेत्रे अनुप्रासस्योद्भवः, प्रहेलिकायमकयोर्भेदानां विकासः, क्रमगत–भावेनार्थालङ्काराणां पूर्वं शब्दालङ्काराणां विवेचनं पूर्वमध्यकाले (भामहप्रभृतिभ्यः आनन्दवर्धनं यावत्) एव संजातमासीदिति स्वीकार्यमस्ति।

भामहेन काव्यालङ्कारस्य द्वितीयपरिच्छेदे गुणानां संक्षिप्तं वर्णनं विधाय अलङ्काराः विवेचितास्सन्ति। वक्रोक्तिमूलका एव समस्तालङ्कारा[4] इति कथयता तेन पञ्च अलङ्काराः वर्णिताः सन्ति, येषु प्रथमतया निर्दिष्टौ यमकानुप्रासौ शब्दालङ्कारौ स्तः। अनुप्रासस्य ग्राम्यलाटाख्यौ द्वौ भेदौ अथ च यमकस्य आदि–मध्यान्त–पादाभ्यास–आवलीसमस्त–पादाख्याः पञ्च भेदास्तेनं विवेचिताः वर्तन्ते। तदेवं भामहेनानुप्रासस्य तस्य भेदद्वयस्य च नवीनतयोद्भावनं कृतमस्ति। भरतमुनिप्रोक्तान् यमकालङ्कारस्य दश भेदानस्वीकृत्य केवलान्

पञ्च भेदानेव प्रदर्श्यानेनात्मनिर्णयः प्रकाशितो विद्यते। भरतमुनेः क्रमविन्यासमस्वीकृत्य शब्दालङ्काराणां प्राथम्येनोल्लेखस्तथा च यमकालङ्कारस्य पूर्वमनुप्रासस्य निर्देशोऽपीदम्प्रथमतया तेनैव विहितोऽस्ति।

आचार्यः दण्डी काव्यादर्शस्य प्रथमे परिच्छेदे मार्गविभाग एव यमकानुप्रासयोश्चर्चां करोति तथा च '**पश्चाद्विधास्यते**' इत्युक्त्वा विषयस्यास्य अग्रिमविवेचनाय संकेतं ददाति। द्वितीये परिच्छेदे अलङ्कारस्य परिभाषया सार्धं पञ्चत्रिंशतोऽर्थालङ्काराणां वर्णनं विधाय तृतीये परिच्छेदे पूर्वप्रदत्तसंकेतं परिपालयन् क्रमशः यमक–चित्र–प्रहेलिकानां सविस्तरं वर्णनं विदधाति। तदेवमसौ भामहप्रोक्ताभ्यां यमकानुप्रासाभ्यां सह चित्रप्रहेलिकयोः द्वयोर्नवीनभेदयोः सृष्टिं करोति। भामहोक्तप्रभेदेष्वपि नवीनत्वमत्र संलक्ष्यते। यतोऽसौ अनुप्रासस्य श्रुत्यनुप्रासः वृत्त्यनुप्रासश्चेति भेदद्वयं वृत्त्यनुप्रासस्यापि पुनः पादगतान् पदगतांश्च प्रभेदान् प्रदर्शयति। अथ च यमकालङ्कारस्य पञ्चदशाधिकत्रिशतं भेदान् वर्णयित्वा शब्दालङ्कारं प्रति स्वीयां विशेषाभिरुचिं प्रकाशयति। अनेनाचार्येण चित्रकाव्यं दुष्करचित्रमिति कथयता तस्य (चित्रकाव्यस्य) आकृतिमूलकं गोमूत्रकाऽर्धभ्रम–सर्वतोभद्रनामकं भेदत्रयमुपस्थापितमस्ति। प्रहेलिकाऽलङ्कारस्यापि षोडश भेदान् प्रदर्श्य दण्डिना शब्दालङ्कारस्य विकासपरिधिः विस्तारितोऽस्ति। यत्र भामहः वक्रोक्तेः महत्त्वं प्रतिष्ठापयति तत्रैव दण्डी अतिशयोक्तेः श्लेषस्य च दृढतया समर्थनं करोति।[5] स्थानदेशानुसारमलङ्कारं प्रति जनानुरागस्य विमर्शोऽपि दण्डिनैव विहितोऽस्ति।[6] '**इतीदं नादृतं गौडैरनुप्रासस्तु तत्प्रियः**', '**अतो नैवमनुप्रासं दाक्षिणात्याः प्रयुञ्जते**'[7] इत्युक्तयः दण्डिनः पूर्वोक्तां धारणामेव प्रकटयन्ति। यमक–प्रहेलिका–चित्रालङ्काराणां यद् वैविध्यं तद्वैविध्यप्रदर्शनाद्धेतोरसौ शब्दालङ्कारस्य पोषकत्वेन[8] समादृतो वर्तते। परवर्तिनः आचार्यस्य मम्मटस्य '**वर्णसाम्यमनुप्रासः**' इत्यनुप्रासलक्षणं दण्डिनः '**वर्णावृत्तिरनुप्रास**' इत्यनुप्रासलक्षणस्यैव परिवर्तितं रूपमस्तीति विदितमेव तत्रभवतां समेषां विपश्चिताम्।

उद्भटेन काव्यालङ्कारसारसंग्रहस्य षट्सु वर्गेष्वलकाराणां वर्णनं विधीयते। तेषु शब्दालङ्काराणां प्रथमे वर्गे विवेचितयोः पुनरुक्तवदाभासाऽनुप्रासयोर्मध्ये प्रथमः (पुनरुक्तवदाभासः) सर्वथा नवीनोऽपरश्च (अनुप्रासः) पूर्ववर्तिभ्य आचार्येभ्यः गृहीतो विद्यते। अनुप्रासस्य भेदानुपस्थापयनसौ छेकानुप्रासं प्रथमतयोद्भावयति तथा चालङ्कारमेनमनुप्रासात् पृथगुद्घोषयति। '**अनुप्रासस्त्रिधा**' इत्यभिधायानेन वृत्त्यनुप्रासस्य परुषोपनागरिका-ग्राम्यवृत्तिगताः त्रयो भेदाः वर्णिताः सन्ति तथा चान्ते लाटानुप्रासोऽपि पृथक्तया प्रतिपादितोऽस्ति।[9] तदित्थमनेन गौणभेदैः सार्धं षट्संख्यकाः शब्दालङ्काराः

उपस्थापिताः सन्ति। छेकानुप्रासस्य वृत्त्यनुप्रासस्योक्तानां भेदानाञ्चोपस्थापनस्य यच्छ्रेयः तदस्मै एव प्रदीयते। पुनरुक्तवदाभासस्योद्भावनमपि शब्दालङ्कारक्षेत्रे आचार्यस्यास्य महत्त्वपूर्णमवदानं मन्यते। यमकालङ्कारं प्रति उद्भटस्यौदासीन्यमवश्यमेवालोच्य-सरणिमधिरोहति। किन्तु यमकाद्विनिःसृतस्य नवीनालङ्कारस्य पुनरुक्तवदाभासस्योद्भावनेन यमकं प्रति अस्यौदास्यं स्वाभाविकमित्यनुमातुं शक्यते। अत्रेदं प्रणिधानयोग्यमेतद् यदनेनोद्भावितः छेकानुप्रासः परवर्तिकाले स्वीकृतः सन्नपि निजं स्वतन्त्रमस्तित्वं न संस्थाप्याऽनुप्रासस्य भेदेनैव स्वीकृतोऽभवत्।

**काव्यालङ्कारसूत्रस्य** आलङ्कारिकाधिकरणसंज्ञकस्य चतुर्थाधिकरणस्य शब्दालङ्कारविचार इत्याख्ये प्रथमेऽध्याये वामनेन यमकानुप्रासयोः द्वयोः शब्दालङ्कारयोः विवेचनं कृतमस्ति। भरतमुनिमनुसरन्नसौ यमकाय प्रथमं स्थानं प्रदाय दण्डिप्रोक्तानां यमकालङ्कारस्य चतुर्दशानां भेदानां विवेचनमुपस्थापितवानस्ति तथा च अक्षरयमक-अनेकाक्षरयमक-पदयमक-मालायमक-अद्भुतयमक–तिङन्तपदवैभिन्त्य-तिङन्तपदमिश्रण-सुबन्तविभक्तिगत-वचनगत-कारकगतानाञ्च यमकस्य नवीनभेदानां चर्चां कृतवानस्ति। यद्यप्यनेन स्वतन्त्ररूपेण शब्दालङ्काराणां वर्णनं कृतमस्ति किन्तु पूर्ववर्तिभिः आचार्यैः उद्भावितानां संगृहीतानां च पुनरुक्तवदाभासादीनाम्, अनुप्रासस्य छेकादिभेदानां, यमकस्य चान्येषां केषाञ्चिद् भेदानाञ्च परित्यागः कृतोऽस्ति। रीतिवादिनः वामनस्य सम्प्रदायविषयिणी धारणैवात्र हेतुरिति स्वीकर्तुं शक्यते।

आचार्यः रुद्रटः **काव्यालङ्कारे** द्वितीयाध्यायतः पञ्चमाध्यायपर्यन्तं शब्दालङ्कारान् विवेचयति। वक्रोक्तिमेव सर्वप्रथमं शब्दालङ्कारं मन्यमानोऽसौ वक्रोक्त्या सह अनुप्रास–यमक-श्लेष-चित्राख्यान् पञ्च भेदान् वर्णयति। वक्रोक्तेः श्लेषकाकुनामकौ द्वौ भेदौ, अनुप्रासस्य वृत्त्यनुप्रास इत्येको भेदः, तस्य (वृत्त्यनुप्रासस्य) पञ्चोपभेदाः, यमकस्यैकादश प्रमुखभेदाः पुनश्च तस्यैव (यमकस्य) सार्द्धचतुश्शतं, श्लेषस्याष्टौ, पुनश्च भाषाश्लेषस्य सप्तपञ्चाशत् अथ च चित्रालङ्कारस्यापि नैके भेदा अनेन प्रदर्शिताः सन्ति। तदित्थं शब्दालङ्कारेष्वनेन नव्यानां वक्रोक्ति-श्लेष-चित्रालङ्काराणां संसृष्टिः कृता वर्तते। दण्डिना अनुलोमप्रतिलोमयोः वर्णनं यमकालङ्कारे कृतमासीत् किन्त्वनेन एतौ अलङ्कारौ चित्रालङ्कार एव वर्णितौ स्तः। एतदतिरिक्तं पूर्ववर्तिभिः प्रायः सर्वैः आलङ्कारिकैः स्वीकृतेभ्यः अनुप्रासस्य छेकानुप्रासादिभेदेभ्योऽपि न किमपि स्थानमनेन प्रदत्तं वर्तते। अलङ्काराणां क्रमविन्यासोऽप्यस्य सर्वथा नवीन एव संदृश्यते। यतः भामहेन येयं वक्रोक्तिरभिव्यक्तेर्वैचित्र्यस्य जननीरूपेण प्रस्तुताऽऽसीत्, दण्डिना चेमां स्वभावोक्तिं विहायान्येष्वलङ्कारेष्वपयोगिनीति स्वीकृतमासीत्,

तामेव वक्रोक्तिं शब्दालङ्कारेषु सर्वप्रथमतयोल्लिख्यानेन कश्चनाभिनवो विन्यासक्रमः प्रतिष्ठापितोऽस्ति।

अग्निपुराणम् भारतीयज्ञानकोष इति विपश्चितामभिमतम्। अग्निपुराणस्य त्रिचत्वारिंशदधिकत्रिशततमेऽध्याये शब्दालङ्काराणां मुख्यतया नव भेदाः, पुनश्च चतुस्त्रिंशदुपभेदाः, अष्टात्रिंशत् गौणभेदाश्च वर्णिताः दृश्यन्ते। विष्णुधर्मोत्तरपुराणस्य तृतीयकाण्डस्य चतुर्दशेऽध्याये भेदरहितस्य अनुप्रासस्य यमकस्य च वर्णनमुपलभ्यते। अस्यैव काण्डस्य षोडशेऽध्याये पञ्चदशसु पद्येषु प्रहेलिकानां तल्लक्षणानाञ्च विवेचनमधिगम्यते। प्रहेलिकानां निर्मितिमुद्दिश्यासौ पुराणकारः स्वाभिमतं प्रकाशयन् आह –

**काव्ये येऽभिहिता दोषाः कैश्चित् तेभ्यः प्रहेलिकाः।**
**कर्तव्याश्च तथैवान्यास्तां वक्ष्यामि लक्षसांणम्॥**
**श्लोकेनैकेन वा द्वाभ्यां कर्तव्यास्तु नरोत्तम।**
**न कर्तव्याश्च ता राजन् बहुश्लोकनिबन्धनाः॥**[10]

अग्निपुराणमिवात्र श्लेषः अर्थालङ्काररूपेणैव स्वीकृतोऽस्ति। किन्त्वग्निपुराणोक्तानामन्येषां शब्दालङ्काराणामत्र सर्वथा अभाव एव संलक्ष्यते।

आनन्दवर्धनेन यद्यपि ध्वन्यालोके अलंकाराः नैव विवेचिताः, किन्त्वलङ्कारध्वनेः वर्णनेन सह अलङ्कारप्रयोगसम्बन्धिनो विचारा अवश्यं विवेचिताः सन्ति। प्रसङ्गेऽस्मिन् ध्वनिकारस्य वचनमिदमुल्लेखमर्हति –

**शृङ्गारस्याङ्गिनो यत्नादेकरूपानुबन्धवान्।**
**सर्वेष्वेव प्रभेदेषु नानुप्रासः प्रकाशकः॥**
**ध्वन्यात्मभूते शृङ्गारे यमकादि-निबन्धनम्।**
**शक्तावपि प्रमादित्वं विप्रलम्भे विशेषतः॥**[11]
**प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते।**
**काव्ये उभे ततोऽन्यद् यत्तच्चित्रमभिधीयते॥**
**रसभावादिविषये विवक्षाविरसेति च।**
**अलङ्कारनिबन्धो यः स चित्रविषयो मतः॥**[12]

लघ्वाकारेऽस्मिन् प्रबन्धे समेषामालङ्कारिकाणां तैः विवेचितानां शब्दालङ्काराणाञ्च समीक्षात्मकं विवरणं नैव दातुं शक्यते विस्तारभयात्। किन्त्वेतदुल्लेखयोग्यं यद् भरत-

प्रभृतिभ्यः वर्तमानकालं यावत् शब्दालङ्काराणां मुख्यरूपेण क्रमशः यमकानुप्रासपुनरुक्तवदाभासवक्रोक्तिश्लेषचित्राख्याः षड् भेदाः बहुभिः बहुधा चर्चिताः सन्ति। एतेषां षण्णां भेदानां प्रथमोद्भावका आचार्या अपि भिन्नाः वर्तन्ते। तद्यथा– भरतमुनिः यमकस्य, भामहः अनुप्रासश्लेषयोः, उद्भटः पुनरुक्तवदाभासस्य रुद्रटश्च वक्रोक्तिचित्रयोरुद्भावको वर्तते। किन्तु भरतमुनिमतिरिच्य न केनाप्याचार्येण शब्दालङ्काराय यमकाय प्रथमं स्थानं प्रदीयते। अलङ्कारशास्त्राणामनुशीलनेनैतत् स्पष्टं भवति यद् भामहदण्डिभ्यामनुप्रासाय, भरतवामनाभ्यां यमकाय, उद्भटरुय्यकाभ्यां पुनरुक्तवदाभासाय, रुद्रटमम्मटाभ्यां वक्रोक्तये, वाग्भट-केशवमिश्राभ्यां च चित्रालङ्काराय क्रमविन्यासे प्रथमं स्थानं प्रदत्तमस्ति। नहि कोऽपि श्लेषाय प्रथमं स्थानं ददाति। केचन तु शब्दालङ्काराणां चर्चातोऽपि विरताः दृश्यन्ते। अपरे च केचन प्रथमतयाऽर्थालङ्कारान् विविच्यान्ते शब्दालङ्कारान् विवेचयन्ति। शब्दालङ्काराणां भेदोपभेदानां संख्याविषयेऽपि नैकरूपता परिलक्ष्यते। भरतमुनिः एकस्य, भामहोद्भटवामनाः द्वयोः, राजशेखरदण्डिनौ चतुर्णां, रुद्रटः पञ्चानां, मम्मटः सप्तानां, रुय्यकः दशानां, केचन षण्णामपरे च केचन सप्तानां भेदानां विवेचनं प्रस्तुवन्ति। भोजराजस्तु स्वीये सरस्वतीकण्ठाभरणे चतुर्विंशतिं शब्दालङ्कारान् वर्णयति। अत्र भेदपदेन अस्माकं तात्पर्यं बहुचर्चितभेदानामेव वर्तते। यतः एतदतिरिक्ततया सामान्यतयाऽपि केचन भेदाः वर्णिताः विलोक्यन्ते। एतेषां भेदानामप्येकत्र क्रमिको विस्तारः संदृश्यते, अपरत्रैकस्य भेदस्यान्यत्र समावेशोऽपि संलक्ष्यते। तदत्र तेषामालङ्कारिकाणाम्, अलङ्कारग्रन्थानाम्, अलङ्कारसंख्यानाम्, अलङ्काराणाञ्च तालिका अधः उपस्थाप्यते -

| **आलङ्कारिकः** | **अलङ्कारशास्त्रम्** | **अलं.सं.** | **अलङ्काराः** |
|---|---|---|---|
| भरतमुनिः | नाट्यशास्त्रम् | 1 | यमकम् |
| भामहः | काव्यालङ्कारः | 2 | अनुप्रासः, यमकम् |
| दण्डी | काव्यादर्शः | 4 | अनुप्रासः, यमकम्, चित्रम्, प्रहेलिका |
| उद्भटः | काव्यालङ्कारसंग्रहः | 2 | पुनरुक्तवदाभासः, अनुप्रासः |
| वामनः | काव्यालङ्कारसूत्रम् | 2 | यमकम्, अनुप्रासः |
| रुद्रटः | काव्यालङ्कारः | 5 | वक्रोक्तिः, अनुप्रासः, यमकम्, श्लेषः, चित्रम् |
| अग्निपुराणकारः | अग्निपुराणम् | 9 | छाया, मुद्रा, उक्तिः, युक्तिः, गुम्फना, वाकोवाक्यम्, अनुप्रासः, चित्रम्, दुष्करम् |

| | | | |
|---|---|---|---|
| विष्णुधर्मोत्तर-पुराणकारः | विष्णुधर्मोत्तरपुराणम् | 3 | अनुप्रासः, यमकम्, प्रहेलिका |
| राजशेखरः | काव्यमीमांसा | 4 | अनुप्रासः, यमकम्, चित्रम्, श्लेषः |
| भोजराजः | सरस्वतीकण्ठा-भरणम् | 24 | जातिः, गतिः, रीतिः, वृत्तिः, छाया, मुद्रा, उक्तिः,युक्तिः, भणितिः,गुम्फना, शय्या, पठितिः, यमकम्, श्लेषः, अनुप्रासः, चित्रम्, वाकोवाक्यम्, प्रहेलिका, गूढम्, प्रश्नोत्तरम्, अध्ये-यम्, श्रव्यम्, प्रेक्ष्यम्, अभिनीतिः |
| मम्मटः | काव्यप्रकाशः | 7 | वक्रोक्तिः, अनुप्रासः, लाटानुप्रासः, यमकं, श्लेषः,चित्रम्, पुनरुक्तवदाभासः |
| रुय्यकः | साहित्यमीमांसा | 10 | अनुप्रासः, क्रमः, श्लोकः, मुद्रा, दीपकं, युक्तिः, पठितिः, गुम्फना, चित्रम्, यमकम्, |
| रुय्यकः | अलङ्कारसर्वस्वम् | 6 | पुनरुक्तवदाभासः, छेकानुप्रासः, वृत्त्यनुप्रासः, यमकम्, लाटानुप्रासः, चित्रम् |
| हेमचन्द्रः | काव्यानुशासनम् | 6 | अनुप्रासः, यमकम्, चित्रम्, श्लेषः, वक्रोक्तिः, पुनरुक्तवदाभासः |
| वाग्भटः | वाग्भटालङ्कारः | 4 | चित्रम्, वक्रोक्तिः, अनुप्रासः, यमकम् |
| जयदेवः | चन्द्रालोकः | 4 | अनुप्रासः,पुनरुक्तप्रतीकाशः, यमकम्, चित्रम् |
| विश्वनाथः | साहित्यदर्पणः | 6 | पुनरुक्तवदाभासः, यमकम्, वक्रोक्तिः, भाषासमः, श्लेषः, चित्रम् |
| केशवमिश्रः | अलङ्कारशेखरः | 8 | चित्रम्, वक्रोक्तिः, अनुप्रासः, यमकम्, प्रहेलिका, गूढम्, श्लेषः, प्रश्नोत्तरम् |

इतोप्यधिका अपि कतिपये भेदाः सम्भवन्ति। यतो हि ज्ञानं खल्वनन्तम्। अनन्ताश्च

तस्य प्रकाशनपद्धतयः। भोजराजस्य '**अत्यन्तं बहवस्तेषां भेदाः सम्भेदयोनयः**' तथा च '**नेयत्ता तस्य शक्यते**' इत्याद्युक्तय एवात्र प्रमाणम्। '**भिन्नरुचिर्हि लोकः**' इति वचनानुसारं मानवानामभिरुचिः किं वा मनोवृत्तिः नैकरूपा। तेषां विचारशक्तिः, क्रियाशक्तिः, ज्ञानशक्तिश्चापि भिन्नैव। मानवमनः यदा यदेव वाञ्छति तदा तदेव विधातुं प्रयतते। '**यथास्मै रोचते विश्वं तत्तथा परिवर्तते**' इति धिया मनसोऽभिरुचेश्च वैभिन्न्यात् साहित्यस्य निर्मितावपि भिन्नता स्वाभाविकी। '**पुंसि पुंसि विचित्रैव काऽपि काऽपि सरस्वती**' इत्याभाणकमपि एतन्मतमेव समर्थयति। इदमेव कारणं यत् सहस्र–सहस्र–वर्षेभ्यः प्राक् समुद्भाविताः समालोचिताश्च विषयाः अद्यापि किञ्चित् परिवर्तनसहकारेणाभिनवरूपेण सहृदयजनैः प्रस्तूयमानाः सन्ति। चिन्तनमननपरायणाः विपश्चितः इदानीमपि तानाधारीकृत्य नव्यं किमपि तत्त्वजातमुद्भावयन्ति उताहो उद्भावयितुं प्रयतमानाः सन्ति। लोकानां समक्षमपरिमेयस्य शब्दालङ्कारसाहित्यस्योपस्थापनं नितान्तमावश्यकम्। शब्दालङ्काराणां पूर्वोक्तेषु बहुचर्चितेषु, सामान्यचर्चितेषु, अचर्चितेषु च भेदोपभेदेषु एकैकं भेदमादाय शोधप्रबन्धानां लेखनं सम्मेलनादिषु तेषां वाचनं पत्रपत्रिकादिषु प्रकाशनञ्चास्यां दिशि उपादेयं भवितुमर्हतीति शम्।

*

## सन्दर्भाः

1. अग्निपुराणम्, अध्यायः 342, 344, 345
2. सरस्वतीकण्ठाभरणम्, 2.1–2, 3.1, 4.1
3. उच्यते इह दोषगुणालङ्काराणां शब्दार्थगतत्वेन यो विभागः सः अन्वयव्यतिरेकाभ्यामेव व्यवतिष्ठते...। काव्यप्रकाशः, पृ.451
4. वाचां वक्रार्थशब्दोक्तिरलङ्काराय कल्पते।। काव्यालङ्कारः, 5.66.
5. भिन्नं द्विधा स्वभावोक्तिर्वक्रोक्तिश्चेति वाङ्मयम्। काव्यादर्शः, 2.363.
6. तत्रैव, 1.54

7. तत्रैव, 1.60

8. इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा।
वाचमेव प्रसादेन लोकयात्रा प्रवर्तते।।
इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारन्न दीप्यते।। तत्रैव, 3.1, 4.10

9. पुनरुक्तवदाभासं छेकानुप्रास एव च।
अनुप्रासस्त्रिधा लाटानुप्रासो रूपकं चतुः।।
उपमा दीपकं चैव प्रतिवस्तूपमा तथा।
इत्येत एवालंकारा वाचा कैश्चिदुदाहृताः।। काव्यालङ्कारसारसंग्रहः, 1.1–2

10. विष्णुधर्मोत्तरपुराणम्, 16.1–2

11. ध्वन्यालोकः 2.14–15

12. तत्रैव, 3.41–42

*

# हेलाराजटीकायां धात्वर्थविश्लेषणम्

**डॉ. विकास शर्मा**

**उपोद्घातः**

महावैयाकरणः पदवाक्यप्रमाणज्ञो वाक्यपदीयटीकाकारः हेलाराजः व्याकरण-दार्शनिकानामग्रगण्यः। हेलाराजः न केवलं वैयाकरणः अपितु दर्शनशास्त्रस्य विभिन्न-शाखास्वपि प्रवीणः, तेषां दार्शनिकविषयाणां विवेचना प्रकीर्णप्रकाशटीकायामुपलभ्यते। धात्वर्थविषये वैयाकरणानां दार्शनिकानाञ्च मतवैभिन्यं दृश्यते। आचार्ययास्कपाणिनिपतञ्जलि-भर्तृहरिभट्टोजिदीक्षितकौण्डभट्टनागेशभट्टादयः मूर्धन्या विद्वांसः केषुचित् स्थानेषु प्रत्यक्षतया अन्यत्र परोक्षतया धात्वर्थविषये स्वमतानि प्रकटितवन्तः सन्ति। वाक्यपदीयस्य क्रियासमुद्देशे धात्वर्थस्वरूपं वर्णितम्। हेलाराजेन स्वटीकायां सविस्तारं भर्तृहरेः सूक्ष्मदार्शनिकचिन्तनं प्रतिपादितम्।

**धात्वर्थस्य तात्पर्यम्–** वाक्यपदीये भर्तृहरिणा अष्टौ पदार्थाः प्रतिपादिताः। ते च– **शब्दद्वयम्**– सिद्धः शब्दः – पदं वाक्यं वा। **कल्पितः शब्दः**– प्रकृतिप्रत्ययरूपः। **अर्थद्वयम्** – सिद्धशब्दस्यार्थः कल्पितशब्दस्यार्थश्च। **सम्बन्धद्वयम्** – योग्यता-कार्यकारणभावरूपम्। **प्रयोजनद्वयम्**– अर्थबोधः - धर्मः इति आहत्य अष्टौ पदार्थाः–

**अपोद्धारपदार्था ये ये चार्थाः स्थितलक्षणाः।**
**अन्वाख्येयाश्च ये शब्दा ये चापि प्रतिपादकाः॥**
**कार्यकारणभावेन योग्यभावेन च स्थिताः।**
**धर्मे च प्रत्यये चाङ्गं सम्बन्धाः साध्वसाधुषु॥**[1]

लघुमञ्जूषाग्रन्थे नागेशभट्टः कल्पितशब्दतदर्थाभ्यामतिरिक्तं पदार्थषट्कमतीते भागे प्रत्यपादि। नागेशभट्टेन धात्वर्थनिरूपणविषये उक्तं यत् '**अथ सकलशब्दमूलभूतत्वात् धात्वर्थो निरूप्यते तत्र फलानुकूलो यत्नसहितो व्यापारो धात्वर्थः फलत्वं च तद्धात्वर्थजन्यत्वे सति कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यता-**

**निरूपितप्रकारतावत्त्वम्।'** अथेत्यस्य निरुक्तपदार्थषट्कनिरूपणानन्तरमित्यर्थः। अनेन पूर्वग्रन्थेनावसरसङ्गतिः प्रदर्शिता। फलानुकूलो यत्नसहितो व्यापारो धात्वर्थः इति सिद्धान्तः प्रारम्भे प्रतिपादितः।[2] फलं, व्यापारः उभयमपि धात्वर्थ इति गम्यते।

वैयाकरणभूषणेऽपि धात्वर्थविषयेऽर्थद्वयं प्राप्तम् – **फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः। फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्।**[3] व्यापारस्य विशेषणं फलं, विशेष्यं तु व्यापारः इत्यर्थः। अतः व्यापारस्य प्राधान्यं फले एव भवति। आचार्य-कौण्डभट्टेन उक्तं यत् सर्वे प्रत्ययाः कर्तृकर्मवाचकाः। अतस्ते फलव्यापारयोराश्रयत्वेन स्मर्यन्ते। व्यापाराश्रयः कर्त्ता फलाश्रयः कर्म इति। **'देवदत्तः तण्डुलं पचति'** विक्लित्त्यनुकूलव्यापारो पच्धात्वर्थः। विक्लित्त्याश्रयत्वात्तण्डुले कर्मता। तण्डुल-पदार्थस्य वृत्तिसम्बन्धेन विक्लित्तावन्वयः। विक्लित्तिश्च तण्डुलस्यावयवानां शिथिलीभवनम्। शैथिल्यञ्च तप्तमुदकं तज्जनितं बाष्पं तत्कृतं तण्डुलस्यावयवानां मृदुलत्वम्। तादृशविक्लित्तिमान् पदार्थ एव ओदनमभिधीयते। एवमुदकस्य तापः। बाष्पं, प्रस्वेदनं, शिथिलीभवनं, मृदुलत्वादि-फलसमुदायो विक्लित्तिः– यथा फलजनको व्यापारः, अग्निकाष्ठसंयोगः, फूत्कारः, प्रज्वालनं, अधिष्ठापनादिः अधिश्रयणान्तः क्रियाकलापो व्यापार इत्युच्यते। तेन विक्लेदनं मृदुलत्व-प्रापणं विक्लित्तिः तदाश्रयः कर्म तण्डुलमिति। व्यापाराश्रयो देवदत्तः इति कर्त्ता च स्मृति-विषयो जातः।

कौण्डभट्टमते 'कर्तृकर्मसंख्याकालाः' एतानि सर्वाणि धात्वर्थव्यापारस्य विशेषणानि भवन्ति। यथा 'पचति' इत्युच्चारणेन षडर्थाः गम्यन्ते। चत्वारस्तिङर्थाः कर्तृकर्मसंख्याकालाः। द्वौ धात्वर्थौ फलं तदनुकूलव्यापारश्च। तेन कर्तृकर्मसंख्याकालफलव्यापाराः 'पचति' इत्यस्य शाब्दबोधे भासन्ते। तेषु व्यापारस्य प्राधान्यमन्येषां तिङर्थानां विशेषणत्वम्।[4] नागेशः फलव्यापारञ्च पृथगर्थं मन्यते, इत्याक्षेपं करोति यत् पृथगर्थैः सह उभयमप्युद्देश्यत्वेन विधेयत्वेन च व्याख्यास्यते इति। तदनन्तरं फलं विशेषणं, व्यापारश्च कारणं तद्विपरीतञ्च फलं विशेष्यं, व्यापारः च विशेषणम्। एतादृशे अर्थे कर्मवाच्यफलस्योपस्थितिः कारणरूपेण विचारणीया। एवंप्रकारेण कार्यरूपे कारणरूपे च कल्पनाद्वयं, शक्तिद्वयकल्पने महत् गौरवम्। अतः नागेशस्य सम्मतिः यत् **फलानुकूलो यत्नसहितो व्यापारो धात्वर्थः।**

**धातुक्रिययोश्च कः भेदः–** उपर्युक्तविमर्शे धातुः क्रिया च पुनः पुनः प्रयुक्तौ, किन्तु प्रायः समानार्थेषु प्रयुक्तौ, किन्तु अत्र जिज्ञासा वर्तते यत् यदि जातिं सामान्यं वा क्रियारूपं केवलं धात्वर्थः एव प्रतिपादयति तर्हि धातुक्रिययोश्च कः भेदः?

धात्वर्थविषये भर्तृहरिणा उक्तं यत् **'तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते'**[5],

'**भाव एव हि धात्वर्थ इत्यविच्छिन्न आगमः।**'[6] अपि पतञ्जलिना प्रोक्तं यत् '**धातुरेव क्रियामाहेति प्रकृत्यर्थोऽन्यश्चान्यश्च प्रत्ययार्थः स एव। प्रत्ययार्थो-ऽन्यश्चान्यश्च भवति, प्रकृत्यर्थः स एव।**'[7] तात्पर्यं यद् वयं भावः इति वदामः, सः एव धात्वर्थः। प्रयोगावस्थायां प्रकृत्यर्थात् शेषार्थं सामान्यतः प्रत्ययार्थः इति मन्यते। अत्र प्रकृत्यर्थः धातुतः एव इत्यर्थः। भावोऽपि धातुप्रकृतिः। सामान्यक्रियारूपेषु केवलं प्रकृतिः धातुः एव उच्यते। तस्य कियदर्थः कियान् च शेषः प्रत्ययः, कथं निर्णयः इति जिज्ञासा वर्तते। पतञ्जलिः जिज्ञासां समाधत्ते – कथं ज्ञायते प्रकृत्यर्थोऽयं प्रत्ययार्थश्च? अन्वयव्यातिरेकाभ्यां ज्ञायते। 'पचति' इति शब्दोक्ते शब्दरूपे अर्थरूपे च भागद्वयं लभ्यते, शब्दरूपे तु 'पच्' + 'तिप्' इति, अर्थरूपे तु पाकक्रिया तथा एकत्वं कर्तृत्वञ्च।[8] अतः धातुधात्वर्थप्रसङ्गं ज्ञात्वा स्पष्टं भवितुमर्हति यत् यानि शब्दरूपाणि 'आख्यातम्' अथवा 'क्रिया' इति वदामः, ते धातुप्रत्ययोः समवेतरूपाः सन्ति। मूलधात्वर्थ एव '**भाववाचिनः**' '**क्रियावाचिनः**' इति उच्यते, तदनन्तरं शेषार्थ एव प्रत्ययार्थः इति कथ्यते। प्रत्ययार्थतः कालशब्दव्यक्तिसंख्यासम्बन्धादयः ज्ञायन्ते। एवंप्रकारेण आख्यातं न केवलं धात्वर्थविषयस्य प्रतिपादनं करोति अपितु अन्यार्थे बहुसूचनां ददाति यस्य मूलवस्तुना सह कोऽपि सम्बन्धः नास्ति। किन्तु एतत् सर्वं मिलित्वा व्यावहारिकरूपेण 'क्रिया' 'क्रियार्थश्च' उच्यते।[9]

**हेलाराजटीकायां क्रियाविषये विवेचनम् –** हेलाराजेन क्रियाविषये उल्लिखितं यत् किमपि सिद्धं वा असिद्धं वा (पूर्णं वा अपूर्णं वा) साध्यरूपेण वर्णितं तदा क्रमसंप्रेषणे क्रियापदम् उच्यते –

**यावत् सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।**
**आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते।।**[10]

हेलाराजः पतञ्जलिमतमाश्रित्य क्रियास्वरूपं प्रकाशयति यत् क्रियायाः तात्पर्यं 'व्यापारः'– '**कारकाणां प्रवृत्तिविशेषः क्रिया**' इति च मन्यते। '**प्रवृत्तिविशेषः**' इत्यनेन तात्पर्यं 'व्यापारविशेषः'। प्रत्येकं प्रवृत्तिः अन्यस्मात् भिन्ना भवति। शुष्कतण्डुलेषु मांसैः सह तण्डुलेषु च कर्तुः प्रवृत्तिः समाना नास्ति – **अन्यथा कारकाणि शुष्कौदने प्रवर्तन्ते, अन्यथा च मांसौदने।** '**अस्ति**' '**म्रियते**' इत्यपि तथैव। अस्य लक्षणानुसारं 'अस्ति' इत्यादि धातुः भवितुमर्हति यतो हि 'अस्' धातुः कर्तुः विशेषव्यापारं बोधयति।[11]

हेलाराजः कथयति यत् '**कारकाणां प्रवृत्तिविशेषः**' इति परिभाषायाः '**कारकाणाम्**' '**प्रवृत्तिविशेषश्च**' इति एतयोः पदयोः विचारः आवश्यकः। '**कारकाणाम्**' इति पदे बहुवचनं तथा च सर्वकारकाणां विशेषप्रवृत्तिः 'क्रिया' इति

सूचयति परन्तु चिन्तनेनायं सिद्धान्तः अयुक्तः दृश्यते। यतो हि वाक्ये क्रिया काचिदेव तु कर्तुः व्यापारमेव बोधयति तथा च कर्मवाच्ये कर्मप्रवृत्तिम् अपि बोधयति - **काचिदेव तु धातुनाभिधीयते कर्मगता कर्तृगता पच्यते पचतीति।**[12] शेषकारकप्रवृत्तिः क्रियाद्वारा न विज्ञायते, तर्हि 'कारकाणाम्' इत्यत्र बहुवचनं किमर्थं प्रयुक्तम्? अस्योत्तरमस्ति यत् 'कर्मकर्तरि' इत्यत्र अन्ये कारकाः स्वव्यापारेऽपि स्वतन्त्रत्वेन कर्त्तारः भवन्ति, तस्मिन् समये तेषां प्रवृत्तिविशेषबोधः क्रियामाध्यमेन भवति। **'स्थाली पचति'** अस्मिन् वाक्ये 'स्थाली' स्वाधिकरणतां त्यक्त्वा स्वव्यापारे स्वतन्त्रत्वात् कर्त्ता ज्ञायते। अनेन प्रकारेण सम्प्रदानापादाने विहाय अन्यं कारकमपि कर्तृत्वम् आपादयितुमर्हति। तेषां सर्वेषां प्रवृत्तिविशेषस्य बोधः क्रियया ज्ञायते, अतः **'कारकाणाम्'** शब्दे बहुवचनं प्रयुक्तम्।[13] हेलाराजेन प्रवृत्तिविशेषप्रसङ्गे त्रीणि मतानि प्रस्तुतानि –

* केचन व्यापारं प्रवृत्तिविशेषस्यार्थं मन्यन्ते। उपर्युक्तं विवेचनं अस्य मतानुसारं कृतमस्ति।

* अन्ये प्रवृत्तिविशेषस्यार्थं फलं मन्यन्ते यत् व्यापारस्यैव परिणामः भवति– **अन्ये तु, विशेषपदे भरं कृत्वा प्रवृत्तीनां विशेषः प्रवृत्तिविशेष इति सकलकारकजन्या विक्लित्त्यादिरूपा भूतिः फलभूता कारकप्रवृत्तेः क्रियेति व्याचक्षते।**[14]

* तृतीयाचार्यस्य मतेन प्रवृत्तिविशेषस्यार्थः सर्वकारकाणां सामान्यव्यापारः, न तु कस्यचित् कारकविशेषस्य व्यापारः– **तथा हि फलजननैव साधारणात्मिका क्रिया प्रवृत्तिविशेष इत्युच्यते प्रवृत्तिश्चायं विशेषश्चेति। विशेषोऽस्याः फल-जननारूपत्वं, न पुनरधिश्रयणादिरूपतैव। तेन जननाख्यो विशेषः प्रवृत्तीनां क्रिया।**[15]

अत्र **'प्रवृत्तिविशेषः' 'प्रवृत्तिसामान्यः'** इति कथ्यते येन सः कस्यापि धातुविशेषस्य बोधकः न भवेत्, क्रियापदे धात्वांशः **'धातुसामान्यः' 'धातुविशेषश्च'** बोधको भवति। 'पचति' इति पदे 'पच्' सामान्यरूपेण 'फलम्' 'व्यापारञ्च', विशिष्टरूपेण 'विक्लित्तिफूत्कारादीन्' बोधयति। प्रत्येकं कारकस्य स्वकीया प्रवृत्तिः सामान्यैव भवति। अतः अस्मिन् स्थाने 'प्रवृत्तिविशेषः' इति शब्दस्य प्रयोगः 'प्रवृत्तिसामान्यः' इत्यर्थे ज्ञातव्यम्– **सर्वेषां वा कारकाणामेकः प्रवृत्तिविशेषः प्रतिकारकं भिन्ना वा प्रवृत्तिरिति। आद्ये पदे कारकाणां फलभूता भूतिपक्त्यादिका वा प्रवृत्तिः स्याद्, अन्या वेति द्वैतम्।**[16]

**शङ्का –** क्रियालक्षणविषये हेलाराजः शङ्कते यत् साध्यरूपेण वर्णितः, क्रमसंचारः,

पौर्वापर्यवानर्थश्च च भवति, यथा– 'पाके' इति क्रियायां अग्निप्रज्वलनादारभ्य, स्थापयित्वा पात्रं, अन्नं पक्वम् इत्यादीनि सर्वाणि कार्याणि युगपत् कर्तुं न शक्यन्ते, क्रमेण करिष्यन्ते, तत्र 'पचति' इति क्रियापदस्य प्रयोगः कथं भवति?– **तदेवं शब्देन साध्यतया-ऽभिधीयमानः समाश्रितक्रमः पौर्वापर्यवानर्थः क्रियेति लक्षिते पूर्वापरीभूतस्य क्षणप्रवाहस्य युगपद् असन्निधानाद् एकक्रियालक्षणानुपपत्तिरित्याशङ्क्याह।**[17]

**एतस्य –** भर्तृहरिणा उक्तं यत् –

**गुणभूतैरवयवैः, समूहः क्रमजन्मनाम्।**
**बुद्ध्या प्रकल्पिताऽभेदः क्रियेति व्यपदिश्यते।।**[18]

हेलाराजः निराकरोति यत् क्रियायां बहवः घटकाः गौणाः, ते क्रमेण उद्भवन्ति– **क्रमवतां क्षणानाम् एकफलोद्देशेन प्रवृत्तानां सङ्कलना बुद्ध्या समापितैक्यानां क्रियात्वव्यवहारः।**[19]

**धात्वर्थविषये हेलाराजस्य विश्लेषणम् –** वैयाकरणाः '**फलानुकूलो यत्नसहितो व्यापारो धात्वर्थः**' इति मन्यन्ते। 'फलम्' 'व्यापारः' इति धात्वर्थस्य पृथक् पृथक् शक्तिः। अत एव '**फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः**' इत्यत्र फलव्यापारयोः द्विवचनस्य प्रयोगः। महाभाष्यकारस्य 'द्व्यर्थः पचिः' इति कथनम् अपि एतत् सूचयति। 'भूवादयो धातवः' इति सूत्रे महाभाष्यस्यार्थं निर्दिश्य हेलाराजः कथयति यत् किमपि सिद्धरूपेण असिद्धरूपेण वा विवक्षितं भवति, तदुत्पत्तिकारणात् क्रमभावप्राप्तः 'क्रिया' इति कथ्यते। अतः पाकक्रियासमयेऽपि – 'देवदत्तः किं करोति'? 'पचति' इत्यादयः प्रयोगाः व्यापारसमूहानां घटकानाञ्च कृते उपयुज्यन्ते –

**एकदेशे समूहे च व्यापाराणां पचादयः।**
**स्वभावतः प्रवर्तन्ते तुल्यरूपसमाश्रिताः।।**[20]

शबरस्वामी अपि तथैवोल्लेखं करोति यत् आख्यातार्थो व्यापारोपक्रमतः समापनपर्यन्तं सम्पूर्णक्रियाकलापस्य सूचकः वर्तते – **एषो ह्याख्यातार्थः स उपक्रमप्रभृत्यपवर्ग-पर्यन्तमाह।**[21] हेलाराजः कथयति यत् यस्याः प्रतीतिः साध्यरूपेण भवति सा क्रिया। अत्र पदान्तरं विना साध्यरूपप्रतीतिः अभिप्रेता। अन्यथा – 'देवदतः घटं करोति' इत्यत्र घटः साध्यः अत एव घटोऽपि क्रियापदवाचकः। परन्तु अस्मिन् वाक्ये घटसाध्यता 'करोति' इति पदस्य कारणेन भवति, अन्येन पदेन विना घटशब्दः सिद्धरूपेण एव प्रतीयते, न तु साध्यरूपेण। 'करोति' इति पदम् अन्यपदस्य साहाय्येन विना साध्यमेव

प्रतीयते – **क्रियाशब्दप्रयोगो हि घटस्य भाव्यमानावस्थावाचकः - घट इत्यस्मात् केवलात् सतः कारकस्यैवार्थस्यावगमात्।**[22]

हेलाराजः अग्रे विश्लेषयति यत् 'साध्यः' स्वतः निष्पाद्य एव इति। एतत् 'साध्यस्य' सम्यक् लक्षणं। 'घटं करोति' इत्यत्र 'घट' इत्यस्य साध्यता स्वतः सिद्धः न भवति, अपितु तत् 'करोति' इति पदात्। स्वतन्त्ररूपे तु घटे द्रव्यं भवति, अत एव सिद्धिः। पाक इत्यादिषु कृदन्तेष्वपि सैव सिद्धिः वर्तते। **'कृदभिहितो भावो द्रव्यवत् प्रकाशते'** इत्यत्र एषा भावना व्यक्ता। वस्तुतः पदानां साध्यता (**असत्त्वभूतभावना**) तथा च सिद्धता (**सत्त्वस्वभावापन्नता**) एव नामाख्यातयोः विभेदकतत्त्वे स्तः। अत एव आचार्ययास्केन उक्तम् – **'सत्त्वप्रधानानि नामानि', 'भावप्रधानमाख्यातम्'**। अस्मिन् विषये भर्तृहरिणापि उक्तम् –

**सत्त्वस्वभावमापन्ना व्यक्तिर्नामभिरुच्यते।**
**असत्त्वभूतो भावश्च तिङ्पदैरभिधीयते॥**[23]

निष्कर्षरूपेण हेलाराजः भर्तृहरिमनुवर्तते, भर्तृहरिणा स्वीकृतं क्रियापदप्रयोगं हेलाराजः तिङन्तपदरूपे व्यापारस्यार्थे च प्रयुक्तवान्। फलं, व्यापारः उभयमपि धात्वर्थः इति हेलाराजः मन्यते –

**साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना।**
**सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः॥**[24]

*

## सन्दर्भाः

1. वाक्यपदीयम्, 1.24, 25
2. परमलघुमञ्जूषा, धात्वर्थविचारः, पृ.40
3. वैयाकरणभूषणसारः, का. 2
4. वैयाकरणभूषणसारः, प्रभाकरी टीका, पृ.20
5. वा.प., 3.1.34
6. वा.प., 3.8.24
7. म. भा. 1.3.1 इत्यत्र वा. 6

8. म.भा. 1.3.1.1 वा. 6 व्याख्या

कथं पुनर्ज्ञायतेऽयं प्रकृत्यर्थोऽयं प्रत्ययार्थ.... तस्यासावर्थो योऽर्थोन्वयी।

9. व्याकरण की दार्शनिक भूमिका, वर्मा, सत्यकामः, पृ.256

10. वा.प., 3.8.1

11. वा.प., 3.8.1, हेलाराजकृतप्रकीर्णप्रकाशटीका

12. तत्रैव

13. हेलाराजकृतप्रकीर्णप्रकाशटीका, पदपदार्थसमीक्षा, बलदेव सिंह, पृ.72

14. वा.प. 3.8.1. पर टीका

15. तत्रैव

16. तत्रैव

17. वा.प., 3.8.3 हेलाराजकृतप्रकीर्णप्रकाशटीका

18. वा.प., 3.8. 4

19. वा.प. 3.8.4 हेलाराजकृतप्रकीर्णप्रकाशटीका

20. वा.प., 3.7.58

21. शाबरभाष्यम्, मी.द. – 4.3.24

22. वा.प. 3.8.1 हेलाराजकृतप्रकीर्णप्रकाशटीका

23. वा. प. 3.8.47

24. वा. प. 3.8.48

*

# किञ्चित् पारिभाषिकम्

काशिकावृत्तौ अष्टाध्यायीगतानां सूत्राणां शब्दाः यथा परिभाषिताः तथा सूत्र-तत्संख्योल्लेखपुरःसरम् अध्यायक्रमेणात्र संगृह्यन्ते।

१. नियुक्तः — अधिकृतः।
का. अणि नियुक्ते ६.२.७५

२. ग्रामः — ग्रामशब्दोऽत्र समूहवाची।
का. ग्रामेऽनिवसन्तः ६.२.८४

३. अकेवलम् — अकेवलं मिश्रम्।
का. उदकेऽकेवले ६.२.९६

४. मार्देयः — मृदोरपत्यं मार्देयः।
का. न हास्तिनफलकमार्देयाः ६.२.१०१

५. अवस्था — अत्र शृङ्गोद्गमनादिकृतो गवादेर्वयोविशेषोऽवस्था।
का. शृङ्गमवस्थायां च ६.२.११५

६. आचार्यः — आचार्यः उपाध्यायः।

७. राजा — राजा ईश्वरः।

८. ऋत्विजः — ऋत्विजो याजकाः।

९. संयुक्ताः — संयुक्ताः स्त्रीसम्बन्धिनः श्यालादयः।

१०. ज्ञातयः — ज्ञातयः मातृपितृसम्बन्धिनो बान्धवाः।
का. नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः ६.२.१३३

११. कुण्डम् — कुण्डशब्दोऽत्र कुण्डसादृश्येन वने वर्त्तते।
का. कुण्डं वनम् ६.२.१३६

१२. बृहस्पतिः — बृहतां पतिः।

१३. तनूनपात् — न पाति न पालयति वा नपात्। तन्वा नपात् तनूनपात्।

१४. नराशंसः — नरा अस्मिन्नासीनाः शंसन्ति, नरा एवं शंसन्तीति वा।
का. उभे वनस्पत्यादिषु युगपत् ६.२.१४०

१५. इत्थम्भूतः — इमं प्रकारमापन्न इत्थभूतः।

१६. कृतम् — कृतमिति क्रियासामान्ये करोतिर्वर्त्तते, नाभूतप्रादुर्भाव एव।
का.इत्थम्भूतेन कृतमिति च ६.२.१४९

# ‘मर्त्यप्रवासः’ – क्षणविध्वंसिजीवनदर्शनम्

**डा. शैलेश कुमार मिश्रः**

दर्शनस्य दुरूहेभ्यः शुष्कप्रायतथ्येभ्यः साहित्यमिव रसोन्मीलनं नैव जायते अत एव सामान्याः जनाः दार्शनिकतथ्यानामनुशीलने प्रवृत्ताः न भवन्ति, यद्यपि तेषु दार्शनिकप्रसङ्गेषु मानवजीवनस्य सूक्ष्मविवेचनं लभ्यते। एतदेव दर्शनं यदा साहित्यमाध्यमेन पाठकानां समक्षं प्रस्तूयते तदा ‘**कान्तासम्मिततयोपदेशयुजे**’[1] इति रीत्या पाठकाः तस्मिन्नपि विषये रसानुभूतिं कुर्वन्ति। आदिशङ्करभगवत्पादोक्तं ‘**पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम्**’[2] श्रीमद्भगवद्गीतोक्तं ‘**जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च**’[3] वा इत्यादीनि वचनानि स्युः लघुवाक्येष्वेतेषु सन्निहितं विपुलार्थव्यञ्जकं दर्शनं तावन्नास्माकं हृदयतलं संस्पृशति यावन्नास्मदीयानां दैनन्दिनजीवनचर्यासमन्वितानां काव्यनाटकादीनां परिधानेन अस्मद्दृष्टिपथम् आयाति।

प्रो. गोपबन्धु मिश्रस्य ‘मर्त्यप्रवासः’ इत्याख्यो नवीनतमः उपन्यासः साहित्यसुरभिं वितन्वानः मनोरमकथावीथिषु आस्वादकानां मनांसि रमयन् मर्त्यजीवनस्य क्षणिकतामधिकृत्य जीवस्य गमनागमनमधिकृत्य प्रतिपादितान् दार्शनिकसिद्धान्तान् सहजतया अवगमयति। 2021तमे ख्रीस्तवर्षे प्रकाशितस्यास्य उपन्यासस्य कथ्यम् अतीव महत्त्वपूर्णं जायते, यतो हि विगते वर्षद्वये कोरोनामहाव्याधेः भीषणप्रकोपदष्टमशेषविश्वं प्रतिदिनं मानवजीवनस्य नश्वरतां साक्षात्कुरुते स्म। समसामयिकाः परिस्थितयः कविहृदयं पर्युत्सुकीकुर्वन्ति इति निश्चप्रचम्। उद्विग्नञ्च कविहृदयं स्वीयमनस्समुद्रे तरङ्गिताः उद्वेगोर्मीः सद्य एवाभिव्यनक्ति। दुर्दम्यमहा-ऽऽमयप्रकोपविचलितस्यैकस्य करुणाविगलितकविहृदयस्योद्गारः प्रतीयते एष उपन्यासः– **मर्त्यप्रवासः।** संसारस्य महदाश्चर्यं यदा विस्मर्यतेऽस्माभिः तदा सर्वस्मिन्नेव युगे युधिष्ठिरः स्मारयति इदं सत्यं–**अहन्यहनि भूतानि गच्छन्तीह यमालयमपरे स्थातुमिच्छन्ति...।**[4] अयं संसारः अस्माकं प्रवासस्थलं वर्तते यं वयं निवासं मन्यमाना वसामः। अस्माकम् एष एव प्रमादः सर्वदुःखमूलं वर्तते।

उपन्यासकारः प्रो. मिश्रः कथारम्भे एव कथयति यत् सूर्य इव शक्तिमान् देवोऽपि आदिनमेव प्रवासार्थमागच्छति तर्हि का कथा नश्वरदेहानां प्राणिनाम्! उपन्यासे श्रीमद्भागवतोपदेशामृतं पाययन् स्वामी श्रद्धानन्दः प्रवदति ''यथा वयं 'वीजां' लब्ध्वा निर्धरितावधये प्रवासाय गच्छामः तथैव मर्त्यलोके जीवस्यागमनमपि निश्चितावधिप्रवासो वर्तते।'' समाप्ते वीजावधौ प्रवासोऽपि समाप्तिमेति स्वदेशप्रत्यागमनं च भवति। प्रसङ्गेऽस्मिन् रीतिकालीनः कविः जायसी स्मर्यते। पद्मावतनामधेये महाकाव्ये तस्य वचो वर्तते – '**ए रानी मन देखु विचारी एहि नैहर रहना दिन चारी।**'[5] संसाररूपिणि अस्मिन् गृहे द्वित्रा एव दिवसाः यापनीयाः पुनश्च परमेश्वरगृहे प्रत्यागमनं भविष्यति एव। सर्वे प्राणिनः परमात्मधामतः स्वीयश्वास'वीजां' स्वीकृत्य आगताः सन्ति। कस्य 'वीजायाः' अवधिः कियत्कालपर्यन्तम् अस्तीति केवलं परमेश्वरः एव जानाति। सर्वे रिक्तहस्ता आयान्ति रिक्तहस्ताः यान्ति च। अस्मिन् प्रसङ्गे कथाकारः कथानायकमुखेन सार्थकं प्रश्नमेकं करोति यत् प्रवासादस्माकं प्रत्यावर्तनं सुनिश्चितमस्ति तर्हि किमर्थमीश्वरः अस्मान् वारं वारं जनयति? निरञ्जनस्य प्रश्नस्यास्य सार्थकम् उत्तरं ददत् श्रद्धानन्दः ब्रूते यन्मनुष्यः मर्त्यलोकम् आगत्य आत्मानं परिष्करोतु स्वीयमर्त्यशरीरेण देवत्वमाप्नोतु इत्येतदर्थमेव ईश्वरेण सः वारं वारं मर्त्यलोके प्रवासितः क्रियते। यद्यपि कथानायको निरञ्जनो बालवयाः वर्तते तथापि तस्य प्रश्नाः अतीव गम्भीराः भवन्ति। काषायवस्त्रधारिणं संन्यासिनं श्रद्धानन्दं सः पृच्छति यत् परिव्राजकानां काषायवासांसि किमपि विशिष्टं सङ्केतयन्ति? स्वामिश्रद्धानन्दः प्रश्नस्यास्य दार्शनिकं समाधानं प्रस्तुवन् कथयति– ''यथा संसारस्य सुखदुःख-प्रलयाऽऽनन्देभ्यः अस्पृष्टः सन् दिवाकरः प्रतिदिनं स्वीयारुणाभां विकिरति, अतिवृष्ट्यना-वृष्टिभूमिकम्पराज्यनाशादिविपद्भ्योऽप्रभावितस्य नित्यं गतिमतः सूर्यस्य अरुणाभा अशेषं संसारं प्रकाशयति तद्वदेव गैरिकवसनमिदं सङ्केतयति यज्जीवने सुखदुःखमोहस्वभावाः प्रसङ्गाः भवन्तु नाम गैरिकं वर्णमिदं मर्त्यलोके तस्य नित्यचैतन्यसत्तायाः उपस्थितिं बोधयति। नायं जीवो मर्त्यलोकेऽस्मिन् स्थूलदेहमात्रेण आयाति अपि तु तस्यान्तस्तले सच्चिदानन्दपरमात्मनः अंशो विद्यमानो भवति।'' उपन्यासेऽस्मिन् रघुनाथ–विरूपाक्ष–निधि–नारायण–नरोत्तम–प्रमोद–व्रजसुन्दर–शेफाली–आद्यादीनां जीवनदृश्यानि प्रदर्श्य रचनाकारेण करुणरसस्रोतस्विनी प्रवाहिता यस्याः पर्यवसानं शान्तरसे भवति यदा स्वामिश्रद्धानन्दः जीवनस्य क्षणिकतामधिकृत्य एतदुपदिशति यज्जगत्प्रवासावधौ पूर्णे सति प्रवासान्निवासं प्रति आगमनं निश्चितम्। एतदेव जीवनस्य चिरन्तनं सत्यं वर्तते, तस्मिन्विषये शोको नैव कर्तव्यः। नश्वरसंसारस्य क्षणिकत्वमुपदिशन्ती भगवद्गीता अपि कथयति –

**देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा।**
**तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति।।**[6]

कथायाः विभिन्नपात्राणां जीवने जायमानानां विविधवृत्तान्तानाम् उत्कृष्टा प्रस्तुतिः अनुक्षणं पाठकानाम् उत्कण्ठां वरीवर्धयति। आद्यायाः प्रसङ्गे इदमित्थं प्रतिभाति यन्निरञ्जनस्य उपस्थित्या आसन्नमरणायाः आद्यायाः जीवने किंचित्परिवर्तनं भविष्यति सा मृत्युमुखाद् बहिरागमिष्यति च, किन्तु मर्त्यप्रवासस्य याथार्थ्यं स्थापयता रचनाकारेण ईदृशी कथासर्जना कृता यया आद्यायाः मृत्युना विचलितहृदयस्य पाठकस्य हृदये किंचिदाश्वस्तिः भवति। निरञ्जनः संघर्षशीलः योद्धा इव चित्रितः यः खलु जीवनसंघर्षनिरतः सन् न केवलं भौतिकजगति साफल्यशिखरमारोहति अपि तु स्वीयचारित्रिकवैचारिकौदात्त्येन पाठकानां मर्म स्पृशति।

उपन्यासेऽस्मिन् उपन्यासकारेण एकतो ग्रामीणपरिवेशस्य सौन्दर्यमयी छविश्चित्रिता अपरतश्च नागरी संस्कृतिरपि महता कौशलेन चित्रिता। कुत्रचिद् ग्रामस्य तडागे जलक्रीडानिमग्नः चपलः निश्छलो बालः निरञ्जनः कुत्रचिच्च अवकाशे नगराद् गृहं प्रतिनिवर्तमानः गम्भीरः छात्रः निरञ्जनः दृश्यते। यदा स नगराद् गृहं प्रतिनिवर्तते तदा तस्य बाल्यकालीनवृत्तानां साक्षिभूतो वटवृक्षः सजीवायते। अवरुद्धाध्ययनाः निरञ्जनस्य बाल्यवयस्याः तेन सह परिहसन्तः कथयन्ति– "अहो निरो! यदा त्वं पठित्वा साहबः भविष्यसि तदा अस्मान् स्मरिष्यसि खलु?"[7] कालात्यये ग्रामीणजनानाम् एषः परिहासः सरसव्यवहारश्च कुत्रचिल्लुप्यते। राजनीतिमलिने स्वीये पद्मनाभपुरे न कुत्रापि आत्मीयतामनुभवति निरञ्जनः। सुदीर्घकालानन्तरं यदा निरञ्जनः ग्रामं प्रतिनिवर्तते तदा तद् वटवृक्षचत्वरं जनशून्यं दृश्यते यत्र एकोऽपि कुशलप्रष्टा तस्य न वर्तते। राजनीतिक-दलभेदकारणात् ग्रामस्य वातावरणं कलहपूर्णं जातमस्ति। वस्तुतः अद्यतनो ग्रामीणपरिवेशो राजनीतिदूषितो वर्तते। नैकासां शैक्षणिकसंस्थानां शैक्षणिकसांस्कृतिकवातावरणं वर्णयता प्रो. मिश्रवर्येण नगरीयपरिवेशे जीवनं यापयतां बहुविधजनानां संघर्षमयं जीवनं चित्रितम्, यथा दीनः फलविक्रेता निधिः, प्रेमविफलः आत्महन्ता नारायणः। शेफालीव्रजसुन्दरयोः प्रेमविवाहः, तदनन्तरं स्वार्थसाधनपरयोः द्वयोर्विवादः तस्य भयावहः परिणामश्च पाठकस्य हृदयं मथ्नाति। सुशिक्षितयोरपि द्वयोः पतिपत्न्योरहङ्कारः कथं प्रेमसूत्रं विखण्ड्य हसन्मुखं परिवारमेकं विनाशगह्वरे पातयति इति सिद्धहस्तेन रचनाकारेण महता कौशलेन प्रस्तुतीकृतः। मृत्युशय्यासीनां स्वीयप्रणयिनीम् आद्यामाश्वासयन् दत्तवचनो निरञ्जनः तस्याः स्वसारं पद्यामुद्वहति। अयं खलु प्रेम्णः आदर्शः। ग्रामसंस्कृतिसंरक्षणपरः निरञ्जनाग्रजः क्षणं

यावदेनां नानुमन्यते परन्तु किंचित्कालानन्तरं सोऽपि एनां स्वीकरोति।

सरलसंस्कृतशब्दैः रेखाचित्रविनिर्माणे प्रो. मिश्रस्य दक्षता अत्र उपन्यासे दरीदृश्यते। तस्य अन्याः अपि रचनाः तस्यैतत्कौशलं प्रदर्शयन्ति। मर्त्यप्रवासे स्वामिनः श्रद्धानन्दस्य चित्रमिदं द्रष्टव्यं वर्तते- ''श्रद्धानन्दमहाराजः उपचत्वारिंशद्वर्षीयः, उन्नतः कपालदेशः, कृष्णाः केशाः श्मश्रूणि च, एकम् अधोवस्त्रम्, अपरं चोत्तरीयम् - उभयमपि गैरिकम्। मुखे हासः, नेत्रयोः शान्तिः, शरीरे अक्लान्तिः, दृष्टौ अभ्रान्तिः, गतौ अचञ्चलता, वाचि मधुरता गम्भीरता च...।''[8] निरञ्जनस्य सहाध्यायिन्या आद्यायाश्छविरपि द्रष्टव्या– ''आद्या वर्णेन ईषत्कृष्णा, दीर्घकेशी, सर्वदा केशाः वेणीबद्धाः, मुक्तकेशत्वं तस्यै न रोचते। इतरदाक्षिणात्याः इव सततं पुष्पप्रिया। केशेषु प्रत्यहं पुष्पं योजयन्ती रविवारे अवकाशदिवसे च लघ्वीं पुष्पमाल्यवेष्टनीमपि।''[9]

प्रो. मिश्रः न केवलं बाह्यसौन्दर्यस्य चित्रणे सिद्धहस्तो वर्तते अपि तु समुचित-शब्दावलीभिः भावात्मकप्रसङ्गानां गुम्फनेऽपि सर्वथा सिद्धः। प्रीतिभरिताः संवादाः शब्द-हीनाः सन्तः अपि अतिशयेन मुखराः भवन्तीति रचनाकारेण निरञ्जनाद्ययोः दूरभाषवार्तया सम्यक्तया प्रस्तुतीकृतम् –''ततः मौनमेव अराजत उभयोः पार्श्वयोः। प्रत्येकं वाणी शब्दान् अन्विष्यन्ती आसीत्। उपलब्धाः व्यावहारिकाः कोषगताः वा सर्वे शब्दाः प्रत्येकं वाणीं पुरस्कर्तुम् असमर्था इवासन् किन्तु समकालमेव अद्वैतः अखण्डश्च कश्चिद् भावः उभयत्र समानतया हृदि संस्थितः स्मितं हसति स्म यथा श्रीकृष्णः वृन्दावने वंशीं वादयन् भवति स्म। मुखे विवक्षुतया प्रस्फुटाधरोष्ठता किन्तु वाचि विकलता आसीत्। तत्पार्श्वे आद्यां तत्रत्या अवदत् – 'शीघ्रं कुरु। एषा नलिनी प्रतीक्षायाम् अस्ति।' 'तदस्तु' इति ताम् आद्या उदतरत् दूरभाषं च न्यधात्। उभयोः मौनमालापः समाप्तिम् अगात्।''[10]

यदा चित्तवृत्तयः यस्मिन् कस्मिन्नपि केन्द्रिताः भवन्ति तदा चर्मचक्षुर्भिः यन्न दृश्यते तत्खलु मर्मचक्षुर्भिः ग्राह्यो भवति। अतीन्द्रियप्रेम्णो भावाः मनसः गहनगुह्यलोके विचरन्ति यानस्माकं स्थूलेन्द्रियाणि ग्रहीतुं न समर्थानि भवन्ति। तानधिगन्तुं मर्मचक्षुषामवलम्बनमेव आवश्यकम्। उपन्यासकारः आद्यानिरञ्जनयोः भावात्मकसम्बन्धान् लक्षयन्निदं व्याचष्टे– 'किं च किमपि वास्तविकं तथ्यं चर्मचक्षुर्भ्यां द्रष्टुं विज्ञातुं च नैव शक्यते, तत्तु केवलं हृदयेनैव ग्राह्यं भवति।''[11]

जीवनस्य दर्शनमवगन्तुं हृदयस्थो ध्वनिः श्रोतव्यो ननु? केवलं बुद्धेर्गणितीयसंकेत-मनुसृत्य जीवनं यापयन् जनः जीवनस्य तत्त्वमवगन्तुं सर्वथा क्षमो न भवति, यतो हि जीवनं गणितमिव सरलरैखिकं न भवति। गणिते द्वयोरेकं व्यवकलनादेकं अवशिष्यते

किन्तु भावनात्मकरूपेण संयुक्तयोर्द्वयोरेकं गच्छति चेत्तत्र एकोऽपि नावशिष्यते। तत्र शून्यमवशिष्यते। गते कस्मिंश्चिदेकस्मिन् अपरस्य जीवने शून्यता समायाति। प्रमोदवेलयोः शेफालीव्रजसुन्दरयोः जीवनस्य वृत्तान्तानि एतत् सूचयन्ति। गणितशास्त्रस्य अध्ययनेऽध्यापने संलग्नो निरञ्जनः जीवनस्य गणितमपि सम्यक् जानाति। जीवनस्य विविधगतिषु तस्य विचाराः गणितीयाः नैव भवन्ति, अत एव सः जीवने साफल्यमवाप्नोति। स्वीयसहृदयत्वेन सः प्रियजनपरिजनानां जीवने आनन्दं वर्षयति। प्रो. महादेवनमुखेन रचनाकारः गणितस्य यद्दर्शनं प्रतिपादयति तत्खलु सहृदयहृदयस्य सूक्ष्मदृष्टिं सङ्केतयति।

उपन्यासस्य भाषा सरला बोधगम्या चास्ति। स्थाने–स्थाने अलङ्काराणां सन्निवेशो रचनायाः श्रीवृद्धिं कुरुते। निरञ्जनस्य सहाध्यायिनः व्यथितहृदयस्य प्रदीपस्य चित्रणे उपमालङ्कारस्य सौन्दर्यं दर्शनीयमस्ति– ''सहपाठी प्रदीपः तैलवर्त्यादिषु सत्सु अपि अग्निसंयोगेन विना अप्रज्वलितः दीप इव, अग्निसंयोगे सत्यपि आर्द्रकाष्ठे धूमायितं काष्ठखण्डमिव, भग्नलयं शास्त्रीयसंगीतमिव, उदितसूर्ये आकाशे हीनच्छायः चन्द्रमा इव, प्रखरे वायौ वहत्यपि मन्दिराग्रतः निश्चलः ध्वज इव प्रतीयते स्म।''[12]

प्राथमिकविद्यालयस्य कूपस्य मानवीकरणं विधाय रम्योपमाभिरलङ्कुर्वतः रचनाकारस्य कथनमिदमस्ति –''विद्यालयं निकषा कूपः। कूपे पर्याप्तं मधुरं जलम्। ग्रीष्मकाले किंचिदधः भवति जलम्, वर्षासु उपरि, शीते वसन्ते च मध्ये। ग्रीष्मे कठोरं तपः आचरन् कृशं शरीरं वहन् मुनिरिव, वर्षासु शस्यश्यामलाभूमिसम्पदा वर्धिष्णुः गृहस्थ इव किं च तदितरर्तौ उभयोः मुनिगृहस्थवृत्त्योः अभ्यासं विदधत् ब्रह्मचारी इव एषः कूपः आसीत्।''[13]

इत्थमेव ग्रीष्मावकाशे छात्रविहीनस्य शून्यस्य छात्रावासस्य उपमाः पाठकानां मर्माणि गहनतया संस्पृशन्ति– ''देवविहीनः देवालय इव, जलविहीनः तडाग इव, स्वररहितः कोकिल इव, प्रकाशशून्यः चन्द्रः इव, तरङ्गगर्जनारहितः समुद्रतटः इव, पर्यटकशून्या समुद्रवेलाभूमिरिव आसीत् छात्रावासः।''[14]

आधुनिकयुगे आविष्कृतानां अभिनवसाधनानां कृते तेषां गुणानुरूपं संस्कृतपर्यायनिर्माणं प्रो.मिश्रस्य रचनाशैल्याः असाधारणं वैशिष्ट्यं वर्तते। मर्त्यप्रवासे ईदृशाः प्रयोगाः सहृदयपाठकान् समाकर्षन्ति यथा Horn इत्यस्य कृते 'सतर्कध्वनिः' Hotel इत्यस्य कृते 'क्षणवासः' Intercom इत्यस्य कृते 'आभ्यन्तरीणदूरभाषा' इत्यादयः प्रयोगाः कलापक्षस्य श्रीवृद्धिं कुर्वन्ति। तस्य अन्यासु रचनास्वपि यथा 'पुरस्तात् पारिस्' इत्याख्येऽपि गद्यकाव्येऽपि इदृग्विधानां प्रयोगाणां बाहुल्यं दृश्यते। मानवसभ्यतायाः यात्रा यस्मिन्

कस्मिन्नपि युगे प्रसरतु नाम, नवीनाः आविष्काराः भवन्तु नाम, रचनाकारेण स्वीयशब्द-प्रयोगेण प्रमाणीकृतमिदं यत् संस्कृतभाषायाः शब्दविनिर्माणप्रक्रिया ईदृशी शक्तिमती वर्तते यया कस्यापि वस्तुनः कृते गुणानुरूपः शब्दः सरलतया निर्मीयते।

कोरोनामहाव्याधेः भीषणसमयेऽस्मिन् यदा मानवजीवने क्षणिकता स्पष्टतया दरीदृश्यते तदा प्रवासमयस्य मानवजीवनस्य दर्शनं प्रतिपादयन् अयमुपन्यासः मर्त्यप्रवासः सर्वथा प्रासङ्गिको जायते। विखण्ड्यमानानां सामाजिकपारिवारिकसम्बन्धानां विकटसमयेऽस्मिन् स्वीयनश्वरजीवनेन परेषां जीवने सौन्दर्यरचनायाः महत्त्वपूर्णसन्देशेन संवलितः कलापक्षेण हृदयपक्षेण च समृद्धः सरससरलशब्दावलीभिः गुम्फितोऽयमुपन्यासः संस्कृतसाहित्यजगति विशिष्टस्थानमधिकुरुते इति नात्र विसंवादः कश्चिदिति शम्।

*

## सन्दर्भाः


1. काव्यप्रकाशे प्रथमोल्लासे
2. चर्पटपञ्जरिकास्तोत्रे
3. श्रीमद्भगवद्गीतायाम्, 2.27
4. महाभारते, वनपर्वणि, 312.16
5. पद्मावते, मानसरोदकखण्डे, 1.2
6. श्रीमद्भगवद्गीतायाम्, 2.13
7. मर्त्यप्रवासे, पृ.47
8. तत्रैव, पृ.20
9. तत्रैव, पृ.101
10. तत्रैव, पृ.104
11. तत्रैव, पृ.103
12. तत्रैव, पृ.59
13. तत्रैव, पृ.25
14. तत्रैव, पृ.59


*

# अभिलेखसाहित्ये कविः वत्सभट्टिः

**डॉ. सुस्मिता गोस्वामी**

शब्दार्थयोः सहयोगेन कविमनसि साहित्यसौन्दर्यं बीजायते। संस्कृतसाहित्यसंसदि कविसृष्टेः वैचित्र्यवैपुल्यं सर्वेषां दृष्टिमभिनन्दयति। संस्कृते साहित्यस्य परिभाषा खलु काव्यम्। अस्य प्रबन्धस्य मूलविषयं द्योतयितुं व्यवहृतं अभिलेखसाहित्यमिति पदं किमस्माकमौत्सुक्यं जनयति? यतः संस्कृतसाहित्यसमीक्षाशास्त्रे काव्यस्य विभागपरिगणनायां एवंविधः प्रकारभेदो दृग्गोचरीभूतः। प्राचीनभारतीयेतिहासस्य पर्यालोचनायामभिलेखाः प्रमुखोपादानतया गृह्यन्ते। प्राकृतभाषायां संस्कृतभाषायाञ्च रचिता इमे अभिलेखाः इतिहासबोधं जनयितुमस्मासु आलोकवर्तिकेव प्रतिभान्ति। सम्भवतया ईशावीयद्वितीयाऽब्दात् उत्तरभारतीयाभिलेखानां प्रधानभाषारूपेण निर्वाचिता। देशजानामाञ्चलिकभाषाणां व्यवहारो ईशावीयनवमशतकादेव वरीवृध्यते।[1] अत्र मनसि प्रश्नः समायाति भारतेतिहासस्य प्रत्नप्रमाण-स्वरूपा इमे अभिलेखाः संस्कृतसाहित्यसम्भारसमृद्धौ सहायका भवन्ति न वेति?

संस्कृतभाषायां निबद्धानामभिलेखानां पठनाद् ज्ञायते प्रस्तरप्रमाणेषु विधीयते संस्कृतसाहित्यस्य दुर्मूल्यं रत्नम्। अतोऽभिलेखकाराणां काव्यविलासः साहित्यसमालोचकानां कुतूहलं जनयति। अध्यापकमानवेन्दुवन्द्योपाध्यायमहाभागस्याभिमतेन ''एते सालंकृता अभिलेखाः कदाचित् कवित्वसुलभगुणेन प्रख्यातसंस्कृतसाहित्यमपि स्पर्धयन्ति। ऐतिहासिकतथ्यानामाकरतया विवेचितेषु एतेष्वभिलेखेषु केचित् खण्डकाव्यरूपेणापि बुधमण्डलेषु समाद्रियन्ते।''[2] संस्कृताभिलेखसाहित्यस्य यात्रा प्रथमरुद्रदाम्नः जुनागढप्रशस्त्याः हि प्रारभ्यते। ईशावीय-प्रथमशतकस्य इयं राजप्रशस्तिः सालंकृतसंस्कृतकाव्यस्य निदर्शनभूता। यद्यपि व्याकरणस्य मिथ्याभ्रान्तिरपि अत्रास्ति। वैदर्भ्यमार्गमाश्रितेयं प्रशस्तिरस्माकं विस्मयं जनयति। संस्कृतसाहित्यमालायामभिलेखसाहित्यस्य गौरवमयी भूमिका वर्त्तते। अभिलेखकाराणां वाग्वैचित्र्येण विरचिता एते अभिलेखा ध्रुपदीसंस्कृतसाहित्यसभायां स्वगौरवेण विराजन्ते।

गुप्तकालीनेष्वभिलेखेषु पञ्चविंशतिसंख्यका अभिलेखाः संस्कृतभाषायामुपनिबद्धा

अभवन्। काव्यकलायां परिनिष्ठिताः कवय एतेषां रचयितारः। अभिलेखसाहित्यस्य मूर्धाभिषिक्तेषु हरिषेण–रविकीर्ति–विजयसेनप्रमुखेषु स्वल्पपरिचितस्य कवेः वत्सभट्टेः काव्यशैलीविवेचनार्थं शोधलेखेऽस्मिन् प्रवृत्ता भवाम्यहम्। वत्सभट्टिः सालंकृतशिष्टकाव्यस्य अर्थात् आर्टिफिशियाल पोयेट्रि इत्यस्य धारकः आसीत्। हरिषेणरविकीर्तिप्रमुखानामिव तस्य कविप्रतिभा नासीत्, किन्तु अभिलेखसाहित्ये तस्यावदानं न कोऽपि निराकर्तुं शक्नोति।

**कोऽयं कविः वत्सभट्टिः**

पट्टवायश्रेण्याः मन्दासौर इत्यभिलेखे उत्कीर्णा पङ्क्तिरियम् -

**श्रेण्यादेशेन भक्त्या च कारितं भवनं रवेः।**
**पूर्वा चेयं यत्नेन रचिता वत्सभट्टिना॥** (मन्दासौर-अभिलेखः, श्लोकः 44)

मध्यप्रदेशस्य मन्दासौर इति प्रदेशे सिओयानानदीतटसंलग्नस्य महेश्वरमन्दिरस्य संलग्नजलाशयस्य सोपानस्य दक्षिणपार्श्वस्य प्राकारे स्थितस्य प्रस्तरस्य गात्रे उत्कीर्णोऽयमभिलेखः। दक्षिणभारतीयब्राह्मीलिप्या पश्चिमदेशीयशैल्यामुत्कीर्णा एषा प्रशस्तिः।[3] अधुनातनसमये गोयालियरप्रदेशस्य गुजरिमहल इत्यभिधायां संग्रहशालायां संरक्षितोऽस्ति एषोऽभिलेखः।प्रथमकुमारगुप्ते पृथिवीं प्रशासति, स्थैर्यनयोपपन्नस्य बन्धुप्रियस्य प्रजानुरञ्जकस्य नृपबन्धुवर्मणः दशपुरनगरस्य शासनकाले पश्चिमभारतस्य लाटप्रदेशात् मध्यभारतस्य दशपुरे पट्टवायश्रेणी समागता। ते सर्वेषां पालकभूतं सूर्यमुद्दिश्य दशपुरे सूर्यमन्दिरं निर्मितवन्तः। अभिलेखानुसारं 493मालवाब्दे सूर्यभवनमिदं विनिर्मितम्, किन्तु 521मालवाब्दे अस्य सूर्यप्रासादस्य संस्कारोऽभवत्। मन्दिरनिर्माणसंस्कारयोर्वृत्तान्तमुपवर्णयितुं कोटतन्तुकारसमावायः वत्सभट्टिं नियुक्तवान्। सम्भवतः स कोऽपि देशजकविरासीत्, यो जीविकार्थं काव्यं विरचितवान्। पट्टवायश्रेण्याः देशान्तरगमनस्य ऐतिहासिकविवरणेन सह भारतवर्षे सूर्योपासनायास्तथ्यं वत्सभट्टिना काव्यसुषमया प्रतिपाद्यते। अनेन प्रबन्धद्वारेण अभिलेखसाहित्यस्य ख्यातकवेः वत्सभट्टेः रचनाशैली सानुपुङ्खमत्र विवेचयाम इति। चतुश्चत्वारिंशच्छ्लोकसमवायेन गुम्फितेयं प्रशस्तिः। सूर्यनमस्कारं विधाय दशपुरनगरस्य शोभा काव्यसौन्दर्येण उपस्थापनादनन्तरं गुप्तशासकानामधस्तनस्य बन्धुवर्मणः वीर्यवत्तां द्योतयन् पट्टवायश्रेण्या च सूर्यभवननिर्माणस्य वृत्तान्तमत्र कविना संयोजितम्। महाकाव्योचितवर्णनया प्रशस्तेरवयवं मण्डनादनन्तरं मालवाब्दानामुल्लेखपुरःसरं कविपरिचयमुद्घाटयति च वत्सभट्टिः।

छन्दोलङ्कार–रीति–वर्णनवैचित्र्यादिना काव्यशरीरं विनिर्मितं जायते। प्रस्तरेषु स्थानं सदैव सीमायितं भवति, किन्तु संक्षिप्ते परिसरेऽस्मिन् प्रशस्तिरचयितृणाम् अनुपम-

शोभासमन्वितं काव्यशरीरं संवर्ध्यते। कथं प्रत्नप्रमाणं काव्यपदवाच्यं भवतीति विषये वत्सभट्टेः सालंकृतवचोभिरत्रावगमयितुं प्रबन्धेऽस्मिन् आत्मानं नियोजयामि।

**वत्सभट्टेः रचनायाः छन्दोवैचित्र्यम्**

कथ्यते एतत् छन्दोबद्धं पदं पद्यम्। देवाः खलु छन्दोभिरात्मानं छादयित्वा ब्रह्मणः सकाशमधिगच्छन्ति। छन्दोभिः सज्जितं काव्यं चित्सुखं जनयति। कालिदासप्रमुखैः रचितेषु सालंकारशिष्टमहाकाव्येषु अनुष्टुप्–इन्द्रवज्रा–उपेन्द्रवज्रा–पुष्पिताग्रा–वसन्ततिलकादीनां वृत्तछन्दसां जातिच्छन्दसाञ्च भूरिशः प्रयोगबाहुल्यं नयनयोरायाति। वत्सभट्टिः एतेषां छन्दसां व्यवहारं तस्य रचनायां पूर्णरूपेण कृतवान्। द्वादशसंख्यकैः छन्दोभिः सज्जितेऽस्मिन्नभिलेखे वत्सभट्टेः काव्यनिर्माणशैल्याः विशेषत्वं विधृतमस्ति। शार्दूलविक्रीडित–वसन्ततिलका–आर्या–उपेन्द्रवज्रा–उपजाति–द्रुतविलम्बित–मालिनी–मन्दाक्रान्ता–हारिणीप्रभृतीनां छन्दसां माला कविवत्सभट्टिना ग्रन्थिता। अत्र संक्षिप्तरेखाचित्रेण श्लोकानुसारं छन्दसां प्रयोगो मया निर्दिश्यते। प्रसङ्गेऽस्मिन् बुधमण्डलेषु लब्धयशसः डी.सी. सरकारमहाभागस्यावदानं कृतज्ञचित्ताहं स्मरामि।[4]

| **श्लोकसंख्याः** | **प्रयुक्तानि छन्दांसि** |
|---|---|
| 1, 2, | शार्दूलविक्रीडितम् |
| 3, 5, 6, 11, 14, 18, 20, 22, 25, 27, 30, 32, 40 | वसन्ततिलका |
| 7, 9 | उपेन्द्रवज्रा |
| 10, 12, 28 | उपजातिः |
| 15 | द्रुतविलम्बितम् |
| 16 | हरिणी |
| 17, 26, | इन्द्रवज्रा |
| 19, 43 | मालिनी |
| 23 | वंशस्थविलम् |
| 13, 38, 39, 41, 42 | आर्या |
| 29 | मन्दाक्रान्ता |
| 34, 37, | अनुष्टुप् |

संस्कृतकाव्ये वसन्ततिलकाच्छन्दसः नितरां प्रयोगः परिलक्षितः। क्षेमेन्द्रस्य सुवृत्त-

तिलकाद् ज्ञायते काव्येषु वीररौद्रादीनां रसानां सम्यक् परिस्फोटनं वसन्ततिलकयैव यथार्थतां लभते।[5] अभिलेखेऽस्मिन् दीर्घसमासबद्धपदेन विषयस्य भावगाम्भीर्यमुपपादयितुं कविना सम्भवतया इदं छन्दः व्यवह्रियते। जगत्क्षयाभ्युदयहेतुरूपस्य भगवतो भास्करस्य ताम्रवर्णकिरणस्य सालंकाररूपं प्रख्यापयता वत्सभट्टिना उक्तम् –

**यः प्रत्यहं प्रतिविभात्युदयाचलेन्द्रविस्तीर्णतुङ्गशिखरस्खलितांशुजालः।**
**क्षीवाङ्गनाजनकपोलतलाभिताम्रः पायात्स वः सुकिरणाभरणो विवस्वान्॥**

इति ( मन्दासोर - अभिलेखः, श्लोकः 3)

दशपुरनगरस्य वर्णाढ्यशोभा कविना वसन्ततिलकाच्छन्दसा वर्णिता। सत्यक्षमादमशम-व्रतशौचधैर्यस्वाध्यायवृत्तविनययुक्तानां कोटतन्तुवायानां चरितमाहात्म्यख्यापने समलंकृतानां नारीणां शोभावर्धकस्य पट्टवस्त्रस्य सप्रशंसोल्लेखे दीनानुकम्पनपरस्य अभयप्रदस्य बन्धुवर्मणः वर्णनायाञ्च अस्य छन्दसः सार्थकप्रयोगोऽस्माभिरास्वाद्यते। अभिलेखस्य नमस्क्रियावाचिके श्लोके मोक्षार्थिभिः पूज्यमानस्य जगत्पालकस्य सूर्यस्य स्तुतौ शार्दूलविक्रीडितच्छन्दसः वक्रचलनस्य भावः सर्वथा परिस्फुटतीति प्रतीयते। प्रस्तुतविषयं सारतो विचारयितुं छन्दसां प्रयोगनैपुण्यमस्माभिर्दृष्टम्। इन्द्रवज्रा-उपेन्द्रवज्रा-उपजातिप्रभृतीनां छन्दसां विषयानुसारप्रयोगो वत्सभट्टेरिव प्रादेशिककवेः शास्त्रपाठस्य व्याप्तिं द्योतयति। दशपुरनगरस्य शोभा पट्टवाय-श्रेण्याः वृत्तिवैचित्र्यं द्विदृप्तपक्षक्षपणैकदक्षस्य बन्धुवर्मणो वीरत्वञ्च आर्याच्छन्दसा उपनिबद्धम्। मात्राच्छन्दसां अन्यतमाया आर्याया व्यवहारे यद्यपि यतिभङ्गदोषस्य उपस्थितिर्दृश्यते। दीप्तरश्मेः भवननिर्माणप्रसङ्गो मन्दाकान्ताच्छन्दसा दीर्घश्लोकशरीरेण व्याख्यातः कविना। मन्दाक्रान्तायाः सम्यग् व्यवहारः सम्भवतया श्लोकेऽस्मिन् परिदृष्टः–

**तस्मिन्नेव क्षितिपतिवृषे बन्धुवर्मण्युदारे सम्यक्स्फीतं दशपुरमिदं पालयत्युन्नतांसे।**
**शिल्पावाप्तैर्धनसमुदयैः पट्टवायैरुदारं श्रेणीभूतैर्भवनमतुलं कारितं दीप्तरश्मेः॥**

इति। (मन्दासौर– अभिलेखः श्लोक 29)

**अभिलेखसाहित्यस्यावयवे महाकाव्यस्यास्वादनम्–**

दुकूलकाराणां मन्दासौर इत्यभिलेखे महाकाव्यस्य वैशिष्ट्यसंयोजनस्य चेष्टा कवेरपेक्षितेति भावयामि। श्रेण्यादेशेन प्रयत्नेन च रचितेयं प्रशस्तिः कृत्रिमकाव्यशैल्याः स्थानभूतेति व्युलारमहाभागस्याभिमतम्। तन्मते अस्यां प्रशस्त्यां विषयवैचित्र्यवर्णनादवगम्यते यत् कविः वत्सभट्टिः महाकाव्यतुल्यं वैशिष्ट्यमत्र संयोजयितुमियेष।[6] कथं महाकाव्यस्य वैशिष्ट्यं तस्य रचनायामनुप्रविष्टमिति विषयेऽस्मिन् विशदं समीक्षणमावश्यकम्। महाकाव्यस्य

लक्षणप्रसङ्गे दण्डिना भणितम् –

**नगरार्णवशैलचन्द्रार्कोदयवर्णनै-**
**रुद्यानसलिलक्रीडामधुपानरतोत्सवैः॥** इति। ( काव्यादर्शः 1.16)

अभिलेखस्यास्य पूर्णरूपेण पठनाद् ज्ञायते लाटदेशस्य दशपुरनगरस्य च वर्णनं महाकाव्योचितभावसमावेशेन कविना कृतम्। एष ओजोगुणसम्पन्नवाचा दशपुरस्य सौन्दर्यं चमत्कृतिं च जनयति। तत्रोच्यते–

**मत्तेभगण्डतटविच्युतदानबिन्दुसिक्तोपलाचलसहस्त्रविभूषाणायाः।**
**पुष्पावनम्रतरुषण्डवतंसकाया भूमेः परं तिलकभूतमिदं क्रमेण॥**

इति ( मन्दासौर–अभिलेखः, श्लोकः 6)

वयमेतद् जानीमः यत् प्रस्तरगात्रस्य संक्षिप्ते परिसरे उत्कीर्णेऽभिलेखे महाकाव्यस्य परिव्याप्तिः न कदापि सम्भाव्यते। ईशावीयपञ्चमशतकाद् अनन्तरं सालंकृतसंस्कृतमहाकाव्यस्य पाठप्रचलनं सहृदयेषु समासादितम्, यस्य प्रभावं वत्सभट्टेः सदृशः प्रादेशिककविरपि नातिक्राम्यति। ससुतबन्धुजनाः प्रथितशिल्पाः दुकूलकाराः दशपुरपार्थिवगुणापहृताः सन्तः पश्चिमसमुद्रतटवर्तिनः लाटदेशात् दशपुरं समागता इति तात्पर्यपूर्णस्यैतिहासिकतथ्यस्य संरक्षणार्थं प्रस्तुतायां प्रशस्त्यां महाकाव्योचितवर्णनमस्माकं नयनपदवीमवगाहते। ईशावीये पञ्चमशतके गुप्तानां शासनकाले संस्कृतमेव साहित्यरचनायाः प्रधानभाषा आसीत्। काव्यरचनायां विषयस्य साडम्बरं वर्णनमलङ्काराणां प्रयोगबाहुल्यं दीर्घच्छन्दसो व्यवहारः संस्कृतसाहित्यस्य च प्रधानमुपजीव्यम् आसीत्। आलङ्कारिकभोजस्य सरस्वतीकण्ठाभरणम् इति ग्रन्थे महाकाव्यस्य वर्णनायामुक्तमेतत् –

**पुरोपवनराष्ट्रादिसमुद्राश्रमवर्णनैः ।**
**देशसम्पत् प्रबन्धस्य रसोत्कर्षाय कल्पते॥**
**कालः काव्येषु सम्पन्नो रसपुष्टिं नियच्छति।**
**राजकन्या-कुमार-स्त्री-सेनासेनाङ्गभङ्गिभिः॥**
**पात्राणां वर्णनं काव्ये रसस्त्रोतोऽधितिष्ठति॥** इति।

(सरस्वतीकण्ठाभरणम् 5.130–132)

काव्यसौन्दर्य–सम्पादनार्थम् ऋतु-वन-नदीसहयोगेन नगरस्य सालङ्कारवर्णनं कवीनामभीप्सितम्। महाकाव्योचितसुषमया कविः वत्सभट्टिः ऐतिहासिकाख्यानं रचितवान्। दशपुरनगरस्य शोभा ओजोगुणसम्पन्नया वाचा अनेन प्रकाशिता–

**स्वपुष्पभारावनतैर्नगेन्द्रमदप्रगल्भालिकुलस्वनैश्च ।**
**अजस्त्राभिश्च पुरङ्गनाभिर्वनानि यस्मिन् समलंकृतानि॥**

इति ( मन्दासौर–अभिलेखः, श्लोकः 9)

कृत्रिमकाव्यशैल्याः प्रचलनं तस्मिन्नेव समये संजातम्। वत्सभट्टिः समकालीनाना-मलङ्कारशास्त्राणां विषये अवहित आसीत्। महाकाव्योचितेन वर्णनावैचित्र्येण स प्रदेशशासकस्य नृपबन्धुवर्मणः प्रसङ्गे एतदाह–

''**बन्ध्वर्त्तिहर्त्ता नृपबन्धुवर्म्मा द्विड्दृप्तक्षपणैकदक्षः।**'' इति।

'**कान्तो युवा रणपटुर्विनयान्वितश्च राजापि सन्नुपसृतो न मदैः स्मयाद्यैः॥**'इति।

(मन्दासौर– अभिलेखः, श्लोकः 26–27)

अलङ्कारशास्त्रेषु पद्यभेदविश्लेषणे मुक्तक–युग्मक–सन्दानितक–कलापक–कुलकादीनां पञ्चभेदानां लक्षणं विचारितम्। संस्कृतपद्येषु कदापि श्लोकचतुष्टयेन पञ्चकेन वा अभीप्सितार्थः समुपस्थापितः कविभिः। वत्सभट्टेः रचनायामप्येवंविधं वैशिष्ट्यं समुपनिबद्धम्। साहित्यदर्पणे पद्यस्य भेदविषये उक्तम् -

**छन्दोबद्धपदं पद्यं तेन मुक्तेन मुक्तकम्।**
**द्वाभ्यां तु युग्मकं सन्दानितकं त्रिभिरिष्यते।**
**कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम्॥** इति (साहित्यदर्पणः,6.314)

मन्दासौर इत्यभिलेखे सहस्यमासि शुक्लपक्षे मङ्गलाचारसहयोगेन च सूर्यभवन-निर्माणं कथयता कविना शिशिरर्त्तोः वर्णना कुलकपद्येन कृता। तत्र ''रामासनाथरचने दरभास्करांशुवह्नि... इत्यस्मादारभ्य सहस्यमासशुक्लस्य प्रशस्तेऽह्नि त्रयोदशे'' इति पद्यपञ्चकमाश्रित्य ऋतुशोभा कविनात्र प्रस्तुतेति। (मन्दासौर अभिलेखः, श्लोकाः 31-35) वसन्तर्त्तोः शोभातिशय्यं संदानितकेनात्र समावेशितम्। ऋतुवर्णनायां गौडमार्गप्रियः वत्सभट्टिः अवोचत्–

**रामासनाथरचने दरभास्करांशुवह्निप्रतापसुभगे जललीनमीने।**
**चन्द्रांशुहर्म्यतलचन्दनतालवृन्तहारोपभोगरहिते हिमदग्धपद्मे॥**
**रोध्रप्रियङ्गुतरुकुन्दलताविकोशपुष्पासवप्रमुदितालिकलाभिरामे ।**
**काले तुषारकणकर्कशशीतवातवेगप्रनृत्तलवलीनगणैकशाखे॥** इति।

(मन्दासौर - अभिलेखः, श्लोकः 31–32)

अशोकतरुकेतकसिन्धुवारपुष्पोद्गमैः सुशोभिते मधुपानमुदितमधुकरकुलोपगीतेन मुख-

रिते नगशाखाशोभिते मधुऋतुसमागमे नवकुसुमसमागमसमारोहोऽस्माकं चित्तमाकर्षयति।

**कालिदासस्य रचनायाः प्रभावः**

संस्कृतसाहित्ये कालिदासोत्तरकविषु न कोऽपि सम्भवतया तस्य प्रभावमाहात्म्येन वियुक्त आसीत्। कविवत्सभट्टिः न कुत्रापि सभाकविरासीत्, केवलम् अभिलेखोऽयं तेन विरचित इत्ति ज्ञायते। किन्तु दशपुरनगरस्य ऋतुसमूहानां शोभानाञ्च समुपवर्णने तस्मिन् कालिदासस्य रचनायाः प्रभावः सर्वथानुभूयते। अत्र ऐतिहासिकप्रेक्षापटस्यालोचनायाः प्रयोजनमस्ति। समकालीनसमाजव्यवस्थापर्यालोचनानन्तरमुपलभ्यते यद् राज-धनाढ्यसम्प्रदाय–वणिक्-सम्प्रदायेषु ऐश्वर्यस्य प्राचुर्यं विद्यते। संस्कृतेः वैचित्र्यसम्पूरिता धारा कालिदासस्य रचनासु पूर्णरूपेणास्वाद्यते। वत्सभट्टिरपि अस्य समयस्य प्रतिनिधिस्थानीय एव। अभिलेखस्य लिपिप्रमाणात् मालवाब्दद्वस्योल्लेखाच्च विज्ञापितमिदं यद् ईशावीयपञ्चम-शतकस्य कविरासीत् वत्सभट्टिरिति। अतः अग्रजमहाकविकालिदास्य रचनाशैल्या प्रभावोऽपि तस्मिन्नापतीति नात्र संशयलेशः। सर्वकालेषु महाकवीनां रचनायाः चमत्कारित्वं गङ्गाप्रवाहवत् अपरेषां कवीनां चित्तं विमोहयति। दशपुरनगरस्य सौन्दर्यं चित्रयता कविना निगदितम्–

**चलत्पताकान्यवलासनाथान्यत्यर्थशुक्लान्यधिकोन्नतानि।**
**तडिल्लताचित्रसिताभ्रकूटतुल्योपमानानि गृहाणि यत्र॥** इति।

(मन्दासौर–अभिलेखः, श्लोकः 10)

श्लोकोऽयं अस्मान् स्मारयति मेघदूतस्यानुपमामुक्तिमिमाम् “**विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्रा...** इति।” (मेघदूतम्, उत्तरमेघः,1) ब्युलारमहाभागो मन्यते यत् दशपुरस्थितानां बृहन्नगराणां वर्णनायां “**प्रसादमालाभिरलङ्कृतानि धरां विदार्य्यैव समुत्थितानि**” इति वाक्ये व्यवहृते शब्दबन्धे तत्काले प्रचलितानां महाकाव्यानां प्रभावो विद्यते। प्रसङ्गेऽस्मिन् कालिदासस्य रघुवंशस्य (12.70) **ससेतुं बन्धयामास** इत्यस्य उल्लेखो विहितः।[7] वत्सभट्टेः रचनायां कालिदासादीनामिव कवीनां महान् प्रभावो वर्तते। अध्यापकराधा-गोविन्दवसाकमहाभागस्तस्य ‘Inscriptions : their literary volue’ इत्यस्मिन् प्रबन्धे प्रशस्तिरचयितृभिः कथं कालिदासस्य काव्यप्रतिभा आलोक्यते इति विषयं विस्तरेण व्याख्यातवान्। शिशिरऋतोरनुपमसौन्दर्य्यं रामासनाथरचने दरभास्करांशुबह्विप्रतापसुभगे इति श्लोके विधृतमस्ति। विबुधानां नयेऽत्र[8] ऋतुसंहारस्य अस्य श्लोकस्य छाया प्रतिफलिता–

**न चन्दनं चन्द्रमरीचिशीतलं**
**न हर्म्यपृष्ठं शरदिन्दुनिर्मलम्।**

**न वायवः सान्द्रतुषारशीतला**

**जनस्य चित्तं रमयन्ति साम्प्रतम्।।** इति। (ऋतुसंहारः 5.3)

हेमन्तकालस्य शोभामुपवर्णयितुं कालिदासस्य श्लोकसौन्दर्यमस्माकं हृदयमावर्जयति–

**पीनस्तनोरःस्थलभागशोभा-**

**मासाद्य तत्पीडनजातखेदः।**

**तृणाग्रलग्नैस्तुहिनैः पतद्भि-**

**राक्रन्दतीवोषसि शीतकालः।।** इति। (ऋतुसंहारः 4.7)

महाकवेः आदिगन्तविस्तृतायां दृष्टौ ऋतुवैचित्र्यं यथा पूर्णरूपेण प्रतिभाति, नैतत् सर्वेषां समीपे तदेव प्रतिभाति। तथापि कालिदासस्य कविप्रतिभाया गौरवेण सर्वेषामुत्तरकालीनानां कवीनां चित्तमान्दोलयति। शिशिरऋतोः वर्णनावसरे कालिदासः कथं वत्सभट्टिं प्रभावयति तस्य प्रमाणमनेन श्लोकेन विज्ञायते–

**स्मरवशगतरुणजनवल्लभाङ्गनाविपुलकान्तपीनोरु।**

**स्तनजघनघनालिङ्गनिर्भर्त्सिततुहिनहिमपाते।।** इति ( मन्दासौर अभिलेखः,33)

**वत्सभट्टेः काव्यरीत्याः वैशिष्ट्यम्**

शब्दार्थसहितं काव्यं यया पद्धत्या सहृदयचित्तेषु आनन्दरसं सञ्चारयति सा पद्धतिः विद्वद्भिः रीतिरित्युच्यते। यद्यपि काव्येषु रीतेर्गुरुत्वं न खलु सर्वैः स्वीक्रियते, किन्तु आलङ्कारिको वामनः रीतिरात्मा काव्यमित्यनेन वचनेन काव्यस्य प्रधानोपादानतया रीतिमेव गृह्णाति। अलङ्कारशास्त्रेषु वैदर्भी-गौडी–पाञ्चाली इत्याख्याः रीतयः आद्रियन्ते। महामुनिभरतः आवन्ती–दाक्षिणात्या–पाञ्चाली–मागधी चेति काव्यप्रवृत्तीः प्रयोजनानुसारं स्वीकरोति। सप्तमशतके काव्यादर्शप्रणेता दण्डी काव्यप्रयोगविधेर्वैशिष्ट्यं 'मार्ग' इति शब्देन व्यपदिशति। अत्र कविवत्सभट्टेः काव्यशोभां विचारयितुं रीतिवादस्य आलोचना अपेक्षिता न वेति विषयेऽस्मिन् मनसि विविधाः प्रश्नाः समागताः। सूर्यमन्दिरस्य निर्माणं तस्य संस्कारसाधनञ्चावलम्ब्य रचितेऽस्मिन् तथ्यसम्पूरितेऽभिलेखे गौडमार्गस्य प्राणभूतस्योजो-गुणस्य व्यवहारं परिलक्ष्य काव्यरीत्या उल्लेखोऽत्र समीचीन इति तर्कयामि। कालपट-परिवर्तनेनालङ्कारशास्त्रेषु षड्विधा रीतयः बुधसंसदि स्वीकृताः। सरस्वतीकण्ठाभरणमिति इति ग्रन्थे विव्रियते –

**वैदर्भी चाथ पाञ्चाली गौडीयावन्तिका तथा।**

**लाटीया मागधी चेति षोढा रीतिर्निगद्यते।।** इति (सरस्वतीकण्ठाभरणम् 2.52)

साहित्यदर्पणस्य रीतिसंविज्ञानद्वारेण प्रबन्धशरीरेऽस्मिन् मन्दासौर-शिलालिपेः वैशिष्ट्यस्यालोचना विधीयते। आचार्यविश्वनाथेनोक्तम् –

**पदसंघटना रीतिरङ्गसंस्थाविशेषवत्।**
**अपकर्त्री रसादीनाम् सा पुनः स्ताच्चतुर्विधा॥** ( साहित्यदर्पणः 9.1–2)

अत्र पदसंघटना रीतिः इति पदं सविशेषमालोचनीयमिति मन्ये। कथं वत्सभट्टिः पदानां संयोजनं करोतीति विषयेऽस्मिन् मनोनिवेशात् ज्ञायते यत् ओजोगुणस्य सहायतया गौडमार्गमाश्रित्य च कविरयं प्रस्तराभिलेखेऽस्मिन् काव्यसौन्दर्यं विधातुं यतते स्म। ओजोगुणस्य लक्षणमाश्रित्य अत्र वत्सभट्टिना कथम् ओजोगुणः समायोजितः तदत्र प्रदर्शितम्। आचार्यदण्डी ओजोगुणस्य लक्षणप्रसङ्गे उक्तमेवम्–

**ओजःसमासभूयस्त्वमेतद् गद्यस्य जीवितम्।**
**पद्येऽप्यदाक्षिणात्यानामिदमेकं परायणम्॥** इति।
**तद्गुरूणां लघूनां च बाहुल्याल्पत्वमिश्रणैः।**
**उच्चावचप्रकारं तद् दृश्यमाख्यायिकादिषु॥** इति ( काव्यादर्शः 80–81)

दण्डिनः पौरस्त्या बध्नन्त्योजस्विनीः गिरः इति वाक्यद्वारेण निदर्श्यते यत् गौडमार्गीयकविजनाः पद्येऽपि ओजोगुणं प्रयोक्तुं शक्नुवन्ति। ''तडिल्लताचित्र-सिताभ्रकूटतुल्योपमानानि गृहाणि यत्र'' इति वाक्ये गृहाणीति पदस्य विशेषणतया व्यवहृतं समासबद्धपदं, प्रफुल्लपद्माभरणानां कारण्डवसंकुलानां सरोवराणां शोभामुपवर्णयितुं तटोत्थवृक्षच्युतनैकपुष्पविचित्रतीरान्तजलानि इति पदं, लाटनगरस्य रमणीयत्वं प्रतिपादनार्थं कुसुमभरानततरुवरदेवकुलसभाविहार इति दीर्घसमासबद्धस्य पदस्य प्रयोगे 'स्पष्टैरशोक-तरुकेतकसिन्धुवारलोलातिमुक्तकलतामदयन्तिकानाम्' इति वचने च चन्द्रांसुहर्म्यतल-चन्दनतालवृन्तहारोपभोगरहिते इत्यत्र रोध्रप्रियङ्गुतरुकुन्दलताविकोशपुष्पासवप्रमुदितालि-कुलाभिरामे इत्यादिषु वचनेषु दीर्घसमासानां व्यवहारोऽभिलक्ष्यते।[8] (मन्दसौर–अभिलेखः, श्लोकाः 10, 7, 40, 31) दण्डिकथितस्य ओजोगुणस्य यदि विशेषत्वं स्पष्टतया निरूप्यते तर्हि केषुचित् समासघटकेषु पदेषु गुरुवर्णानां बाहुल्येन लघुवर्णानामल्पत्वेन विपरीतक्रमेण वा क्वचिदपि तेषां संमिश्रणेन ओजोगुणस्य वैचित्र्यं सम्पाद्यते। विद्याधरीरुचिर-पल्लवकर्णपुरवातेरितास्थिरतरम् इति (मन्दासौर–अभिलेखः, श्लोकः 22) अत्र दीर्घसमासबद्धपदेषु लघुस्वराणामाधिक्यं गुरुवर्णानाञ्च लघुत्वं परिदृष्टम्। शिशिरऋतोः वर्णनायां प्रयुक्तेषु वाक्येषु 'तुषारकणकर्कशशीतवातवेगप्रनृत्तलवलीनगणैकशाखे' इति वाक्ये

(मन्दासौर–अभिलेखः 32) चापि लघुवर्णानामाधिक्यं ह्रस्वस्वराणां स्वल्पत्वमेव जातम्। 'मधुपानमुदित-मधुकरकुलोपगीतनगनैकपृथुशाखे' (श्लोकः 41) इति वचनेऽपि लघुगुरुवर्णानां क्रमसामञ्जस्यं भवति, किन्तु चलत्पताकान्यवलासनाथान्यत्यर्थशुक्लान्यधिकोन्नतानि (मन्दासौर–अभिलेखः श्लोकः 10) इत्यत्र गुरुस्वराणां बाहुल्यं लघुस्वराणाञ्च स्वल्पत्वमोजोगुणप्रधानायां रचनायामस्यां सार्थकभावेन प्रयुज्यते। वामनस्य काव्यालङ्कारसूत्रवृत्तौ शब्दार्थगतः ओजोगुणः स्वीकृतः। तत्र बन्धस्य गाढत्वमोजोगुणस्य विशिष्टतया परिगण्यते। तत्राह– ''**गाढबन्ध-त्वमोजः**'' (काव्यालङ्कारसूत्रवृत्तिः 3.3.5) वत्सभट्टेः रचनाशैल्यां सविशेष-दृष्टिनिक्षेपात् ज्ञायते यत् समतागुणेनापि रचनेयं पुष्टिं गता। तथोक्तं काव्यादर्शकारेण–

**समं बन्धेष्वविषमं ते मृदु–स्फुट–मध्यमाः।**
**बन्धा मृदुस्फुटोन्मिश्रवर्णविन्यासयोनयः॥** इति (काव्यादर्शः 1.43)

अनेन श्लोकवचनेनोपलभ्यते मृदु–स्फुट–मध्यमाश्च इत्येतस्मिन् बन्धत्रितये मृदु–स्फुट–मिश्रवर्णानां विन्यासो भवति। ह्रस्वस्वरवर्ण–वर्गान्तव्यञ्जनवर्ण–दन्त्यवर्णाश्च मृदुवर्णवाच्याः। दीर्घस्वरवर्ण–मूर्धन्यवर्णा र्–श्–ष्–स्–ह् एते वर्णाः स्फुटवर्णवाचकाः। अवशिष्टवर्णाः खलु मिश्राः। बन्धत्रयमिदं समासहीनमध्यमसमासयुक्त–दीर्घसमासविशिष्टमपि भवितुं शक्यते। अस्याभिलेखस्य ''स्मरवशगतरुणजनवल्लभाङ्गनाविपुलकान्तपीनोरु। स्तनजघनघनालिङ्ग-ननिर्भर्त्सिततुहिनहिमपाते'' इति। श्लोके 'अजस्रगाभिश्च पुराङ्गनाभवनानि यस्मिन्समलंकृतानि' इत्यत्रापि च मृदु–स्फुट–मिश्रवर्णानां प्रयोगवशात् समतागुणोऽत्र विराजते इति कथयितुं शक्यते।

**वत्सभट्टेः रचनायामलङ्कारवैचित्र्यम्**

काव्यशोभाकरा धर्माः खलु अलङ्काराः। लाटदेशात् समागताः कोटतन्तुकाराः दशपुरनगरे सूर्यभवनं निर्मितवन्तः। वृत्तान्तमिदं गौडमार्गाभिलाषी कविः वत्सभट्टिः महाप्रयत्नेन वर्णयति। तस्य रचना काव्यशोभाविशिष्टेन अलङ्कारेण सज्जिता। अत्र शब्दालङ्का-रार्थालङ्कारयोः वैचित्र्यमुपलभ्यते। विशेषतः काव्यतत्त्वविद्भिरेतत् सुप्रतिष्ठापितं गौडमार्गीयकवीनाम् अनुप्रासप्रियत्वम्। किमधिकम्?

**इतीदं नादृतं गौडैरनुप्रासस्तु तत्प्रियः।**
**अनुप्रासादपि प्रायो वैदर्भैरिदमिष्यते॥** इति ( काव्यादर्शः 1.54)

अनुप्रासस्य गुरुत्वं सर्वैरेव स्वीकृतम्। अग्निपुराणानुसारतः (343.1) आवृत्तिरनुप्रासो वर्णानां पदवाक्ययोः इति। अस्माभिर्निर्वाचिते अभिलेखे अनुप्रासस्य वैचित्र्यं कर्णसुखमावहति।

दण्डिना भणितमेतत्–

**वर्णावृत्तिरनुप्रासः पादेषु च पदेषु च।**

**पूर्वानुभवसंस्कारबोधिनी यद्युदीरिता।।** इति (काव्यादर्शः 1.55)

लाटनगरात् पट्टवायश्रेणी दशपुरस्य पार्थिवगुणापहृता सती मार्गक्लेशं दूरीकृत्य कथं दशपुरनगरे आगच्छतीति विषयवर्णनायामुच्यते–

''अध्वाद्विजान्यविरलान्यसुखान्यपास्य'' इति। अत्र वृत्त्यनुप्रासस्य वैशिष्ट्यमुपलभ्यते। प्रासादमालाभिरलङ्कृतानि धरां विदार्यैव समुत्थितानि, बन्ध्वर्त्तिहर्त्ता नृपबन्धुवर्मा द्विदृप्तपक्षक्षपणैकदक्ष इत्यादिषु स्थलेषु अलङ्कारवैचित्र्यं पूर्णतया ज्ञायते। दशपुरनगरस्य वर्णनं स्वभावोक्त्यिलङ्कारमण्डितम्। दशपुरनगर्य्याः सौन्दर्यप्रकाशे एवं श्लोकः प्राप्यते–

**तटोत्थवृक्षच्युतनैकपुष्पविचित्रतीरान्तजलानि भान्ति प्रफुल्लपद्माभरणानि यत्र सरांसि कारण्डवसंकुलानि।।** इति (मन्दासौर अभिलेखः, श्लोकः 7)

दशपुरस्थिताः ब्राह्मणाः सत्य–क्षमा–दम–शम–व्रत–शुचिता–वेदाभ्यासादिगुणैः प्रोज्ज्वलयन्ते प्रदीप्तैः ग्रहगणैः आलोकितमाकाशमिव। तत्रोक्तम्– ''**विद्यातपोनिधिरस्मयितैश्च विप्रैर्यद्भ्राजते ग्रहगणैः खमिव प्रदीप्तैः।।**'' इति (मन्दासौर–अभिलेखः, श्लोकः 14) अत्र कविना ग्रहगणैरालोकितमाकाशमिव ब्राह्मणैः शोभितं दशपुरनगरमुपमीयते। अलंकारशास्त्रेषु उत्प्रेक्षा इत्यलंकारः कवीनामतीव प्रियः। अस्य लक्षणप्रसङ्गे एवमाह–

**अन्यथैव स्थिता वृत्तिश्चेतनस्येतरस्य वा।**

**अन्यथोत्प्रेक्षते यत्र तामुत्प्रेक्षां विदुर्यथा।।** इति ( काव्यादर्शः 221)

दशपुरनगरं चपलोर्मिविशिष्टेन सरिद्द्वयेन समुपगूढं सत् अभिरम्यं प्रतीयते। एवमत्राप्यास्ति उत्प्रेक्षायाः सम्भावना।

**यद्भात्यभिरम्यसरिद्द्वयेन चपलोर्मिणा समुपगूढम्।**

**रहसि कुचशालिनीभ्यां प्रीतिरतिभ्यां स्मराङ्गमिव।।** इति।

(मन्दासौर–अभिलेखः, श्लोकः 13)

बन्धुप्रियः प्रजानां बन्धुरिव इत्यनया प्रशंसितः दुर्जयवीरः बन्धुवर्मा साक्षात् द्वितीयमदन इव। अत्र उत्प्रेक्षाया अवकाशो देदीप्यमानोऽस्ति–

**कान्तो युवा रणपटुर्विनयान्वितश्च राजापि सन्नुपसृतो न मदैः स्मयाद्यैः।**

**शृङ्गारमूर्त्तिरभिभात्यनलङ्कृतोऽपि रूपेण यः कुसुमचाप इव द्वितीयः।।** इति।

( मन्दासौर–अभिलेखः, श्लोकः 27)

वत्सभट्टिः निश्चिततरूपेण न कोऽपि सभाकविरासीत्, नापि तस्य अपररचनायाः परिचयो लभ्यते, किन्तु तस्य लेखन्यां महाकविकालिदासस्य प्रभावः सर्वथानुभूयते। सूर्यभवननिर्माणवृत्तान्तं प्रस्तरप्रमाणेषु उत्कीर्णयितुं श्रेण्यादेशेन स इतिहासस्य गुरुत्वपूर्णं तथ्यपूरितमाख्यानमिदं रचितवान्। शीतऋतुवर्णनावसरे लोध्रप्रियङ्गुतरुकुन्दलतानामुल्लेखः वसन्तवर्णनायाञ्चाशोककेतकसिन्धुवारप्रभृतीनां सुललितमुक्तिसमन्वितं विरचनमस्माकं चित्तमाकर्षयति।

पट्टवायश्रेण्या सूर्यभवननिर्माणस्य इतिहासमुपनिबद्धुमियं प्रचेष्टा समाजे सालङ्कारशिष्टकाव्यस्य लोकप्रियत्वं प्रदर्शयति।

अध्यापकमानवेन्दुबन्द्योपाध्यायमहाभागः अस्याभिलेखस्य व्याकरणभ्रान्तिं प्रति अस्माकं दृष्टिमाकर्षयति। तत्र दशमे श्लोके तुल्योपमानानीति पदे प्रविजृम्भितमित्यत्र'प्र' इत्यस्याप्रयोजनम्, अभिविभाति इति पदे च उपसर्गस्याधिक्यं काव्यदोषं जनयति।[१] किन्तु अभिलेखसाहित्यस्याङ्गने वत्सभट्टेः इयं प्रचेष्टा सर्वैः प्रशस्यते। ईशावीयपञ्चमशतके सालंकारकाव्यचर्चा कथं प्रादेशिककविमपि प्रभावयति? कथं वा पट्टवायश्रेण्या अभिवासनसम्पूरितमैतिहासिकवृत्तान्तं कविवत्सभट्टिः पद्यद्वारेण कल्पते इत्यत्र विराजते अभिलेखसाहित्यस्य तात्पर्यम्।

*

## सन्दर्भाः


1. अभिलेखसाहित्येर रूपरेखा (बंगला), देवार्चना सरकार, पृ.2–3
2. Sankrit Inscriptions, Manabendu Bandyapadhyay, Sanskrit and Related Studies, पृ.138
3. नित्यकालेर तुइ पुरातन (बंगला), देवार्चना सरकार, पृ.84
4. Selected Inscriptions, डि.सि. सरकार, पृ.299

5. छन्दोमञ्जरी, सम्पा. दिलीपकुमारकाञ्जिलालः, पृ.101
6. Sanskrit Inscriptions and the Kavya, Indian Antiquiry Vol., पृ.188
7. तदेव, पृ.143
8. Inscriptions : their literary value, Cultura Heritage of India, पृ.400
9. Sanskrit Inscriptons, Manabendu Bandypadhyay. Sanskrit and Related Studies, सम्पा. बिमलकृष्णमतिलाल, पुरुषोत्तम विलिमोरिआ, पृ.148

*

# किञ्चित् पारिभाषिकम्

काशिकावृत्तौ अष्टाध्यायीगतानां सूत्राणां शब्दाः यथा परिभाषिताः तथा सूत्र-तत्संख्योल्लेखपुरःसरम् अध्यायक्रमेणात्र संगृह्यन्ते।

१७. सुखम् — ओदनभोजनं सुखम्। चन्दनप्रियङ्गुकालेपनं सुखम्।
का. अनो भावकर्मवचनः ६.२.१५०

१८. व्यवायी — व्यवायी व्यवधाता।
का. व्यवायिनोऽन्तरम् ६.२.१६६

१९. गुणाः — अध्ययनश्रुतसदाचारादयोऽत्र गुणाः।
का. न गुणादयोऽवयवाः ६.२.१७६

२०. ध्रुवम् — ध्रुवमित्येकरूपमुच्यते। ध्रुवमस्य शाीलमिति यथा।
का. उपसर्गात् स्वाङ्गं ध्रुवमपर्शु ६.२.१७७

२१. अभितोभावि — अभितः इत्युभयतः। अभितो भावोऽस्यास्तीति तदभितोभावि।
का. परेरभितोभावि मण्डलम् ६.२.१८२

२२. अधिदन्तः — दन्तस्योपरि योऽन्यो दन्तो जायते स उच्यतेऽधिदन्तः।
का. अधेरुपरिस्थम् ६.२.१८८

२३. अनिधानम् — निधानमप्रकाशता। तदभिन्नमनिधानं प्रकाशनं निमूलम्।
का. नेरनिधाने ६.२.१९२

२४. प्रत्यशुः — प्रतिगतोंऽशुः प्रत्यंशुः।
का. प्रतेरंश्वादयस्तत्पुरुषे ६.२.१९३

२५. अवक्षेपणम् — अवक्षेपणं निन्दा। सुशब्दोऽत्र पूजायामेव।
का. सोरवक्षेपणे ६.२.१९५

२६. जनुः — जनुरिति जन्मनो नामधेयम्।
वा. पुंसानुजो जनुषान्ध इति वक्तव्यम्।
का. ओजःसहोम्भस्तमसस्तृतीयायाः ६.३.३

२७. आख्या — आख्या संज्ञा।
का. वैयाकरणाख्यायां चतुर्थ्याः ६.३.७

# सन्निपातलक्षणपरिभाषायां सन्निपातस्वरूपम्

**डा. गोपीकृष्णन् रघुः**

**भूमिका–**

'विंशत्याद्याः सदैकत्वे' इति वचनात् संख्येयवाचिना सहाभेदविवक्षायां शतमित्यत्र एकवचनम्। किन्तु शतं शतं शतमिति शतत्रयाभिप्राये सति शतशब्दाज्जसि '**जश्शसोः शिः**' (7.1.20) इत्यनेन जसः श्यादेशे, '**नपुंसकस्य झलचः**' (7.1.72) इति सूत्रेण नुमि '**सर्वनामस्थाने चासम्बुद्धौ**' (6.4.8) इत्यनेन दीर्घे च शतानीति रूपम्। एवमेव उपपूर्वकात् क्षयार्थकाद् दीङ्धातोः लुङि चलेः स्थाने सिचि '**मीनातिमीनोतिदीङां ल्यपि च**' (6.1.50) इत्यनेन सूत्रेण दीङ ईकारस्यात्त्वे ततः प्रक्रियाकार्ये उपादास्त इति रूपं सिद्धम्। शतानीत्यत्र '**यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते**' इति परिभाषया नुमः अङ्गावयवत्वं सिध्यति। एवं च शतन् इति नान्तत्वात् '**ष्णान्ता षट्**' (1.1.24) इत्यनेन षट्संज्ञायां '**षड्भ्यो लुक्**' (7.1.22) इत्यनेन जसो लुगापत्तिरिति प्रथमो दोषः। उपादास्तेत्यत्र च दीङ्धातोः कृतात्त्वस्य '**दाधाघ्वदाप्**' (1.1.20) इति सूत्रेण घुसंज्ञायां '**स्थाघ्वोरिच्च**' (1.2.17) इत्यनेन ईत्वापत्तिरिति द्वितीयदोषः। एवं दोषद्वये समागते तत्परिहाय परिभाषामाह–

'**सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य**' इति।

**परिभाषायाः सामान्यार्थः–**

सन्निपातो लक्षणं निमित्तं यस्य स सन्निपातलक्षणः। सन्निपातः नाम द्वयोः सम्बन्धः। विधीयते असौ इति विपूर्वकाद् धाधातोः किप्रत्ययः, कार्यमित्यर्थः। एवं द्वयोः सम्बन्धं निमित्तीकृत्य जायमानं कार्यं तद्विघातस्य सन्निपातं यो विहन्ति तस्य कार्यान्तरस्य निमित्तं न भवतीति परिभाषायाः सामान्यार्थः। एतत्परिभाषास्वीकारेण शतानीति प्रयोगे शतेत्यजन्तस्याङ्गस्य तथा जसः अव्यवहितपूर्वापरीभावसन्निपातवशात् जायमानो नुम् सन्निपातलक्षणो विधिः, स च नान्तत्वप्रयुक्तषट्संज्ञया जसो लुकि निमित्तं न भवति।

कारणं यदि जसो लुग् भवति तर्हि शत–जसोः पूर्वापरीभावसम्बन्धो विनष्टः स्यात्। एवम् उपादास्त इत्यत्र अकितः सिचः अव्यवहितपूर्ववर्तित्वसम्बन्धेन जायमानम् आत्त्वं, तस्य सम्बन्धस्य विघातकस्य '**स्थाघ्वोरिच्च**' (1.2.17) इति ईत्वकित्त्वविधायकशास्त्रस्य निमित्तं न भवति।

**परिभाषालिङ्गम्–**

सन्निपातलक्षणविधित्वमेतस्याः परिभाषाया लिङ्गम् अथवा प्रवृत्तौ निमित्तम्। यत्र सन्निपातलक्षणशास्त्रस्य प्रवृत्तेः प्राक् तस्य शास्त्रस्य निमित्तभूतो यः सन्निपातः, तस्य विघातकस्य शास्त्रान्तरस्य निमित्तं सन्निपातलक्षणशास्त्रं न भवतीति सिध्यति। यथा रामाय इत्यत्र '**ङेर्यः**' (7.1.13) इति सूत्रस्य प्रवृत्तेः प्राक् सन्निपातो भवति अदन्ताङ्गा-व्यवहितोत्तरत्वविशिष्टङे, तं सन्निपातं निमित्तीकृत्य जायमानः '**ङेर्यः**' (7.1.13) इति सूत्रेण यादेशो तत्सन्निपातविघातकस्य '**सुपि च**' (7.3.102) इति सूत्रेण विधीयमानस्य दीर्घस्य निमित्तं न भवति।

लोकन्यायमूला अस्त्येषा परिभाषा। लोके च उपजीव्यविरोधस्यायुक्तत्वं प्रसिद्धम्। उपजीव्य उपकारकः, उपकारकेण उपजीव्येन सह उपकार्यस्य उपजीवकस्य विरोधो हि लोकदृष्ट्या चायुक्तः। न हि पितुरुत्पन्नः पुत्रः पितरं हन्यात्। एवं लोकप्रसिद्धस्य उपजीव्यविरोधस्यायुक्तता शास्त्रे अनया परिभाषया उच्यते।

**सन्निपातार्थाः–**

अस्याः परिभाषाया न्यायमूलकत्वादेव न केवलं पूर्वपरयोः सम्बन्धः अपि तु विशेष्यविशेषणभावोऽपि सन्निपातशब्देन गृह्यते। विशेष्यविशेषणभावस्यापि सन्निपातशब्देन ग्रहणादेव ग्रामणि कुलमित्यत्र नपुंसकह्रस्वत्वेऽपि तुक् न। तथाहि ग्रामं नयतीत्यर्थे ग्रामपूर्वकात् नीधातोः क्विपि नस्य णत्वे, प्रातिपदिकत्वे सौ तस्य लुकि '**ह्रस्वो नपुंसके प्रातिपदिकस्य**' (1.2.47) इति सूत्रेण नीत्यस्य ईकारस्य ह्रस्वे ग्रामणि इति सिध्यति। अत्र प्रत्ययलक्षणेन क्विपः सत्त्वात् क्विपः पित्त्वात् कृत्त्वाच्च '**ह्रस्वस्य पिति कृति तुक्**' (6.1.71) इति तुक् प्राप्नोति, परन्तु प्रातिपदिकस्याजन्तेन सह यो विशेषणविशेष्यभावसम्बन्धः तद्रूपं सन्निपातं निमित्तीकृत्य ह्रस्वस्य विधानात्, स च ह्रस्वः प्रातिपदिकस्य अजन्तत्वस्य च विशेषणविशेष्यभावरूपसन्निपातस्य विघातको न भवति।

**अत्र केचिदाक्षिपन्ति–** नपुंसकरूपार्थाश्रयणाद् ह्रस्वो बहिरङ्गविधिः। अतः '**असिद्धं बहिरङ्गमन्तरङ्गे**' (प. 50)[1] इत्यनेन बहिरङ्गस्य ह्रस्वस्य अन्तरङ्गे तुकि

कर्तव्ये असिद्धत्वात् तुक् न भवतीति। तदसङ्गतम्। यतो हि अर्थकृतं बहिरङ्गत्वं शास्त्रे नाश्रीयते।

किञ्च '**षत्वतुकोरसिद्धः**' (6.1.86) इत्येतद्बलात् '**नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति**' (8.2.2) इति सूत्रे कृति तुग्ग्रहणबलाच्च तुग्विधौ '**असिद्धं बहिरङ्गमन्तरङ्गे**' इति परिभाषा न प्रवर्तते। तथाहि अधीत्य इत्यत्र पदद्वयसम्बन्धिवर्णद्वयनिमित्तकस्य बहिरङ्गस्य दीर्घस्यान्तरङ्गे तुकि कर्तव्ये अन्तरङ्गपरिभाषया असिद्धतया तुक् सिध्यति। एवं सिद्धे '**षत्वतुकोरसिद्धः**' (6.1.86) इत्यनेन सूत्रेण तुकि कर्तव्ये एकादेशस्यासिद्धत्वविधानं व्यर्थम्। तद् व्यर्थीभूय बोधयति अन्तरङ्गपरिभाषा तुग्विधौ न प्रवर्तते इति।

एवं वृत्रहभ्यामित्यत्र क्विब्निमित्तकतुगपेक्षया भ्याम्निमित्तकनकारलोपस्य बहिरङ्गतया अन्तरङ्गपरिभाषया असिद्धत्वात् सिध्यति तुक्, पुनः नलोपस्यासिद्धये '**नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति**' (8.2.2) इति सूत्रे कृति तुग्ग्रहणं व्यर्थम्। तद् व्यर्थं सत् ज्ञापयति यत् तुग्विधौ अन्तरङ्गपरिभाषा न प्रवर्तते इति। अतः ग्रामणीत्यादौ तुग्वारणार्थम् एषा परिभाषा एव आश्रयणीया। तच्च विशेषणविशेष्यभावस्यापि सन्निपातत्वे एव सिद्ध्यति।

विशेषणविशेष्यभावस्यापि सन्निपातत्वेन ग्रहणादेव एतत्परिभाषादोषनिरूपणावसरे वार्तिककृता– '**वर्णाश्रयः प्रत्ययो वर्णविचालस्यानिमित्तम्**'[2] इति प्रोक्तम्। तथाहि दाक्षिः प्लाक्षिरित्यादौ '**अत इञ्**' (4.1.95) इति सूत्रेण इञ् विधीयते। अत्र अदन्तं विशेषणम्, प्रातिपदिकञ्च विशेष्यम्। एवम् अदन्तत्व–प्रातिपदिकत्वरूप–विशेषणविशेष्य-भावसन्निपातं निमित्तीकृत्य इञ् भवति, स च '**यस्येति च**' (6.4.148) इत्यनेन सन्निपातविघातकस्य अलोपस्य निमित्तं न भवतीति दोषः। अर्थाद् वर्णाश्रयः अद्रूपवर्णमाश्रित्य जायमान इञ्प्रत्ययः वर्णविचालस्य भसंज्ञाविधानेन जायमानस्याल्लोपस्य निमित्तं न भवति। पूर्वपरसम्बन्ध एव सन्निपातशब्देन गृह्यते, स च सन्निपातः इञ्प्रत्ययसम्बन्धो नास्ति, अत इञ्प्रत्ययः सन्निपात-निमित्तको नास्ति। तर्हि कथमिञ् वर्णविचालस्य निमित्तमिति मनसि शङ्कामाधाय भाष्ये– '**न प्रत्ययः सन्निपातलक्षणः**'[3] इत्याशङ्कितं, तत्र चोच्चरितं यत्– '**अङ्गसंज्ञा तर्ह्यनिमित्तं स्यात्**'[4] इति। अर्थादेतस्य तात्पर्यं यद्यपि इञ् सन्निपातनिमित्तको नास्ति तथापि तस्मिन् परे सति 'यस्मात्प्रत्ययो विधीयते तदादि शब्दस्वरूपं तस्मिन् प्रत्यये परे अङ्गसंज्ञं भवती'त्यर्थकेनाङ्गसंज्ञाविधायकेन प्रकृतिप्रत्ययपौर्वापर्यनिमित्तिका अङ्गसंज्ञा भवति। सा चाङ्गसंज्ञा वर्णविचालस्य प्रकृतिसम्बन्ध्यकारलोपस्य न निमित्ता भवति। नन्वेवं ''वर्णाश्रयः प्रत्ययो वर्णविचालस्यानिमित्तम्'' इति वार्तिकं व्यर्थं स्यादिति आक्षेपं समादधानो नागेश आह यदेतन्मतं एकदेशयुक्तम्। एवञ्च विशेष्यविशेषणभावस्यापि सन्निपातशब्देन स्वीकारः करणीयः।

**परिभाषाप्रवृत्तिस्थलानि–**

केचिदेवं वदन्ति– ययोः सन्निपातयोर्विघातकं शास्त्रं तयोः द्वयोः अपि सन्निपात-निमित्तकविधौ उपादानं स्यात्। यथा '**घेर्ङिति**' (7.3.111) इति सूत्रे घिसंज्ञकस्य ङितश्च ग्रहणमस्ति। तयोः सन्निपातमाधारीकृत्य आधये चिकीर्षवे इत्यादौ गुणादयः सिध्यन्ति। गुणे सति आधे ए, चिकीर्षो ए इति स्थिते '**कृन्मेजन्तः**' (1.1.39) इत्यनेनाव्ययसंज्ञायां '**अव्ययादाप्सुपः**' (2.4.82) इति सूत्रेण विभक्तिलोपः प्राप्त आसीत्, परन्त्वनया परिभाषया न भवति। अतः द्वयोरपि सूत्रोपात्तत्वे एव इयं प्रवर्तते नान्यत्र इति।

एतन्मतमसङ्गतम्। कुम्भकारेभ्य इत्यत्र एकारान्तत्वात्कृदन्तत्वाच्चाव्ययसंज्ञा, तामाश्रित्य च सुब्लुक् प्राप्तः, तस्य च वारणं भाष्यकारेणानया परिभाषया विहितम्। अत्र तु द्वयोः निमित्तयोः सूत्रे उपदानं नास्ति। '**बहुवचने झल्येत्**' (7.3.103) इति सूत्रे अदन्तझलादिबहुवचनयोः सन्निपातस्तयोः झलादिबहुवचनस्यैवोल्लेखो वर्तते नादन्ताङ्गस्य। अतः भवन्मते अस्याः प्रवृत्तिरेव न भवेत्। किन्तु भाष्यकारेण कृतम्। अतो ज्ञायते तादृशोपादानमनपेक्षितमिति।

ययोः सन्निपातयोर्विघातकं शास्त्रं तयोः सन्निपातनिमित्तकविधौ अनुपादाने अपि एतस्याः परिभाषायाः स्वीकारात् एव दाक्षिरित्यत्र अकारान्तप्रकृतीञ्प्रत्ययसन्निपातनिमित्ताऽङ्गसंज्ञा परिभाषयानया अल्लोपस्य निमित्तं न भवेदिति आशङ्का '**कृन्मेजन्तः**' (1.1.39) इति भाष्ये अस्या अनित्यत्वविधानेन समाहितम्। एतेन सिध्यति यद् यस्मिन् शास्त्रे सन्निपातस्य सम्बन्धिनोरुल्लेखस्तत्रैवास्याः परिभाषायाः प्रवृत्तिरिति मतमसङ्गतम् इति।

**भाष्यसम्मतं परम्पराकल्पनं पूर्वपक्षनिरासश्च–**

साक्षात्परम्परया वा यत्र स्वनिमित्तभूतसन्निपातस्य विघातो भवति तत्र सन्निपातलक्षणो विधिरनिमित्तं भवति। अत्र केचिदाक्षिपन्ति– कुम्भकारेभ्य आधये इत्यादौ अव्ययसंज्ञाया अनया परिभाषया वारणं यद्भाष्यकारेण विहितं तदसङ्गतम्। तत्र एकारान्तस्य अव्ययसंज्ञा कस्यापि निमित्तस्य विघातकः न भवति। सन्निपातस्य विघातश्चात्र लुका सम्पद्यते नाव्ययसंज्ञया। अव्ययसंज्ञायाः फलं त्वकजेव। अतो नात्र परिभाषया अव्ययसंज्ञा वारणीया इति।

नेदं युक्तम्। अत्रत्यभाष्यस्वारस्यादवगन्तुं शक्यते यत् परम्परया सन्निपातस्य विघातेऽपि सन्निपातलक्षणो विधिर्निमित्तं न भवेदिति। अत्र सन्निपातनिमित्ता अव्ययसंज्ञा, तन्निमित्तश्च लुक्। स च लुक् परम्परया सन्निपातस्य विघातकः, अतः अव्ययसंज्ञाया वारणं कृतं भाष्यकारेण।

कार्यकालपक्षे लुगेकवाक्यतापन्ना अव्ययसंज्ञा बाधिता अपि अकजेकवाक्यतापन्ना सा न बाधिता इत्यपि न वक्तव्यम्। यतो हि अकच्प्रत्ययः स्वार्थिकत्वाद् अनैमित्तिकत्वाच्चान्तरङ्गम्। एवं च तेन सह एकवाक्यतापन्ना अव्ययसंज्ञापि अन्तरङ्गभूता। तदपेक्षया च झलादिबहुवचनपरनिमित्तकः एकारादेशो बहिरङ्गमस्ति। अकजेकवाक्यतापन्नां अव्ययसंज्ञायां कर्तव्यायां बहिरङ्गस्य एकारादेशस्य गुणादेश्च असिद्धत्वाद् अकजेकवाक्यतापन्ना अव्ययसंज्ञा भवति।

**पुनः तत्र प्रश्नः—** यदि बहिरङ्गगुणादेरसिद्धत्वाद् अकजेकवाक्यतापन्ना अव्ययसंज्ञा न भवतीति उच्यते। तर्हि लुगेकवाक्यतापन्ना अव्ययसंज्ञा अपि न सिध्यति तस्यापि अन्तरङ्गत्वादसिद्धत्वात्। एवं सन्निपातपरिभाषयात्राव्ययसंज्ञाया वारणं भाष्यकृतः असङ्गतमिति। तत्रोच्यते– लुगेकवाक्यतापन्ना अव्ययसंज्ञा गुणाद्यपेक्षया अन्तरङ्गभूता नास्ति। गुणादीनां लुकः च प्रत्ययसापेक्षत्वमस्ति। अतः द्वयोः सुबाश्रयत्वात् समानाश्रयत्वेन तयोरन्तरङ्गबहिरङ्गभावः न भवति। अत एव लुगेकवाक्यतापन्नाया अव्ययसंज्ञाया वारणं भाष्ये परिभाषयानया कृतमिति।

**रामायेत्यत्र दोषवारणम्—**

अत्र केचिद्वदन्ति– रामायेत्यत्र '**सुपि च**' (7.3.102) इति सूत्रेण विधीयमानो दीर्घो यजादिसापेक्षात् बहिरङ्गम्, अतः यादेशदृष्ट्या तस्यान्तरङ्गपरिभाषया असिद्धत्वमस्ति। तेन न सन्निपातविघात इति। तत्त्वयुक्तमेव। अत्र दीर्घद्वारा सन्निपातविघातः स्पष्टः। अतः आरोपितसन्निपातविघाताभावः स्वीकर्तुं न शक्यते। तेन सन्निपातपरिभाषाविरोधात् न सिध्यति रामाय इत्यत्र दीर्घः।

किञ्च, अन्तरङ्गपरिभाषाया नास्ति इदं स्थलम्। अन्तरङ्गपरिभाषया समकालप्राप्तस्य जातस्य वा बहिरङ्गस्यान्तरङ्गे कार्ये कर्तव्ये असिद्धत्वं विधीयते, न त्वन्तरङ्गे कृते प्राप्तस्य। अत्र तु यादेशरूपान्तरङ्गकार्ये कृते प्राप्तस्य बहिरङ्गस्य दीर्घस्य अन्तरङ्गपरिभाषया वारणं नैव युज्यते।

पुनः वास्तविकसन्निपातविघाताभावे एव एतस्याः परिभाषायाः प्रवृत्तिर्न भवति, न तु आतिदेशिकसन्निपातविघाताभावे। तत्र च मानं '**कृन्मेजन्तः**' (1.1.39) इति सूत्रस्थं भाष्यम्। तस्मिन् सूत्रे हे गौरि इत्यत्र अस्या अतिव्याप्तिः दर्शिता भाष्यकारेण। तथाहि गौरीशब्दात् सम्बुद्धौ सौ नदीसंज्ञायां सत्यां तां निमित्तीकृत्य '**अम्बार्थनद्योर्ह्रस्वः**' (7.3.107) इत्यनेन गौरीत्यस्य ईकारस्य ह्रस्वत्वे गौरि स् इति जाते '**एङ्ह्रस्वात्**

**सम्बुद्धेः**' (6.1.69) इति सूत्रेण सम्बुद्धिलोपः प्राप्नोति। परन्तु यां सम्बुद्धिमाश्रित्य ह्रस्वत्वं प्रवृत्तं तस्या लोपे सति सन्निपातविघात इति दोषो भाष्यकारेण प्रदत्तः। यदि चातिदेशिकसन्निपातविघाताभावे एतस्याः परिभाषायाः अप्रवृत्तिरङ्गीक्रियेत तर्हि हे गौरि इत्यत्र सम्बुद्धिलोपे सत्यपि स्थानिवद्भावेन सम्बुद्धेः सत्त्वान्न सिध्यति सन्निपातविघातः। अतः '**कृन्मेजन्तः**' (1.1.39) इति भाष्ये अतिव्याप्तिदानस्वारस्याद्वास्तविकसन्निपातविघाताभावे एतस्याः परिभाषायाः अप्रवृत्तिर्न तु आतिदेशिकसन्निपातविघाताभावे।

यदि शास्त्रबोधितत्वाभावात् सन्निपातस्याशास्त्रीयत्वम्, अतः तस्य विधानाय हे गौरि इत्यत्र न शास्त्रीयः स्थानिवद्भाव इत्युच्यते तर्हि रामायेत्यत्र अशास्त्रीयकार्ये सन्निपाते कर्तव्ये शास्त्रीयबहिरङ्गासिद्धत्वमपि न सिध्यति इति '**ईदूदेद् द्विवचनं प्रगृह्यम्**' (1.1.11) इति सूत्रे कैयटेनोक्तम्।

नन्वेवं सति पूर्वत्रासिद्धीये त्रैपादिके कार्ये अपि एतस्याः परिभाषायाः प्रवृत्तौ रामायेत्यादिरूपं न सिध्येदिति चेदुच्यते '**कष्टाय क्रमणे**' (3.1.14) इति सूत्र-निर्देशादस्याः परिभाषाया अनित्यत्वं स्वीक्रियते।

**उपसंहारः**

एवमत्र भाष्यादिग्रन्थदिशा सन्निपातपरिभाषायाः सन्निपातः न केवलं पूर्वापरसम्बन्धः अपि तु विशेषणविशेष्यभावः अपि भवति। तथैव द्वयोरपि निमित्तयोरुपादानं सूत्रे नापेक्ष्यते, साक्षात् परम्परया वा निमित्तविघातकेऽपीयं प्रवर्तते रामायेत्यत्र च दोषनिवारणोपायः इत्यादयो विषयाः पूर्वपक्षनिरासपूर्वकमत्र समासेन निरूपिताः।

*

## सन्दर्भाः

1. परिभाषेन्दुशेखरः सुबोधिनीसंवलितः, पृ.180
2. महाभाष्यं नवाह्निकम्, पृ.317
3. तत्रैव
4. तत्रैव

*

# विध्यर्थविषये गदाधरभट्टाचार्यमतोपस्थापनम्

**डॉ. छबिलालन्यौपानेः**

शब्दस्य प्रमाणान्तरत्वं नैयायिकैः सोपपत्ति साधितम्। तत्र पदविशेषोपस्थितेन पदार्थेन सहाऽन्वयार्थं यो हि संसर्गः सङ्कल्पितस्तादृशसंसर्गावगाहिशाब्दबोधं प्रति पदज्ञानस्य करणत्वं पदार्थोपस्थितेर्व्यापारत्वं वृत्त्यादिज्ञानस्य च सहकारिकारणत्वं भवतीति नैयायिकैरभ्युपेयते। उक्तञ्च–

**पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।**
**शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी॥**[1]

शाब्दबोधे च घटादिपदात् समवायसम्बन्धेन आकाशस्य शाब्दबोधापत्तिवारणाय वृत्त्याख्यः संसर्गः स्वीकृतः। वृत्तिश्च शक्तिलक्षणान्यतरसम्बन्धः। शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः। प्राचीनाः ईश्वरेच्छारूपा शक्तिरिति स्वीकुर्वन्ति, नव्याः पुनः इच्छैवेति। तथा च पदेन सह पदार्थसम्बन्धरूपायाः शक्तेः ग्रहणं विविधप्रकारेण भवति। तथा च–

**शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।**
**वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥**[2]

तत्र व्यवहारादपि शक्तिग्रहो भवति। तथा च प्रयोजकवृद्धेन घटमानयेत्युक्तं, तच्छ्रुत्वा प्रयोज्यवृद्धेन घट आनीतः, तदवधार्य पार्श्वस्थो बालो घटानयनरूपं कार्यं घटमानयेतिशब्द-प्रयोज्यमित्यवधारयति। ततश्च घटं नय, गामानयेत्यादिवाक्यादावापोद्वापाभ्यां घटादिपदानां कार्यान्वितघटादौ शक्तिं गृह्णाति।

कस्यापि कार्यस्य सिद्धिः प्रवर्त्तनाद् भवति। यावत्पर्यन्तं कार्ये प्रवृत्तिर्न भवति तावत् पर्यन्तं कार्यसिद्धिर्न दरीदृश्यते। तत्रेयं जिज्ञासा समुदेति यत् कार्येषु प्रवृत्तिः कथं भवति? तत्र प्रवृत्तिं प्रति किं कारणम्? इति। तत्समाधानावसरे प्रवृत्तिं प्रति कारणं विधिरिति स्वीकृतं वर्त्तते। उक्तञ्च कारिकावल्यां विश्वनाथेन–

**चिकीर्षा कृतिसाध्यत्वेष्टसाधनत्वमतिस्तथा।**
**उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत्॥**[3]

महर्षिगौतमेन विधिपदार्थः शब्दप्रमाणस्य परीक्षोपक्रमे मन्त्रब्राह्मणात्मकवेदवाक्यानां प्रामाण्यप्रतिपादनानन्तरं त्रिषु विध्यर्थवादानुवादरूपब्राह्मणवाक्यविभागेषु एकोऽन्यतमः प्रतिपादितः। विधेरर्थविवक्षायां न्यायसूत्रकारो महर्षिगौतमः प्रतिपादयति –

**विधिर्विधायकः**[4]

विधायकं वाक्यं विधिर्भवति। '**स्वर्गकामो यजेत**' इति वाक्यं यागविधायकत्वाद् विधिवाक्यमिति सूत्रार्थः। अर्थात् प्रवर्त्तकत्वं प्रवृत्तिजनकत्वमेव विध्यर्थः। तद्विषये नैयायिकानां बहुमतभेदो दरीदृश्यते। विश्वनाथवृत्तौ तावत् '**इष्टसाधनताबोधकप्रत्यय-समभिव्याहृतवाक्यं विधिः, अग्निहोत्रं जुहुयात् स्वर्गकामः**' इत्यादि।[5] '**देशकं विधिः**'[6] इति वार्त्तिकम्, एवञ्च प्रवर्त्तकं वाक्यं विधिरिति फलति। वाक्यस्य प्रवर्त्तकत्वं च प्रवृत्त्यनुकूलज्ञानोत्पादनद्वारा न स्वतः, शब्दस्य ज्ञापकत्वेन कारकत्वाभावात्। ततश्च '**यजेत**' इति शब्दश्रवणानन्तरं यमर्थं ज्ञात्वा प्रवर्त्तते तदर्थज्ञापकं वाक्यं विधिरिति सिध्यति। यद्यपि लिङादिप्रत्यय एव प्रवृत्तिहेतुं ज्ञानं जनयतीति स एव विधिशब्दवाच्य इति प्रतीयते, तथापि तादृशलिङादिप्रत्ययघटितत्वाद् वाक्यमपि विधिशब्देन व्यपदिश्यत इति न्यायभाष्यवार्त्तिकयोराशयः।

शब्दशक्तिप्रकाशिकायां जगदीशेन प्रतिपादितं यत्–

**लङ्लोडन्या विधेर्बोधे समर्था तिङ् लिङुच्यते।**
**प्रवर्तकचिकीर्षाया हेतुधीविषयो विधिः॥**[7]

लङ्लोड्भिन्नत्वे सति यादृशानुपूर्वीप्रकारकज्ञानं विध्यन्वयबोधजनकं तादृशानुपूर्वीविशिष्टतिङ् लिङित्युच्यते इति तदर्थः। लिङ्घटितानि बहूनि वाक्यानि श्रूयन्ते यथा 'स्वर्गकामो यजेत', 'अहरहः सन्ध्यामुपासीत', 'ओदनकामः पचेत' इत्यादीनि। लिङ्घटितवाक्यश्रवणे सति चिकीर्षाद्वारा प्रवृत्त्युदयात् प्रवर्तकचिकीर्षाजनकज्ञानविषयो लिङर्थो विधिः इति सिद्ध्यति। तदुक्तं[7] प्रवर्तकचिकीर्षायां यत्प्रकारकज्ञानस्य हेतुत्वं स तथा इति। चिकीर्षाजनकं च ज्ञानम् इष्टसाधनताज्ञानं, कृतिसाध्यताज्ञानं बलवदनिष्टाननुबन्धित्वज्ञानं च। अन्वयव्यतिरेकाभ्यां प्रवृत्तित्वावच्छिन्नेष्टसाधनत्वादि–ज्ञानत्वावच्छिन्नयोः कार्यकारणभावसत्त्वात्। '**प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते**' इति न्यायात् न कुर्यान्निष्फलं कर्म इति निषेधाच्च, निष्फले कर्मणि कृतिसाध्यत्वबलवदनिष्टाननुबन्धित्वयोः

सत्त्वेऽपि प्रवृत्त्यनुदयात् इष्टसाधनताज्ञानं प्रवृत्तिहेतु। चन्द्रमण्डलानयनादिकर्मणि प्रवृत्त्यनुदयात् कृतिसाध्यताज्ञानं प्रवर्तकम्। तत्र कृत्यसाध्यत्वसत्त्वेन कृतिसाध्यताज्ञानानुदयात् न प्रवृत्तिः। कृतिसाध्ये तृप्त्यात्मेष्टसाधने च मधुविषसम्पृक्तान्नभोजनादौ प्रवृत्त्यभावात् बलवद-निष्टाननुबन्धित्वज्ञानं प्रवृत्तिकारणम्। तथा च एतेषां त्रयाणामपि ज्ञानानां प्रवृत्तिहेतुत्वात् तद्विषयीभूतानाम् इष्टसाधनत्व–कृतिसाध्यत्व–बलवदनिष्टाननुबन्धित्वानां त्रयाणामपि विध्यर्थत्वमावश्यकम्। तथा च **'योऽर्थः यस्माच्छब्दाज्ज्ञायते स तस्यार्थः'** इति न्यायात् इष्टसाधनत्वादित्रिकं विध्यर्थकलिङ्प्रत्ययात् ज्ञायत इति तत्त्रयमपि लिङर्थः इति सिद्ध्यति।

यद्विधिवाक्यघटकविधिप्रत्ययघटितमास्ते तस्य प्रकृतत्वाच्चिन्तनमावश्यकमिति धिया तदेव चिन्त्यते। विधिप्रत्ययस्य च लट्, लोट्, लिङ्, तव्य–तव्यत्–अनीयर्–ण्यदादि-भेदादनेकविधत्वम्। यथा अग्निहोत्रं जुहोति, समिधमानय, यजेत, अध्येतव्यम्, हवनीयम्, ध्येयं धार्यमादि। विधिप्रत्ययस्यार्थो विधिरूपस्यार्थस्य बोधकः प्रत्ययः। स च विधिर्यज्ज्ञानेन नरो विविधकर्मसु प्रवर्तते। तदीयार्थविषये तत्तद्–दार्शनिकानां नानामतानि राजन्ते।

प्रस्तुते निबन्धे न्यायशास्त्रसम्मतं विध्यर्थविचारं समीक्ष्य महामहोपाध्यायविरचिते विधिस्वरूपविचारग्रन्थे व्युत्पत्तिवादग्रन्थे च प्रतिपादितं विध्यर्थविषयकं चिन्तनमिह प्राधान्येन निरूपितम्।

विधिस्वरूपविचारग्रन्थस्योपक्रमे भट्टाचार्यैर्विधिनिषेधार्थवादभेदेन वाक्यस्य त्रैविध्यमुपपादितम्। तथाहि '**विधिनिषेधार्थवादभेदेन वाक्यं त्रिविधम्**'[8] 'परन्तु सामान्यलक्षणज्ञानमन्तरा विशेषजिज्ञासानुदयात् कथमादौ विभागः प्रदर्शितः इति जिज्ञासायामित्थं वक्तुं शक्यते यद्विभागमुखेनापि लक्षणस्य निर्वचनसम्भवादादौ भट्टाचार्यैः विभागः प्रदर्शितस्तदनन्तरं विधेर्लक्षणं प्रदर्शितम्। तथा चोक्तम्– '**तत्र प्रवर्त्तकं वाक्यं विधिः।**'[9] तत्र प्रवर्त्तकं वाक्यं यदि विधिर्भवति तर्हि कथं तस्य लक्षणसमन्वयः इति जिज्ञासायां पुनः स्वयमुदाहरणमुखेन वदति यत्–

**'ओदनकामः पचेत, स्वर्गकामो यजेतेत्यादिलौकिकालौकिकवाक्यानां प्रवर्त्तककर्त्तव्यताज्ञानजननेन प्रवर्त्तकत्वाद् विधित्वम्।'** इति। अर्थात् '**ओदनकामः पचेत**' इति लौकिकप्रवर्त्तकविधिवाक्यवदलौकिकानामपि '**स्वर्गकामो यजेत**' इत्यादि-वेदवाक्यानां प्रवर्त्तकलिङादिज्ञानात् प्रवर्त्तकं यत् कर्त्तव्यताज्ञानं तज्जननेन तेषामपि विधिवाक्यत्वं सुस्थिरं भवति। तथा चैतद्वाक्यश्रवणानन्तरं पुरुषो वेदो वा जनमेतत् कर्म कर्तुं प्रवर्त्तयतीति बोधो जायते। ततश्च तस्मिन् कर्मणि प्रवृत्तिर्भवति जनानामिति दरीदृश्यते इति '**प्रवर्त्तकं**

**वाक्यं विधिः**' इति विधिलक्षणं सङ्गच्छते।

'**प्रवर्त्तकं वाक्यं विधिः**' इति विधेर्लक्षणं भट्टाचार्यैः यत्प्रतिपादितं तत्र मीमांसकैः तदुपरि स्वाभिप्रायः प्रकाश्यते यत् – विधिशब्दस्य विधिघटितवाक्ये प्रयोगदर्शनाद् यद्वाक्यं विधायकं चोदकं प्रेरकं प्रवर्त्तकं स विधिरित्यर्थो लभ्यते। तथा चोक्तं भट्टैः–

**चोदना चोपदेशश्च विधिश्चैकार्थवाचिनः।**[11]

प्राभाकरास्तु **प्रवर्त्तकवाक्यं चोदना।** तथा च **चोदनालक्षणोऽर्थो धर्मः**[12] इत्यादौ ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिवाक्यमित्याहुः।[13] **प्रवर्त्तकशब्दश्चोदना**[14], **चोदना कर्मोत्पत्तिवाक्यम्**[15] भाट्टास्तु प्रेरणा फलभावना। यथा स्वर्गकामो यजेतेत्यादौ लिङाद्यर्थाभिधारूपा चोदनेत्याहुः। चोदना च प्रवर्त्तना। प्रवृत्तिहेतुरित्यर्थः '**ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना**'[16] इत्यादाविष्टसाधनत्वज्ञानमिष्टसाधनं कर्म चैतज्ज्ञानाश्रयश्चेति त्रिविधा कर्मचोदना भवतीति श्रीधरव्याख्यादर्शनात्। यथा एकं वा **संयोगरूपचोदनाख्यविशेषात्**[17] इति सूत्रे पुरुष (कृतयागादि) प्रयत्नश्चोद्यत इतिशबरभाष्यप्रामाण्याच्च। तथा च मीमांसका अज्ञातार्थज्ञापको वेदभागो विधिः। स च तादृशप्रयोजनवदर्थं प्रमाणान्तरेणाप्राप्तं विधत्ते इति तेषामाशयः।

यथाऽग्निहोत्रं जुहुयात् स्वर्गकाम इत्यादिवाक्यं मानान्तरेणाप्राप्तं स्वर्गप्रयोजनवदग्निहोत्रनामकं होमं विधत्ते। अग्निहोत्रनामकेन होमेन स्वर्गं भावयेदिति वाक्यार्थबोध इति मीमांसकानामभिमतम्।

न्यायशास्त्रे तावन्नैयायिकाः इत्थं प्रवदन्ति- **इष्टसाधनताबोधकप्रत्ययसमभिव्याहृतवाक्यम्**,[18] **विध्यभिधायकप्रत्ययस्तद्घटितवाक्यं वा**[19] विधीयते विधिरूपशब्देन प्रतिपाद्यतेऽसौ विधिरिष्टसाधनत्वादिः। तस्याभिधायको वाचक इत्यर्थः। प्रत्ययश्चार्थविशेषाभिधायको लिङ्–लोट्–लेट्–तव्य–कृत्यप्रत्ययादिरूपः। तद्घटितं वाक्यमपि विधिशब्दार्थः।

तान्त्रिकाणां मते तु यजेतेत्यादिलिङादिघटितवाक्ये विधिशब्दप्रयोगदर्शनात्। न तु केवले प्रत्यय इत्यभिप्रायेणैव प्रवृत्तिपरस्य वाक्यस्य विधित्वम्। यजेत पचेतेत्यादिविधि–प्रत्ययघटितवाक्यादिष्टसाधनत्वोपस्थापनादोदनकामः पचेत स्वर्गकामो यजेतेत्यादि–लौकिकालौकिकवाक्याभ्यां यथाक्रमं पाक ओदनरूपेष्टसाधनं यागः स्वर्गरूपेष्टसाधनमित्यर्थो बोध्यते।

भट्टाचार्यनये तु प्रवर्त्तकज्ञानविषयो धर्मो विधिः। स च धर्मो न्यायसिद्धान्ते कृतिसाध्यत्वं

बलवदनिष्टाननुबन्धित्वमिष्टसाधनत्वञ्च। तदपि परस्परं विशेषणविशेष्यभावापन्नम्। तथा च कृतिसाध्यत्वे सति बलवदनिष्टाननुबन्धित्वे सति इष्टसाधनत्वमेव विधिरिति न्यायनये फलितं भवति। तथा च ओदनकामः पचेत स्वर्गकामो यजेतेत्यादावोदनस्वर्गादिरूपं यत्फलं तत्साधनत्वं पाकयागादिक्रियायां प्रतीयते इति भट्टाचार्याणामपि आशयो विद्यते।

'**प्रवर्त्तकं वाक्यं विधिः**' इति विधेर्लक्षणं स्वीक्रियते तर्हि '**तरति मृत्युं, तरति ब्रह्महत्याम्**' इत्यादि– अर्थवादवाक्यानामपि फलसाधनताबोधनेनैव प्रवर्तकत्वात् तत्र भवति अतिव्याप्तिः। तथा चोक्तम् –

'**अथ तरति मृत्युं तरति ब्रह्महत्यामित्याद्यर्थवादानामपि फलसाधनताबोधद्वारा प्रवर्त्तकतया तत्रातिप्रसङ्गः।**'[20] इति। तदतिव्याप्तेः परिहारार्थं कर्त्तव्यताबोधकवाक्यत्वं यदि स्वीक्रियते तर्हि तादृशकर्त्तव्यताबोधकवाक्यत्वरूपविधित्वमर्थवादवाक्ये नास्तीति नातिव्याप्तिरिति यद्युच्यते तर्हि 'पाकं कुर्वीत, यागं कुर्वीत' इति वाक्यानामसंग्रहापत्तिः। तथाहि –

'**न च कर्त्तव्यताबोधकवाक्यत्वं विधित्वं तच्च नार्थवादानामिति वाच्यम्।**'[21] इति। यतस्तत्र कृतिसाध्यत्वरूपकर्त्तव्यत्वं नैव प्रतीयते। धात्वर्थकृतौ कृतिसाध्यत्वस्य बाधात् लिङ्प्रत्ययेन तस्य बोधकत्वं नैव सम्भवति। एवञ्च '**पाकं कुर्वीत**' इत्यत्र धातुना कृतेः द्वितीयाविभक्त्या च साध्यत्वरूपकर्मत्वं प्रतीयते इति कृतिसाध्यताबोधकत्वं सूपपन्नमिति यदुच्यते तर्हि पाकं करोति यागं करोति इत्यादिवाक्यानामपि कृतिसाध्यताबोधकत्वात् तादृशार्थवादादिवाक्येऽतिव्याप्तिर्भवति, अतो भट्टाचार्यैः सिद्धान्तरूपेण विधेः स्वरूपं प्रतिपाद्यते– '**उच्यते, इष्टसाधनताबोधकवाक्यं विधिः। पाकं कुर्वीतेत्यादिवाक्यं च धात्वर्थकृताविष्टसाधनताबोधं पचेतेत्यादिवाक्यञ्च धात्वर्थपाकादौ तद्बोधकं, सर्वत्र विधिप्रत्ययस्येष्टसाधनताबोधकत्वात्।**'[22] इति। एतेन ज्ञायते यत् भट्टाचार्याणां मते न केवलं प्रवर्त्तकत्वं न वा इष्टसाधनत्वादिकं विध्यर्थोऽपितु बलवदनिष्टाननुबन्धित्वे सति कृतिसाध्यत्वे सति इष्टसाधनत्वं विध्यर्थः इति।

एवञ्च नैयायिकास्तु बलवदनिष्टाननुबन्धित्वमिष्टसाधनत्वं कृतिसाध्यत्वञ्च तत्तद्धात्वर्थगतं विध्यर्थ इति स्वीकुर्वन्ति। तथा चोक्तम् - **किन्तु प्रवर्तकचिकीर्षायां**[23] यत्प्रकारज्ञानस्य हेतुत्वं स तथा तादृशञ्च कृतिसाध्यत्वमिष्टसाधनत्वं बलवदनिष्टाननुबन्धित्वञ्च प्रत्येकमेव यागपाकादिधर्मिकतन्निश्चयादेव यागादिधर्मिकचिकीर्षोत्पत्त्या तत्र प्रवृत्तेः। एवञ्च यजेत पचेतेत्यादौ यागः कृतिसाध्य इष्टसाधनो बलवदनिष्टाननुबन्धी च इत्याकारको बोधः।

अयम्भावः लोके सर्वत्र चेतनस्य प्रवृत्तावुपर्युक्तं त्रयमप्यपेक्ष्यते। अन्यथेष्टसाधनत्व-

बलवदनिष्टाननुबन्धित्वयोस्सत्त्वेऽपि कृतिसाध्यत्वाज्ञानसुमेरुशृङ्गहरणादौ प्रवृत्तिर्न दृश्यते। विषसम्पृक्तमध्वन्नभक्षणादौ क्षुन्निवृत्तिरूपेष्टसाधनताज्ञानकृतिसाध्यताज्ञानयोस्सत्त्वेऽपि मरणसम्पादकत्वेन बलवदनिष्टाजनकत्वाभावेन तत्र पुरुषाणां प्रवृत्तिर्न दृश्यते। तथा निष्प्रयोजने जलताडनादौ बलवदनिष्टाजनकत्वकृतिसाध्यत्वयोर्ज्ञानेऽपि इष्टसाधनत्वाभावेन तत्र पुंसां प्रवृत्तिर्न दृश्यते, तस्माद्यत्र प्रवृत्तिर्दृश्यते तत्र उक्तत्रयं विदित्वैवेति त्रयाणामेव प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वेन विध्यर्थत्वं स्वीकरणीयम्। प्रतिपादितञ्चैतत् सर्वं शब्दशक्तिप्रकाशे पङ्गुः समुद्रं न तरेदित्यादौ नञादिना समुद्रतरणादेः पङ्गुप्रभृतिकृति-साध्यत्वनिषेधत्वनिषेधबोधानुरोधादवश्यं लिङर्थः। तृप्तिकामो जलं न ताडयेदित्यादौ तृप्तिकामेष्टसाधनत्वस्य न कलञ्जं भुञ्जीतेत्यादौ च कलञ्जभक्षणादेर्बलवदनिष्टाजनकत्वस्य निषेधानुपपत्त्या इष्टसाधनत्वादिकमपि इति।

व्युत्पत्तिवादेऽपि गदाधरेण त्रयाणां प्रवर्त्तकज्ञानविषयत्वं स्वीकृतम्। तथाहि – '**विधिः प्रवर्त्तकज्ञानविषयो धर्मः स च धर्मो न्यायनये कृतिसाध्यत्वं बलवदनिष्टाननु-बन्धित्वसहितमिष्टसाधनत्वञ्च।**'[24] एवञ्च कृतिसाध्यत्वबलवदनिष्टाननुबन्धित्व–इष्टसाधनत्वादि–त्रयाणामपि विध्यर्थत्वमित्यत्र नास्ति मतभेदः प्राचीननव्ययोः। किन्तु तत्र त्रिष्वर्थेषु पृथक् पृथक् शक्तिः अथवा त्रितयानुगतैकैव शक्तिरित्यत्र विवादो दृश्यते प्राचीननव्ययोः। तत्र बलवदनिष्टाजनकत्वादीनां त्रयाणां कस्य विशेष्यत्वं कस्य विशेषणत्वमित्यत्र विनिगमनाविरहात् त्रिष्वर्थेषु पृथगेव शक्तिः। एवञ्च पृथक्शक्तिस्वीकारेऽपि यथा सकृच्छ्रुतस्य पुष्पवन्तपदस्य युगपदेव सूर्यचन्द्ररूपानेकार्थबोधनम्, तथैव सकृच्छ्रुतस्य लिङादेरर्थत्रयबोधकत्वमुपपद्यते। अतः पृथगेव शक्तिरिति नवीनाः।

प्राचीनास्तु वाचकशब्दनिष्ठायाश्शक्तेर्वाच्यार्थनिरूपितायाश्च यथा वाचकानेककृतं नानात्वं तथैव वाच्यानेककृतमपि नानात्वं प्रसज्येत। अतः पुष्पवन्तावित्यादौ दिवाकरनिशाकरयोरिव अत्रापि त्रिष्वर्थेष्वेकशक्तिस्वीकारेऽपि न दोष इति प्रतिपादयन्ति।

**कृतिसाध्यत्वस्य लिङर्थत्वव्यवस्थापनम् -** कृत्यसाध्ये चन्द्रमण्डलानयनादौ प्रवर्तकत्वस्यावश्यकत्वेन, प्रवर्तकज्ञानविषयत्वेन कृतिसाध्यत्वस्य लिङर्थत्वं सिद्ध्यति। ननु कृतिसाध्यत्वप्रकारकं ज्ञानं न प्रवर्तकम् अपि तु साध्यतासम्बन्धेन कृतिप्रकारकज्ञानमेव। आख्यातशक्त्या उपस्थापितकृतेः साध्यतासम्बन्धेन पाकादौ अन्वयोपगमेन 'पचेत' इत्यादौ प्रवृत्त्युपपादनसम्भवात्। चन्द्रानयनादौ च साध्यतया कृतिविरहात् न प्रवृत्त्यापत्तिः। अतः कृतिसाध्यत्वं न लिङ्शक्यः इति चेन्न। सकलतिङ्साधारणाख्यातत्वं नास्त्येव अननुगतत्वात्। अतः लिङ्त्वादिकमेव शक्ततावच्छेदकं लिङ्त्वावच्छिन्नस्य च कृतिसाध्यत्वावच्छिन्ने एव

शक्तिः कल्प्यते गौरवस्याकिञ्चित्करत्वात्। 'यत्पदात् यादृशधर्मावच्छिन्नस्य नियतोपस्थितिः तादृशधर्मः एव तत्पदशक्यतावच्छेदकः' इति लिङा कृतिसाध्यत्वावच्छिन्नस्यैव नियतोपस्थितेः, प्रवर्तकज्ञानस्य च विधिप्रयोज्यत्वनियमनिर्वाहाय च कृतिसाध्यत्वावच्छिन्ने एव लिङ्त्वेन शक्तिकल्पनात्।

**कृत्यसाध्यताज्ञानाभावस्य प्रवर्तकत्वनिरासः -** कार्यसामान्यं प्रति प्रतिबन्धकाभावस्य हेतुत्वात्, प्रवृत्तिं प्रति कृत्यसाध्यताज्ञानस्य प्रतिबन्धकत्वेन तदभावस्यैव प्रवर्तकत्वमुचितम्, न तु कृतिसाध्यताज्ञानस्य, अतः कृतिसाध्यत्वं न लिङर्थः इति चेत् कृत्यसाध्यताज्ञानाभावत्वस्य कृतिसाध्यताज्ञानत्वापेक्षया गुरुधर्मत्वात्, सम्भवति लघौ गुरौ तदभावात्, तस्य प्रवर्तकतावच्छेदकत्वं न सम्भवति। अपि च जनकज्ञानविघटकज्ञानस्यैव प्रतिबन्धकत्वम् इत्यपि च नियमः नाम 'यत् यत् प्रतिबन्धकज्ञानं, तत् तज्जनकज्ञानविघटकं, यथा व्यभिचारज्ञानम् अनुमितिप्रतिबन्धकज्ञानम्' इति अनुमितिजनकव्याप्तिज्ञानविघटकम्। तथा प्रकृतेऽपि कृत्यसाध्यताज्ञानस्य चिकीर्षाप्रतिबन्धकत्वात् चिकीर्षाजनककृतिसाध्यताज्ञानविघटकत्वमिति कृतिसाध्यताज्ञानस्य चिकीर्षाद्वारा प्रवृत्तिहेतुत्वं सिद्ध्यति। यज्ज्ञानं संशयनिश्चयसाधारणज्ञानत्वेन यत्प्रतिबन्धकं तत् तज्जनकतद्विघटकम् इति उक्तनियमपरिष्करणात् बाधाद्यन्तर्भावेन न व्यभिचारः। बाधादेः अनुमितिं प्रति संशयनिश्चयसाधारणज्ञानत्वेनाप्रतिबन्धकत्वात्। कृत्यसाध्यताज्ञानं च संशयनिश्चयसाधारण्येन चिकीर्षां प्रति प्रतिबन्धकमिति तज्जनककृतिसाध्यताज्ञानविघटकमपि भवति।

**इष्टसाधनत्वस्य विध्यर्थत्वविचारः -** निष्फले जलताडनादौ इष्टसाधनताज्ञानानुदयात् न प्रेक्षावतां प्रवृत्तिर्जायते। अतः इष्टसाधनताज्ञानस्य प्रवर्तकत्वात् इष्टसाधनत्वस्य विध्यर्थत्वं सिध्यति। ननु इष्टसाधनत्वज्ञानस्य प्रवर्तकत्वे, 'अहरहः सन्ध्यामुपासीत' इति श्रुतिबोधिते नित्ये कर्मणि सन्ध्यावन्दनादौ प्रवृत्त्यनुत्पत्तिप्रसङ्गः। ततः इष्टानुत्पत्तेः इष्टसाधनत्वाभावात्। तथा च इष्टसाधनत्वज्ञानाभावेऽपि तत्र प्रवृत्त्युदयात् नेष्टसाधनताज्ञानं प्रवर्तकं, न वा इष्टसाधनत्वं विध्यर्थः, प्रवर्तकज्ञानविषयस्यैव विध्यर्थत्वात्। तत्र अर्थवादादिः ब्रह्मलोकावाप्तिः, प्रत्यवायाभावो वा फलमस्त्येवेति तस्य इष्टसाधनत्वम् अव्याहतमेव। तदुक्तम् –

**सन्ध्यामुपासते ये तु सततं संशितव्रताः।**
**विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनम्॥**[25]

ननु सन्ध्यावन्दनादेः इष्टसाधने तस्य काम्यकर्मत्वापत्त्या, नित्यकर्मत्वानुपपत्तिः। अपि च कामनाभावे अकरणापत्तिश्च स्यादिति तत्र फलश्रुतिः अर्थवादमात्रमेव इति चेन्न

सन्ध्यावन्दनादिनित्यकर्मणोऽपि काम्यत्वाङ्गीकारे न किञ्चिद्बाधकम्। नित्यत्वकाम्यत्वयोः अविरोधात्। यथा ग्रहणश्राद्धादौ नित्यत्व–नैमित्तिकत्वयोः, भरणिश्राद्धादौ च काम्यत्वनैमित्तिकत्वयोः सामानाधिकरण्ये अविरोधः। अतः तत्र तस्येष्टसाधनत्वग्रहात् प्रवृत्त्युपपत्तेः तद्विषयस्य विध्यर्थत्वं सम्भवत्येव।

यश्च लाघवात् साधनत्वमात्रं विध्यर्थः न तु तत्तत्फलान्तर्भावेन, तथा च 'स्वर्गकामो यजेत' इत्यादौ स्वर्गकामपदसमभिव्याहारबलात् स्वर्गादिफलसाधनत्वविषयकबोधो जायते इति केषाञ्चिदभिप्रायः सोऽपि न श्रद्धेयः। यतो हि पदादुपस्थापितस्यैवार्थस्य शाब्दबोधे पदार्थान्तरान्वययोग्यत्वं सम्भवति न तु तदनुपस्थापितस्यापि। पदादनुपस्थापितस्य स्वर्गाद्यर्थस्य विध्यर्थसाधनत्वेऽन्वयो न स्यात्। स्वर्गकामरूपसमासवृत्त्यैकदेशार्थस्य स्वर्गादेः विध्यर्थान्वये नाकाङ्क्षा सम्भवति। तदुक्तम् –

**प्रतियोगिपदादन्यद् यदन्यत् कारकादपि।**
**वृत्तिशब्दैकदेशस्य सम्बन्धस्तेन नेष्यते॥** इति।

अतः न साधनत्वमात्रं विध्यर्थः किन्तु इष्ट (फलविशेष) साधनत्वमेव।

**बलवदनिष्टाननुबन्धित्वस्य विध्यर्थत्वम् –** मधु-विष-सम्पृक्तान्नभोजनादौ अप्रवृत्त्यर्थं, यागादौ प्रवृत्त्यर्थं, 'न कलञ्जं भक्षयेत्' इत्यादौ निषेधवाक्यार्थोपपादनार्थं च बलवदनिष्टाननुबन्धित्वस्य विध्यर्थत्वमावश्यकम्। उपायविषयकेच्छां प्रति फलेच्छायाः अपि कारणत्वात् मधुविषसम्पृक्तान्नभोजनजन्ये मरणात्मकदुःखे उत्कटद्वेषसत्त्वेन तत्काले तादृशान्नभोजनजन्यतृप्तिरूपफले इच्छानुदयात् तत्र प्रवृत्त्यभावः इति वक्तुं न शक्यते, यतो हि एकत्र फले द्वेषसत्त्वकाले अपि फलान्तरे इच्छोत्पत्तौ बाधकाभावात्, मरणविषयकद्वेषसत्त्वेऽपि तृप्तिविषयकेच्छा जायत एव। तज्जन्ये[26] फल उत्कटरागदशायां च तज्जन्यदुःखरूपफलान्तरे उत्कटद्वेषदशायां च तज्जन्यसुखरूपफलान्तरे उत्कटरागे न किञ्चिद्बाधकम् इति। तथा च मधुविषसम्पृक्तान्नभोजने तृप्त्यात्मकफलेच्छायाः सम्भवेन प्रवृत्तिरेव स्यात्, अतः बलवदनिष्टाननुबन्धित्वज्ञानस्य प्रवर्तकत्वं तद्विषयस्य विध्यर्थत्वं चावश्यकम्।

**नञ्समभिव्याहारस्थले विध्यर्थः–**'न कलञ्जं भक्षयेत्' इत्यत्र 'कलञ्जकर्मक-भक्षणाभावः इष्टसाधनम्' इति वाक्यार्थस्वीकारे कलञ्जभक्षणे अनिष्ट-साधनत्वाज्ञानात् निवृत्त्यनुत्पत्तिप्रसङ्गः। प्रवृत्तिं प्रति इष्टसाधनताज्ञानस्येव निवृत्तिं प्रति अनिष्टसाधनताज्ञानस्य हेतुत्वात्। अतः बलवदनिष्टाननुबन्धित्वस्यापि विध्यर्थत्वं स्वीकृत्य तदन्वितनञर्थस्य धात्वर्थे भक्षणादौ अन्वयो वक्तव्यः, '**प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमौ**'[27] इति न्यायात्।

एवं च तादृशवाक्यात् कलञ्जकर्मकभक्षणं बलवदनिष्टाननुबन्धित्वाभाववत् इति निषेधवाक्यार्थः उपपद्यते।

ननु 'न कलञ्जं भक्षयेत्' इत्यत्र लिङर्थेष्टसाधनत्वस्य कृतिसाध्यत्वस्य चाभावो नञा धात्वर्थे बोधनीयः प्रतियोग्यभावान्वयौ च तुल्ययोगक्षेमौ इति न्यायात्। स चासम्भवः। कलञ्जभक्षणे प्रतियोगिनोरेव सत्त्वात् तदभावयोः बाधितत्वात् इति चेन्न, नञ्-समभिव्याहृत-लिङः इष्टसाधनत्वं कृतिसाध्यत्वं च नार्थः किन्तु बलवदनिष्टजनकत्वमात्रम्। तदभावो नञा धात्वर्थे बोध्यते। अथवा लाघवात् बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वे सति कृतिसाध्यत्वरूपविशिष्टविषयकज्ञानमेव प्रवर्तकमिति, तद्विषयकतादृशविशिष्टमेव विध्यर्थः। तदभावो नञा बोध्यते विशिष्टाभावश्च विशिष्टान्तर्गतान्यतमाभावादपि सम्भवति। प्रकृते च इष्टसाधनत्वकृतिसाध्यत्वोभयवति कलञ्जकर्मकभक्षणे तादृशविशिष्टाभावः बलवदनिष्टाननुबन्धित्वाभावप्रयुक्तः इति विशिष्टस्य विध्यर्थत्वं निर्वहति।

*

## सन्दर्भाः—


1. कारिकावली 81
2. न्यायसिद्धान्तमुक्तावली, शब्दखण्डः
3. कारिकावली 150-151
4. न्यायसूत्रम् 2.1.63
5. विश्वनाथवृत्तिः, न्यायसूत्रम् 2.1.63
6. शब्दशक्तिप्रकाशिका, कारिका 101
7. शब्दशक्तिप्रकाशिका, पृ.सं. 410
8. विधिस्वरूपविचारः, वाक्यविभागः, पृ.1
9. विधिस्वरूपविचारः, वाक्यविभागः, पृ.1
10. विधिस्वरूपविचारः, विध्यर्थः, पृ.3
11. तन्त्रवार्त्तिकम्, जैमिनिसूत्रम् 1.1.2
12. जैमिनिसूत्रम् 1.1.2
13. अर्थसंग्रहः, विधिप्रकरणम्

14. जैमिनिसूत्रवृत्तिः, जैमिनिसूत्रम् 1.10.2
15. जैमिनिसूत्रवृत्तिः, जैमिनिसूत्रम् 20.2.16
16. श्रीमद्भगवद्गीता 18.18
17. जैमिनिसूत्रम् 2.4.9
18. न्यायसूत्रवृत्तिः 2.1.63
19. विधिवादप्रकरणम्, न्यायमञ्जरी
20. विधिस्वरूपविचारः, विध्यर्थविचारः, पृ.3
21. विधिस्वरूपविचारः, विध्यर्थविचारः, पृ.3
22. विधिस्वरूपविचारः, विध्यर्थविचारः, पृ.5
23. शब्दशक्तिप्रकाशिका, पृ.410
24. व्युत्पत्तिवादः, पृ.346
25. व्युत्पत्तिवादः, पृ.85
26. शब्दशक्तिप्रकाशिका, पृ.414
27. व्युत्पत्तिवादः, पृ.308

*

# न्यायदर्शने प्रत्यक्षप्रमाणतत्त्वमीमांसा

**डॉ. गोबिन्ददासः**

प्र–उपसर्गपूर्वकात् मा–धातोः '**करणाधिकरणयोश्च**'[1] इत्यनेन सूत्रेण करणे ल्युट्–प्रत्यये विहिते सति तस्य अनादेशे णत्वे च प्रमाणशब्दस्य सिद्धिर्भवति। किं नाम प्रमाणमिति जिज्ञासायामुच्यते '**प्रमीयते अनेन तत्प्रमाणमि**'[2]ति व्युत्पत्त्या येन करणेन पदार्थानां यथार्थज्ञानं जायते तत्प्रमाणम्। इमामेव व्युत्पत्तिमाश्रित्य '**प्रमाकरणं प्रमाणमि**'[3]ति प्रमाणस्य सार्थकलक्षणं प्राप्यते। करणार्थकस्य ल्युट्-प्रत्ययान्तप्रमाणशब्दस्य प्रमाकरण-रूपोऽर्थः प्राप्यते। तत्र का नाम प्रमा यस्याः करणं प्रमाणमिति प्रश्नस्तु समुदेति। तस्मादेव नैयायिकैरुक्तं यथार्थानुभवः प्रमा इति। यथार्थश्च तद्वति तत्प्रकारकानुभवः, अनुभवश्च स्मृतिव्यतिरिक्तं ज्ञानमिति। पुनश्च किं पुनः करणमिति जिज्ञासायामुच्यते 'साधकतमं करणम्।' साधयतीति साधकम्, अतिशयितं साधकं साधकतमं प्रकृष्टं कारणमिति।[4] अत एव प्रमाणं भवति प्रमायाः करणम्। तद्धि साधनं, येन प्रमाता प्रमेयविषयस्य प्रमारूपं यथार्थज्ञानमधिगच्छति प्रमाणमित्युच्यते।

महर्षिगौतमोक्तौ '**प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्ताऽवयवतर्क-निर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्व-ज्ञानान्निःश्रेयसाधिगमः**'[5] इति प्रथमसूत्रे वर्णितेषु षोडशपदार्थेषु प्रथमप्रधानश्च पदार्थो भवति प्रमाणम्। नैयाकिकमतानुसारं तदेव प्रमाणं चतुर्विधम्। तथा चोक्तं गौतमेन– '**प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि**'[6] अर्थात् प्रत्यक्षम्, अनुमानम्, उपमानं शब्दश्चेति चत्वारि प्रमाणानि। न्यायशास्त्रे एभिरेव चतुर्भिः प्रमाणैः लौकिकालौकिकसकलव्यवहार-सिद्धौ, एतेभ्यो न्यूनानि अधिकानि वा प्रमाणानि न स्वीकृतानि। चरकसुश्रुत-संहिताद्यायुर्वेदग्रन्थेष्वपि एतानि चतुर्विधप्रमाणानि वर्णितानि सन्ति।[7]

सर्वेषु आस्तिकनास्तिकदर्शनसम्प्रदायेषु प्रत्यक्षस्य प्रामाण्यं प्राथम्यञ्च निःसंशयं स्वीकृतम्। अनुमानादिप्रमाणं सदैव प्रत्यक्षापेक्षितं भवति, परन्तु प्रत्यक्षप्रमाणम् अनुमानाद्यपेक्षितं न भवति, तेन कारणेन प्रत्यक्षप्रमाणस्य प्राधान्यं सूचितम्। 'प्रत्यक्ष' इति शब्दः प्रतिशब्देन

सह अक्षशब्दस्य सन्नियोगान्निष्पद्यते। तत्र 'प्रति' इतिशब्दस्यार्थः सामीप्यम् 'अक्ष' इति शब्दश्च इन्द्रियवाची। अतः इन्द्रियाणां सामीप्यं यत्तत् प्रत्यक्षमित्युच्यते। शब्दोऽयं प्रतिगतमक्षं प्रत्यक्षमिति व्युत्पत्त्यनुसारं तत्पुरुषसमासः। प्रधानतः प्रत्यक्षशब्दस्य प्रयोगः विषयीभूतपदार्थः प्रमा, प्रमाणञ्चेति त्रिविधार्थे दरीदृश्यते। तत्र 'प्रति-यं विषयं प्रतिगतमक्षं स प्रत्यक्षमि'ति व्युत्पत्त्यनुसारं प्रत्यक्षशब्देन प्रत्यक्षविषयीभूतपदार्थः अर्थात् प्रमेयवस्तु सूच्यते। 'प्रतिविषयं प्रति गतमक्षमिन्द्रियं यस्मै प्रयोजनाय तत्प्रत्यक्षमि'ति व्युत्पत्त्यनुसारं प्रत्यक्षशब्देन प्रत्यक्षज्ञानम् अर्थादिन्द्रियजन्यप्रमा बोध्यते। प्रत्यक्षप्रमा इत्यत्र प्रत्यक्षशब्दः फलत्वेन संज्ञात्वेन वा प्रयुज्यते। पुनश्च 'प्रति गतं विषयं प्रति गतं, विषयसन्निकृष्टमक्षं प्रत्यक्षमि'ति व्युत्पत्त्यनुसारं प्रत्यक्षशब्देन प्रत्यक्षप्रमाणम् अर्थात् प्रत्यक्षप्रमायाः करणमिति सूचितं भवति। प्रत्यक्षप्रमाणं प्रमाणविशेषणतया प्रयुज्यमानं भवति। न्यायदर्शने प्रत्यक्षप्रमा, तत्करणं तथा प्रमाणञ्चोभय-विधमपि अर्थे प्रत्यक्षशब्दस्य प्रयोगो भवति। अन्येषु प्रमाणेषु प्रमायाः तत्साधनस्य प्रमाणस्य च कृते पृथक् पृथक् शब्दानां प्रयोगो भवति। यथा अनुमानं प्रमाणमनुमितिः प्रमा, उपमानं प्रमाणमुपमितिः प्रमा, शब्दः प्रमाणं शाब्दी प्रमा इति। परन्तु प्रत्यक्षविषये प्रमायाः प्रमाणस्य च कृते एक एव प्रत्यक्षशब्दः प्रयुज्यते।

न्यायाचार्यैः प्रत्यक्षस्य लक्षणं नानाविधं निरूपितम्। आद्यतया महर्षिणा गौतमेन न्यायदर्शने प्रत्यक्षस्य लक्षणं कृतम् – '**इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षमि**'[8]ति। अत्र 'प्रत्यक्षं' लक्ष्यम्, 'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकमि'ति प्रथमोक्तपञ्चपदं लक्षणम्। इन्द्रियेण सह इन्द्रियग्राह्यविषयस्य सन्निकर्षाद्यदव्यपदेश्यम् (अशाब्दः), अव्यभिचारी (यथार्थः), व्यवसायात्मकं (निश्चयात्मकं) ज्ञानमुत्पद्यते तदेव प्रत्यक्षप्रमा। अस्याः प्रत्यक्षप्रमायाः यदेव करणं तदेव प्रत्यक्षप्रमाणम्। तदुक्तं भाष्यकारेण– '**इन्द्रियस्यार्थेन सन्निकर्षादुत्पद्यते यज्ज्ञानं तत् प्रत्यक्षमि**'[9]ति। अत्र प्रत्यक्षस्य कारणं किमिति आचार्यवक्तव्यस्य नोद्देश्यं, प्रत्यक्षस्य लक्षणमेव उद्देश्यमिति। अत्रैव प्रश्नः आगच्छतीति प्रत्यक्षप्रक्रियायामात्मा मनसा संयुज्यते, मन इन्द्रियेण संयुज्यते, इन्द्रियम् अर्थेन सह संयुज्यते तदनन्तरमात्मनि प्रत्यक्षज्ञानमुत्पद्यते। इन्दियाणि बाह्यपदार्थज्ञानं मनसे निवेदयन्ति, मनश्चात्मानं प्रत्यर्पयति, ततश्च प्रत्यक्षज्ञानं पूर्णतां याति। एवञ्चात्मनि प्रत्यक्षज्ञानोत्पत्तौ सम्बन्धत्रयं विद्यते। परन्तु प्रत्यक्षलक्षणसूत्रे आत्ममनस्संयोग–मनइन्द्रियसंयोगयोश्च वर्णनं नोपलभ्यते। तस्यैवोत्तररूपेणाह भाष्यकारः– '**यत्प्रत्यक्षज्ञानस्य विशिष्टकारणं तदुच्यते, यत्तु समानमनुमानादिज्ञानस्य न तन्निवर्त्तते**'[10]

इति अर्थात् प्रत्यक्षलक्षणे यदसाधारणं कारणं तदेव कथितं, परन्तु यदनुमानादि ज्ञानस्य समानं साधारणकारणं तथा जन्यमात्रस्य साधारणकारणं तदेव अनुक्तम्। प्रत्यक्षप्रक्रियाया-मात्मनो मनसा, मनस इन्द्रियेण इन्द्रियस्य च विषयेण सह सन्निकर्षेणात्मनि समवायेन ज्ञानमुत्पद्यते, अतश्च स्पष्टमिदं यत्प्रत्यक्षप्रक्रियायां मनसः महत्त्वं सातिशयमस्ति। मनसि अव्यवस्थिते सति प्रत्यक्षज्ञानोत्पत्तिर्बाध्यते। तथापि प्रत्यक्षलक्षणे मनसः अनुल्लेखस्य कारणमस्ति श्रोत्रादीन्द्रियेण सह मनसः धर्मभेद इति। चक्षुश्श्रोत्रत्वग्घ्राणरसना चेति पञ्च भौतिकानीन्द्रियाणि, सदैव सगुणानामिन्द्रियभावः, तानि नियतविषयाणि भवन्ति; परन्तु मन अभौतिकम्, सर्वविषयम्, नास्य सगुणस्य इन्द्रियभावोऽस्ति। पुनश्च मनोऽन्तरिन्द्रियम्, अन्यानि च बहिरिन्द्रियाणि। अतश्च प्रत्यक्षोत्पत्तये इन्द्रियमनसोर्योगो-ऽपरिहार्यः। प्रत्यक्षात्मकज्ञानस्य साधकतमं प्रमाणं न्यायशास्त्रे चक्षुश्श्रोत्रत्वग्घ्राणरसनामनांसि षडेतानीन्द्रियाणि ज्ञानसाधनानि भवन्ति। न्यायदर्शने प्रत्यक्षं प्रतीन्द्रियमनोयोगोल्लेखस्य मनोवैज्ञानिकं महत्त्वमस्ति। नान्येषु प्रमाणेषु एतादृशं महत्त्वं दृश्यते।

अस्याः प्रत्यक्षप्रमायाः करणं त्रिविधम्– कदाचिदिन्द्रियं, कदाचिदिन्द्रियार्थसन्नकर्षः, कदाचिद् ज्ञानमिति। यदा इन्द्रियार्थसन्निकर्षेण नामजात्यादियोजनाहीनं वस्तुमात्रावगाहि किञ्चिदिदमिति निर्विकल्पकं ज्ञानमुत्पद्यते तदा इन्द्रियं करणम्, इन्द्रियार्थसन्नकर्षः अवान्तरव्यापारः निर्विकल्पकं ज्ञानञ्च फलं भवतीति। पुनश्च यदा निर्विकल्पकज्ञानादनन्तरं रामोऽयमित्यादीनां नामजात्यादियोजनात्मकं सविकल्पकं ज्ञानमुत्पद्यते तदा इन्द्रियार्थसन्निकर्षः करणं, निर्विकल्पकं ज्ञानम् अवान्तरव्यापारः सविकल्पकञ्च फलं भवतीति। एवञ्च यदा सविकल्पकज्ञानाद् अनन्तरं ग्रहणेच्छाबुद्धिः त्यागेच्छाबुद्धिः उपेक्षाबुद्धिश्च जायन्ते तदा निर्विकल्पकं ज्ञानं करणं, सविकल्पकं ज्ञानमवान्तरव्यापारः ग्रहणेच्छा–त्यागेच्छा–उपेक्षाबुद्धिश्च फलं भवतीति प्राचीननैयायिकानां सिद्धान्तः। परन्तु नवीननैयायिकानां विचारे इन्द्रियं सदैव प्रत्यक्षप्रमायाः करणं भवति।[12]

प्राचीननैयायिकानां सिद्धान्ते प्रत्यक्षप्रमायाः करणं त्रिविधम् –

| करणम् | अवान्तरव्यापारः | फलं प्रमा वा |
|---|---|---|
| 1. इन्द्रियः | इन्द्रियार्थसन्निकर्षः | निर्विकल्पकज्ञानम् |
| 2. इन्द्रियार्थसन्निकर्षः | निर्विकल्पकज्ञानम् | सविकल्पकज्ञानम् |
| 3. निर्विकल्पकज्ञानम् | सविकल्पकज्ञानम् | ग्रहणेच्छा-त्यागेच्छा-उपेक्षाबुद्धयः |

परन्तु नव्यनैयायिकानां सिद्धान्ते प्रत्यक्षप्रमायाः करणमेकमेव, तद्यथा–

| करणम् | अवान्तरव्यापारः | फलं प्रमा वा |
|---|---|---|
| 1. इन्द्रियम् | इन्द्रियार्थसन्निकर्षः | निर्विकल्पकज्ञानम् |
| 2. इन्द्रियम् | इन्द्रियार्थसन्निकर्षः निर्विकल्पकज्ञानञ्च | सविकल्पकज्ञानम् |
| 3. इन्द्रियम् | इन्द्रियार्थसन्निकर्षः निर्विकल्पकज्ञानं सविकल्पकज्ञानञ्च | ग्रहणेच्छा-त्यागेच्छा-उपेक्षाबुद्धयः |

इन्द्रियस्य चक्षुराद्यर्थेन घटादिना विषयेण सह संयोगादिषड्विधसन्निकर्षादुत्पन्नं यदव्यपदेश्यमव्यभिचारि, व्यवसायात्मकं ज्ञानं तत्प्रत्यक्षमिति। उद्द्योतकारेण लक्षणोक्तप्रति-पदस्य सार्थकतानिरूपणं कृत्वा उक्तम्– '**समस्तमित्याह–यस्मादेकशोऽनुमान–सुख–शाब्द–विपर्य्यय– संशयज्ञानानि निवर्त्त्यन्त**'[13] इति। अर्थात् प्रत्यक्षलक्षणोक्तं पञ्चपदेन यथाक्रममनुमानं, सुखं, शब्दज्ञानं, विपर्ययरूपभ्रान्तप्रत्यक्षं, संशयात्मकप्रत्यक्षञ्च निवारितं भवति। तेन लक्षणे अव्याप्त्यादिदोषोऽपि निवारितो भवति। वाचस्पतिमिश्रः गौतमोक्तप्रत्यक्षलक्षणे 'यतः' पदस्य अध्याहारं कृत्वा प्रत्यक्षप्रमाणस्य लक्षणमुक्तम्– '**इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं यतः तत् प्रत्यक्षमि**'[14]ति।

इन्द्रियेण सह इन्द्रियग्राह्यविषयस्य यः सम्बन्धः प्रत्यक्षजनकः स एव इन्द्रियार्थसन्निकर्षः। प्रत्यक्षलक्षणे 'इन्द्रियार्थसन्निकर्षः इति पदसंयोजनेन अनुमानादौ अतिव्याप्तिदोषः दूरीभूतो भवति। एवञ्च प्रायशो नैयायिकाः इन्द्रियार्थसन्निकर्षमेव प्रत्यक्षज्ञानमाहुः, परन्तु '**पश्यत्यचक्षुः स शृणोत्यकर्णः**' इति श्रुत्यनुसारम् ईश्वरस्य प्रत्यक्षं कदापि इन्द्रियार्थसन्निकर्षजन्यं न भवति। तत्र ईश्वरस्य प्रत्यक्षे अव्याप्तेः आशङ्का आगच्छति। तद्वारणाय गङ्गेशोपाध्यायेन कथितं '**ज्ञानाकरणकं ज्ञानत्वं प्रत्यक्षमि**'[15]ति, अर्थात् अकरणं ज्ञानं प्रत्यक्षम्। प्रत्यक्षज्ञानं न हि ज्ञानान्तरजन्यं भवति। एतच्च लक्षणं लौकिकालौकिकजन्यप्रत्यक्षेण सहैव नित्ये ईश्वरप्रत्यक्षेऽपि सङ्घटते। परमेतल्लक्षणमपि न सर्वथा दोषशून्यमस्ति। निर्विकल्पकज्ञानकरणेन सविकल्पकं ज्ञानं जायते, तेन सविकल्पकज्ञाने-ऽव्याप्तेः आशङ्काऽऽगच्छति। अत्रैव न्यायबोधिनीकारेणोक्तं '**च समाहितमि**'[16]ति। तस्मात्पूर्वोक्तमेव लक्षणं तु जन्यप्रत्यक्षस्य लक्षणम्, अजन्यस्येश्वरस्य प्रत्यक्षनित्यत्वादव्याप्तिः नागच्छतीति।

विषयेण सह इन्द्रियस्य सन्निकर्षेण सुखं दुःखञ्चोत्पद्यते। परन्तु सुखं दुःखञ्च न ज्ञानपदार्थः। अतः लक्षणे अतिव्याप्तेः आशङ्कागच्छति। तदुक्तं महर्षिणा गौतमेन द्वितीयपदं

'**ज्ञानमि**'ति। यद्यपि '**व्यवसायात्मकम्**' इति पदेन सुखदुःखादेः व्यवच्छेदो भवति, परन्तु व्यवसायात्मकपदं विशेषणबोधकमस्ति। वाक्ये विशेषणबोधकपदस्य अर्थबोधाय अवश्यमेव विशेष्यपदस्यावश्यकता वर्तते। तदर्थं सूत्रे '**ज्ञानमि**'ति पदं सन्निविष्टम्।[17]

भाष्यकारवात्स्यायनेन न्यायसूत्रोक्तप्रत्यक्षलक्षणे विद्यमानस्य 'अव्यपदेश्यमि'ति पदस्य सार्थकतां प्रदर्शयति। तत्र जगति प्रत्येकपदार्थानां वाचकः शब्दोऽस्ति। शब्देन सह अर्थस्य प्रतीतिवशाद् लोकव्यवहारः प्रचलति। रूपादिविषयेण सहेन्द्रियस्य सन्निकर्षजन्यं यद्रूपादि ज्ञानं भवति तदेव रूपनामधेयेन परिचितमिति। यथा– रूपनामधेयस्य ज्ञानं 'रूपमिति जानीते' इत्युक्तम्। एवंप्रकारेण सर्वत्र एव ज्ञानस्य विषयः रूपादिवाचकशब्देन व्यवदिश्यते। अतः सर्वं ज्ञानं शब्दजन्यमिति। तदर्थं शाब्दज्ञानं स्वीकरणीयमिति पूर्वपक्षस्याभिमतम्। सूत्रकारेण पूर्वपक्षस्य निराकरणार्थं सूत्रे '**अव्यपदेश्यमि**'ति पदं सन्निविष्टम्। ज्ञानकाले नामरूपादिसंज्ञाशब्दः व्यपारविशिष्टः न भवति परन्तु व्यवहारकाले नामरूपादिसंज्ञाशब्दः व्यापारविशिष्टो भवति। अत एव इन्द्रियार्थसन्निकर्षोत्पन्नं नामरूपाद्यर्थज्ञानं नैव शाब्दं न च शब्दजन्यमिति। एवंप्रकारेण शाब्दज्ञाने अतिव्याप्तेः शङ्का निवारिता भवति।[18]

ग्रीष्मकाले मरुभूमौ यदा पार्थिवोष्मणा सह स्पन्दमानो रविकिरणः भ्रमतो मानवस्य चक्षुषा सह सन्निकृष्टो भवति तदा उदकज्ञानमुत्पद्यते। एवं रज्जौ सर्पं, शुक्तौ रजतमिति जायमानं भ्रमज्ञानमपि इन्द्रियसन्निकर्षोत्पन्नम्। एवंविधमुदकादिज्ञानं सदैव इन्द्रियार्थ-सन्निकर्षोत्पन्नम् अव्यपदेश्यं व्यवसायात्मकं भूतमपि व्यभिचारि भ्रमात्मकं वा भवति। एतेषां भ्रमज्ञानानां स्थले अतिव्याप्तेः सम्भावनागच्छति, तद्वारणाय सूत्रे अव्यभिचारीत्युक्तम्। व्यभिचारपदार्थोऽत्र भ्रमः। अव्यभिचारि = भ्रमभिन्नमिति। तथा च इन्द्रियार्थसन्निकर्षोत्पन्नं भ्रमभिन्नं ज्ञानं प्रत्यक्षम्।[19]

कोऽपि मानवः दूराच्चक्षुषा किमपि द्रव्यं पश्यन् अयं 'धूम इति' वा 'रेणु इति' अवधारयति। इदं तु संशयात्मकं ज्ञानम्। संशयात्मकमिदं ज्ञानमिन्द्रियार्थसन्निकर्षोत्पन्नम् अव्यपदेश्यम् अव्यभिचारि भवति। फलतः संशयात्मकज्ञानेऽतिव्याप्तेः आशङ्कागच्छति। तत्र महर्षिणा गौतमेन संशयात्मकप्रत्यक्षस्य निवारणाय सूत्रे '**व्यवसायात्मकमि**'ति पदं सन्निविष्टम्। व्यवसायात्मकपदस्य अर्थः निश्चयात्मकः इति। संशयात्मकज्ञानं कदापि निश्चयात्मकं न भवति। एवं गौतमप्रत्यक्षलक्षणे विद्यमानानां सर्वेषां पदानां सार्थकता प्रतिपादिताऽस्ति।

प्रत्यक्षं सामान्येन निर्विकल्पकं सविकल्पकञ्चेति द्विविधम्। तत्र विकल्पेभ्यो विशेषणेभ्यो निर्मुक्तं निर्विकल्पं, निर्विकल्पमेव निर्विकल्पकमिति व्युत्पत्त्यनुसारं नामजात्यादिकल्पनारहितं

वैशिष्ट्यानवगाहि निष्प्रकारकज्ञानं निर्विकल्पकम्। यथा– 'अयं घटः' इति व्यपदेशः, शब्दव्यवहारः वा। तस्य अयोग्यमव्यपदेश्यं निर्विकल्पकमिति। यथा किञ्चिदिदमिति। विकल्प्यते विशिष्यते वस्तु येन स विकल्पः विशेषणं, तेन सहितं सविकल्पं, सविकल्पमेव सविकल्पकमिति व्युत्पत्त्यनुसारं नामजात्यादिविशेषणविशेष्यसम्बन्धावगाहि ज्ञानं सविकल्पकम्। व्यवसायः 'अयं घटः, ब्राह्मणोऽयम्' इत्यादिविशिष्टव्यवहारविषयकं सविकल्पकमित्यर्थः। प्रायशश्चास्माकं लौकिकव्यवहारमात्रमूलं ज्ञानं सविकल्पकं भवति, अतश्च निर्विकल्पकज्ञानं कल्पयितुं न समर्थो भवति लोकः। अत एव निर्विकल्पकज्ञानं बालमूकादिज्ञानोपमम् अप्रकाशयोग्यज्ञानं वर्ण्यते। प्रथमतस्तु वस्तुनः अर्थग्रहणसमये प्रौढजनस्यापि बालकवदेव नामजात्यादिकल्पनारहितमेव ज्ञानं भवति, अनन्तरम् 'एकसम्बन्धिज्ञानमपरसम्बन्धिनं स्मारयति' इति न्यायेन पदार्थस्वरूपे ज्ञाने नामजात्यादिविशेषणविशेष्यसम्बन्धावगाहि ज्ञानं तस्य प्रौढजनस्य भवतीति। तत्र निर्विकल्पकज्ञानमधिकृत्य न्यायदर्शने प्राचीनानां नवीनानाञ्च मध्ये किञ्चिन्मतान्तरताऽपि लक्ष्यते। प्राचीननैयायिकाः निर्विकल्पकज्ञानमेव मन्यन्ते। परन्तु नव्यन्याये विषयेऽस्मिन् मतद्वयं सञ्जातम्। तत्र विश्वनाथपञ्चाननेन भ्रमभिन्नं ज्ञानं प्रमा इत्याह। अतश्च भ्रमभिन्नस्य निर्विकल्पकज्ञानस्य प्रमात्वं तेनेष्टम्।[20] परन्तु गङ्गेशोपाध्यायेन निर्विकल्पकज्ञानं न प्रमा नापि अप्रमा इत्यभिमतं प्रदत्तम्। तस्य मते नामजात्यादिविशेषण-विशेष्यसम्बन्धावगाहि ज्ञानमेव प्रमा अप्रमा वा भवति। निर्विकल्पकज्ञानं तु नामजात्यादिकल्पनारहितं निष्प्रकारकतया प्रमा अप्रमा वा उभयकोटिविलक्षणं भवतीति।[21]

न्यायमते पुनश्च सविकल्पकप्रत्यक्षमपि लौकिकालौकिकभेदेन द्विविधम्। तत्र लौकिकपुरुषाणाम् इन्द्रियसन्निकर्षादिकारणसामग्रीजन्यं प्रत्यक्षं लौकिकम्। तत्रैव इन्द्रियार्थयोः यः सन्निकर्षः साक्षात्कारिप्रत्यक्षज्ञानहेतुः सः षड्विधः, तद्यथा– संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेष्यविशेषणभावः विशेषणविशेष्यभावो वेति। तथा चोक्तं विश्वनाथपञ्चाननभट्टाचार्येण –

**विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः।**
**द्रव्यग्रहस्तु संयोगात् संयुक्तसमवायतः॥**
**द्रव्येषु समवेतानां तथा तत्समवायतः।**
**तत्रापि समवेतानां शब्दस्य समवायतः॥**
**तद्वृत्तीनां समवेतसमवायेन तु ग्रहः।**
**प्रत्यक्षं समवायस्य विशेषणतया भवेत्।**
**विशेषणतया तद्वदभावानां ग्रहो भवेत्॥**[22]

यदा चक्षुषा घटविषयकं ज्ञानमुत्पद्यते, तदा चक्षुरिन्द्रियम्, घटश्च अर्थः। तयोः सन्निकर्षः संयोगो भवति। पुनश्च यदा चक्षुरादिना घटगतरूपादिकं गृह्यते घटे श्यामं रूपमस्तीति, तदा चक्षुरिन्द्रियं घटरूपश्च अर्थः। तयोः सन्निकर्षः संयुक्तसमवायो भवति। कदा पुनः संयुक्तसमवेतसमवायः सन्निकर्षः इति चेदुच्यते यदा चक्षुषा घटरूपसमवेतं रूपत्वादिसामान्यं गृह्यते, तदा चक्षुरिन्द्रियं, रूपत्वादिसामान्यञ्च अर्थः। तयोः सन्निकर्षः संयुक्तसमवेतसमवायः इति। यदा श्रोत्रेन्द्रियेण शब्दो गृह्यते तदा श्रोत्रमिन्द्रियं, शब्दश्च अर्थः। तयोः सन्निकर्षः समवायो भवति। पुनश्च यदा पुनः शब्दसमवेतं शब्दत्वादिसामान्यं श्रोत्रेन्द्रियेण गृह्यते, तदा श्रोत्रमिन्द्रियं शब्दत्वादिसामान्यञ्च अर्थः। तयोः सन्निकर्षः समवेतसमवायः इति। कदा पुनः विशेषणविशेष्यभावः सन्निकर्षः इति चेदुच्यते यदा चक्षुषा संयुक्ते भूतले घटाभावो गृह्यते 'इह भूतले घटो नास्ति' इति, तदा विशेषणविशेष्यभावः सन्निकर्षो भवति। तत्रैव चक्षुःसंयुक्तस्य भूतलस्य घटाद्यभावो विशेषणं, भूतलं विशेष्यम्।[23] एवं षड्विधसन्निकर्षजन्यं ज्ञानं लौकिकप्रत्यक्षमिति। तत्र पुनः लौकिकप्रत्यक्षमपि बाह्याभ्यन्तरभेदेन द्विविधम्। बाह्येन्द्रियजन्यं प्रत्यक्षं बाह्यप्रत्यक्षमिति। अन्तरिन्द्रियजन्यं प्रत्यक्षम् आन्तरप्रत्यक्षञ्चेति। तत्र बाह्यप्रत्यक्षमपि पञ्चविधेभ्यः चक्षुश्रोत्रत्वग्घ्राणरसनाबाह्येन्द्रियेभ्यो जन्यत्वात्पञ्चविधम्। आभ्यन्तरन्तु मनोमात्रजन्यत्वादेकविधमेव। इत्थं लैकिकप्रत्यक्षं भवति षड्विधम्।

अलौकिकसन्निकर्षजन्यं प्रत्यक्षम् अलौकिकप्रत्यक्षमिति। ते च त्रिविधाः। तथा चोक्तं विश्वनाथपञ्चाननेन–

**अलौकिकस्तु व्यापारः त्रिविधः परिकीर्तितः।**
**सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा॥**[24]

सामान्यलक्षणः, ज्ञानलक्षणः योगजश्चेति अलौकिकसन्निकर्षः त्रिविधः। समानानां भावः सामान्यं, तल्लक्षणं यस्य तत्सामान्यलक्षणम्। अत्र सामान्यशब्दोऽयं साधारणधर्मः जातिधर्मः वा, लक्षणशब्दश्च स्वरूपं विषयो वा इत्यभिधीयते। तथा च यत्र इन्द्रियसंयुक्तं धूमादि तद्विशेष्यकं 'धूमः इति ज्ञानम्। तत्र ज्ञाने प्रकारीभूतं धूमत्वम् तेन सन्निकर्षेण सकलधूमविषयकं ज्ञानं जायते इत्यत्र सामान्यलक्षणः सन्निकर्षः। यत्र कस्मिंश्चिद्विषये इन्द्रियसन्निकर्षेण ज्ञाते तद्गतगुणानाम् इन्द्रियसन्निकर्षमन्तरेणापि आत्मस्थज्ञानलक्षणसन्निकर्षेण अलौकिकं ज्ञानं प्राप्यते तदा ज्ञानलक्षणसन्निकर्षो भवति। तथा च सुरभिचन्दनमिति ज्ञाने सौरभस्य भानं न स्यात्। चक्षुषः चन्दनेन सन्निकर्षस्य सत्त्वेऽपि सौरभेण सन्निकर्षाभावात्। एवं सौरभांशे चक्षुषः अलौकिकसन्निकर्षः चन्दनांशे बोध्यमिति ज्ञानलक्षणसन्निकर्षेण

सम्भवति। अलौलिकसन्निकर्षस्य तृतीयो भेदोऽस्ति योगजसन्निकर्षः। यदा योगिनो यौगिकसामर्थ्यबलेन इन्द्रियसन्निकर्षमन्तरेणापि साक्षात्कारि ज्ञानं लभ्यन्ते तदा योगजसन्निकर्ष एव कारणम्। योगजसन्निकर्षः युक्तयुञ्जानभेदेन द्विविधः। तथा चोक्तम्–

**योगजो द्विविधो प्रोक्तः युक्तयुञ्जानभेदतः।**
**युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपरः॥**[25]

युक्तस्य तावद्योगजधर्मसहायेन मनसा आकाशपरमाण्वादिनिखिलपदार्थगोचरं ज्ञानं सर्वदैव भवितुमर्हति। सैव पूर्णयौगिकशक्तिसम्पन्नः पुरुषः, येन सदा सर्वप्रकारकं ज्ञानं स्वत एव प्राप्यमाणं भवति। द्वितीयस्य युञ्जानस्य चिन्ताविशेषोऽपि सहकारीति सिद्धम्। सैव आंशिकयौगिकसिद्धिसम्पन्नः पुरुषो भवति।

*

**सन्दर्भाः**


1. अष्टाध्यायी 3.3.117
2. न्यायबिन्दुः, प्रत्यक्षप्रकरणम्
3. तर्कभाषा, प्रमाणपरिच्छेदः
4. तदेव
ऽ. न्यायसूत्रम् 1.1.1
6. तत्रैव 1.1.3
7. चरकसंहिता, सूत्रस्थानम् 41
8. न्यायसूत्रम् 1.1.4
9. तत्रैव 1.1.4 वात्स्यायनभाष्यम्
10. तदेव
11. तदेव
12. तर्कभाषा, प्रत्यक्षपरिच्छेदः
13. न्यायवार्तिकः प्रत्यक्षपरिच्छेदः

14. न्यायवार्तिकतात्पर्यटीका, प्रत्यक्षपरिच्छेदः
15. तत्त्वचिन्तामणिः, प्रत्यक्षपरिच्छेदः
16. न्यायबोधिनी, प्रत्यक्षप्रकरणम्
17. न्यायसूत्रम् 1.1.4 वात्स्यायनभाष्यम्
18. तदेव
19. तदेव
20. कारिकावली, निर्विकल्पकज्ञाननिरूपणम्
21. सिद्धान्तमुक्तावली, प्रत्यक्षखण्डः
22. कारिकावली 59–62
23. तर्कभाषा, प्रत्यक्षपरिच्छेदः
24. कारिकावली 63
25. तत्रैव 65–66

*

# किञ्चित् पारिभाषिकम्

काशिकावृत्तौ अष्टाध्यायीगतानां सूत्राणां शब्दाः यथा परिभाषिताः तथा सूत्र-तत्संख्योल्लेखपुरःसरम् अध्यायक्रमेणात्र संगृह्यन्ते।

| | |
|---|---|
| २८. सूपेशाणः | कारविशेषस्य संज्ञाः एताः। |
| दृषदिमाषकः | |
| हलेद्विपदिका | |
| हलेत्रिपदिका | का. कारनाम्नि च प्राचां हलादौ ६.३.१० |
| २९. भाषितपुंस्कः | भाषितः पुमान् येन समानायामाकृतावेकस्मिन् प्रवृत्तिनिमित्ते स भाषितपुंस्कः शब्दः। |
| | का. स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ६.३.३४ |
| ३०. नभ्राट् | न भ्राजत इति नभ्राट्। |
| नपात् | न पातीति नपात्। |
| नवेदाः | न वेत्तीति नवेदाः। |
| नासत्याः | सत्सु साधवः सत्याः, न सत्या असत्याः, न असत्याः नासत्याः। |
| नमुचिः | न मुञ्चतीति नमुचिः। |
| नकुलः | नास्य कुलमस्ति = नकुलः। |
| नखम् | नास्य खमस्तीति नखम्। |
| नपुंसकम् | न स्त्री न पुमान्नपुंसकम्। |
| नक्षत्रम् | न क्षरति क्षीयते इति वा नक्षत्रम्। |
| नक्रः | न क्रामतीति नक्रः। |
| ३१. नाकम् | नास्मिन्नकमिति नाकम्। |
| | का. नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसक-नक्षत्रनक्रनाकेषु प्रकृत्या ६.३.७५ |
| ३२. नगाः | न गच्छन्तीति नगाः |
| | का. नगोऽप्राणिष्वन्यतरस्याम् ६.३.७७ |

# भामहोपेक्षितानां शब्दशास्त्रीयसिद्धान्तानां समीक्षात्मकमध्ययनम्

**डॉ. मृत्युञ्जय गराँइ**

**प्रस्तावना**

भारतीयकाव्यशास्त्रपरम्परा प्राचीनकालादारभ्य साम्प्रतिककालं यावत् प्रवहणशीला विराजते संस्कृतभाषायाम्। अस्यां सुदीर्घपरम्परायां तावत् बहूनां ख्याताख्यातानामालङ्कारिकाणामवदानं परिदृश्यते। तत्र बहुषु समुपलभ्यमानेष्वपि भामहस्य स्थानमनवद्यमिति मन्यते विपश्चिद्भिः। काव्यालङ्कारो नाम सम्प्रत्येक एव ग्रन्थो लभ्यते भामहस्य। अयं ग्रन्थो हि भरतादनन्तरमलङ्कारशास्त्रस्य सर्वमान्यो ग्रन्थः। समग्रग्रन्थः षट्सु परिच्छेदेषु विभक्तोऽस्ति। तत्र प्रथमे काव्यशरीरनिर्णयः, द्वितीयेऽलङ्कृतिविवेकः, तृतीये विशिष्टालङ्कृतिविचारः, चतुर्थे दोषनिर्णयः, पञ्चमे न्यायविचारः, अन्तिमे तु शब्दशुद्धिविवेकश्चेति विषयाः प्रतिपादिताः। अत्र प्रायशः चतुःशतश्लोकाः परिदृश्यन्ते। तथोक्तं भामहेन काव्यालङ्कारे–

**षष्ट्या शरीरं निर्णीतं शतषष्ट्या त्वलंकृतिः।**
**पञ्चाशता दोषदृष्टिः सप्तत्या न्यायनिर्णयः॥**
**षष्ट्या शब्दस्य शुद्धिः स्यादित्येवं वस्तुपञ्चकम्।**
**उक्तं षड्भिः परिच्छेदैर्भामहेन क्रमेण वः॥**[1]

शब्दयुगलस्य काव्यत्वं, काव्यहेतुत्वम्, वक्रोक्तेः सकलालङ्कारमूलत्वम् इत्यादयः प्रमुखविषयाः ग्रन्थस्यास्य विशिष्टकाव्यसिद्धान्ताः। काव्ये सुचारुशब्दप्रयोगस्तावत् सदाऽभिप्रेतः। सुनिश्चितशब्दचयनैरेव काव्यशरीरस्य विनिर्माणं भवतीति मतं सर्वमान्यम्। अत एव काव्यनिर्माणाय साधुशब्दज्ञानं तु अपरिहार्यम्। काव्ये कस्तावत् शब्दः प्रयोक्तव्यः को वा परिहरणीय इत्येवं संशयः सदा वर्तते। व्याकरणशास्त्रात्तु संशयोऽयं दूरीभवति। व्याकरणार्णवं नापारयित्वा शब्दरत्नप्राप्तिरपि सुदुर्लभा। यथोक्तं भामहाचार्येण–

**नापारयित्वा दुर्गाधममुं व्याकरणार्णवम्।**

**शब्दरत्नं स्वयं गम्यमलङ्कर्तुमयं जनः॥** (काव्यालङ्कारः, 6.3)

तस्मात् ग्रन्थस्यान्तिमे परिच्छेदे शब्दशुद्धिः प्रतिपादिता ग्रन्थकारेण। पाणिनीय-व्याकरणसम्प्रदायमाश्रित्य एवमालोचना विकसिता। सामान्यतया काव्ये प्रयोज्याप्रयोज्य-शब्दानामेवालोचनमत्र विवेचितम्। किञ्च, कदाचित् कुत्रचित् शब्दशास्त्रस्य गम्भीरदार्शनिक-विवेचनमपि परिलक्षितमत्र। तथापि क्वचित् कुत्रापि शब्दशास्त्रीयसिद्धान्तानामुपेक्षाऽपि दृश्यतेऽत्र। स्फोटसिद्धान्त–ज्ञापकविधि–शिष्टप्रयोग–योगविभागेष्वेवमुपेक्षणीयता सुस्पष्टरूपेण प्रकटिता। शब्दशास्त्रीयदृष्ट्या एवमुपेक्षित–सिद्धान्तानामुपरि विश्लेषणात्मिकाऽलोचना प्रदीयतेऽस्मिन् प्रबन्धे।

**1. स्फोटसिद्धान्तः**

काव्यालङ्कारस्य 'शब्दशुद्धिः' नाम्नि षष्ठपरिच्छेदे शब्दस्वरूपालोचनावसरे तावत् स्फोटतत्त्वस्य दार्शनिकविवेचनं प्रस्तूयते भामहाचार्येण। नैयायिकनये परमाणोरिव, वेदान्तिनये ब्रह्मण इव च शाब्दिकसिद्धान्ते स्फोटस्य महिमा विद्यते। परन्तु काव्यालङ्कारेऽयं स्फोटस्तावदतीव समालोचितः। किं बहुना, तत्त्वमिदं भामहेन युक्तिसहकारेण खण्डितम्। भामहमते, काव्ये तावत् वर्तते शब्दस्यापारो महिमा। यथोक्तं तेन–

**नाऽन्यप्रत्ययशब्दा वागाविभाति मुदे सताम्।**

**परेण धृतमुक्तेव सरसा कुसुमावली॥**

(काव्यालङ्कारः, 6.5)

अस्य शब्दस्य किं लक्षणम्? अर्थात् कस्तावत् शब्दः? विवक्षायामस्यां भामहेन विविधानि दार्शनिकमतानि प्रतिपादितानि। तत्रार्थप्रतिपादनार्थमुच्चारितानाम् अकारादीनां वर्णानां सार्थकः समुदाय एव शब्द इत्येवं मतमपि प्रथितम्–

**नन्वकारादिवर्णानां समुदायोऽभिधेयवान्।**

**अर्थप्रतीतये गीतः शब्द इत्यभिधीयते॥** (काव्यालङ्कारः, 6.8)

भाषागतदृष्ट्या मतमिदं तावत् सदाऽद्रियते। परन्तु भामहाचार्येण स्फोटवाददृष्ट्या मतमिदं खण्डितम्। अतश्चोक्तं काव्यालङ्कारे–

**प्रत्येकमसमर्थानां समुदायोऽर्थवान् कथम्।**

**वर्णानां क्रमवृत्तित्वान् न्याय्या नापि च संहतिः॥**

**न चापि समुदायिभ्यः समुदायोऽतिरिच्यते।**
**दारुभित्तिभुवोऽतीत्य किमन्यत् सद्म कल्प्यते॥**

(काव्यालङ्कारः, 6.9–10)

स्फोटवादिनां मते, अर्थप्रतिपादनार्थमुच्चारितानाम् अकारादीनां वर्णानां सार्थकः समुदाय एव शब्द इति मतं न तु युक्तिसम्मतम्। मतस्यास्य काचित् सङ्कीर्णता सदा परिलक्ष्यते। यथा–

1. अकारादीनां वर्णानां सार्थकः समुदाय एव शब्द इति कदापि न सम्भवति। यतो हि एवं सार्थकता कुत्र परिलक्ष्यते? वर्णे वर्णे उत वर्णसमुदाये। यद्युच्यते वर्णे वर्णेऽस्ति तथापि न युक्तः। एकवर्णस्योच्चारणेऽर्थप्रतीतेरभत्वात्। यथा 'कमल' इत्यस्य शब्दस्य 'क' इति वर्णोच्चारणेन सम्पूर्णस्यार्थस्य प्रतीतिः भवेत्। परन्तु एवं न सम्भवति। अत एव अर्थस्थितिः वर्णे वर्णे नास्ति। ननु वर्णसमुदायेऽर्थस्य सार्थकताऽस्ति। एवं मतमपि न निर्दुष्टम्। समुदायेभ्यः 'समुदायी' इत्यभिन्नत्वात्। वस्तुतोऽवयवे एव अवयवी इत्यस्य विनिर्माणं भवति। कश्चन धर्मः यदाऽवयवे न तिष्ठति तदा अवयविमध्येऽपि न स्थास्यतीति स्वाभाविकी रीतिः। एवं प्रकारेण वर्णस्य (अवयवस्य) निरर्थकत्वेन शब्दः (अवयवी) अपि निरर्थको जायते। सर्वे वर्णाः यदि सार्थकाः भवन्ति तर्हि केवलं समुदायस्य सार्थकता दृश्यतेऽन्यथा न। दृष्टान्तप्रदानेन विषयोऽयं स्पष्टीक्रियते। दारुभित्तिभूम्यादीनां संमिश्रणेनैव भवनस्य विनिर्माणं भवति। तस्मात् भवनं दारुभित्ति-भूम्यादिभिः विना किञ्चिदन्यवस्तु नास्ति। अत एव वर्णेषु यदि सार्थकता न विद्यते कथं तर्हि समुदाये सम्भवति? अनेन कारणेन वर्णसमुदायेऽर्थवत्ताऽस्तीति युक्तिरपि खण्डिता।

2. किञ्च, वर्णस्य समुदायोऽपि असम्भवः। एकदेशे एककाले चानेकवस्तुन एकत्रोपस्थितिः तावत् समुदायः। अनेकवर्णस्तु एककाले एकत्रोच्चारणं न सम्भवति। कारणं तु तेषामुच्चारणं क्रमानुसारेण भवति। यथा 'कमल' इत्युच्चारणावसरे प्रथमे क–वर्णस्य, द्वितीये म–वर्णस्य, तृतीये तु ल–वर्णस्य चेति क्रमेणोच्चारणं भवति। अर्थात् कालक्रमदृष्ट्या वर्णत्रयस्य मध्ये किञ्चित् व्यावधानं वर्तते। एकस्मादुच्चारणात् परं तु अपरेषां विनाशो भवति। एवं क्षणिकवर्णानां समुदायः कदापि न सम्भवति। अर्थात् वर्णसमुदायः सदाऽसम्भवः। एवंप्रकारेण स्फोटवादिभिः शब्दस्य मतमिदं खण्डितम्।

अनन्तरं स्फोटवादिनां मते, का तावत् शब्दस्य स्थितिः? विवक्षायामस्यां भामहाचार्येण स्फोटवादिनां मतमुपस्थापितं खण्डितं च। तथोक्तं तेन काव्यालङ्कारे–

**तस्मात् कूटस्थ इत्येषा शाब्दी वः कल्पना वृथा।**
**प्रत्यक्षमनुमानं वा यत्र तत्परमार्थतः॥** (काव्यालङ्कारः, 6.11)

अर्थात् स्फोटवादिनां मते, शब्दस्तावत् नित्यः। शब्दस्य नित्यतास्वीकरणे सति पूर्वोक्ता शङ्का दूरीभवति। परन्तु स्फोटवादिनामयं सिद्धान्तो भामहेन युक्तिसहकारेण खण्डितः। भामहमते, स्फोटसिद्धिः तावत् प्रत्यक्षप्रमाणेन न सिद्ध्यति, न तु अनुमानेन। यतो हि स्फोटः प्रत्यक्षरूपेण न दृष्टिगोचरीभवति। केवलं वर्णानां प्रत्यक्षदर्शनं भवति। परन्तु स्फोटवादिभिः वर्णानां निरर्थकता कल्प्यते। पुनश्चानुमानेनाप्यस्य सिद्धिर्न भवति। कथम्? अनुमानेन हेतोः तथा साध्यस्यावश्यकता वर्तते। किन्तु स्फोटतत्त्वे एवं विषयद्वयमन-पेक्षितम्। तर्हि अनुमानेनैव स्फोटसिद्धिर्न भवति।

किञ्च, स्फोटतत्त्वं शाब्दिकगणैः कल्पनाप्रसूतम्। अस्य काचित् वास्तविकभित्तिः नास्ति। अतो नभःकुसुमवत् तत्त्वमिदं केनापि सहृदयेन नाङ्गीकृतम्। तथोक्तं काव्यालङ्कारे–

**शपथैरपि चादेयं वचो न स्फोटवादिनाम्।**
**नभःकुसुममस्तीति श्रद्दध्यात्कः सचेतनः॥** (काव्यालङ्कारः,6.12)

एवंप्रकारेण स्फोटतत्त्वं काव्यालङ्कारे सदा परिहीयते।

किं बहुना, शाब्दिकनये स्फोटसिद्धान्तस्यैका महती भूमिका वर्तते। तत्र शब्दस्तावत् ब्रह्मरूपेण कल्प्यते। जगतः सर्वज्ञानं तु शब्देन भासते। यथोक्तं भर्तृहरिणा–

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥** (वाक्यपदीयम्,1.123)

अस्य शब्दस्यार्थप्रतीतिः कथं सम्भवति? इति जिज्ञासा तु स्वाभाविकी। शब्दस्यार्थप्रतिपादनाय शाब्दिकैः तावत् स्फोटः स्वीक्रियते। 'स्फुटत्यर्थोऽस्मात्' इत्येवमर्थे बाहुलकादपादाने घञ्–प्रत्ययेन स्फोटशब्दो निष्पद्यते। अर्थात् स्फोटत्वं तावदर्थप्रकाशकत्वम्। शब्दस्यार्थप्रतीतिस्तु वर्णे वर्णे तथा वर्णसमुदाये न सम्भवति। यतो हि एकस्मात् वर्णात् परं परवर्ती वर्णो निरर्थको जातः। किञ्च, वर्णो विनाशशीलः। तेषामुत्पत्तिः तथा विनाशोऽस्ति। तर्हि वर्णानामर्थप्रतीतिरसम्भवा। तस्मात् शाब्दिकैः स्फोटः कल्प्यते। स्फोटसिद्धान्तानुसारं शब्दस्यार्थप्रतीतिः केवलमुच्चारितवर्णसमुदायेन जातस्य शब्दस्य शक्तिकारणात् सम्भवति। एवं शक्तिस्तु स्फोटरूपेणोच्यते शाब्दिकनये। अयं स्फोटात्मकशब्दस्तावत् ब्रह्मरूपो नित्यश्च। यथोक्तं परमलघुमञ्जूषायाम्–

**कर्णपिधाने च जपादौ च सूक्ष्मतरवायुव्यङ्ग्यः शब्दः स्फोटात्मकः ब्रह्मरूपो**

**नित्यश्च।** तदाह हरिः–

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवर्ततेऽर्थभावेन प्रक्रियो जगतो यतः।।**[2]

अयं स्फोटात्मकः शब्दस्तावत् ध्वनिभिन्नः पदार्थः। ध्वनिस्तु शब्दस्य केवलं गुणमात्रः। यथोक्तं महाभाष्ये–

**ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लभ्यते।**
**अल्पो महाँश्च केषाञ्चिदुभयं तत्स्वभावतः।।**[3]

एवं प्रकारेण स्फोटसिद्धान्तस्य विस्तृतविवेचनं शब्दशास्त्रे प्राप्यते। स्फोटतत्त्वस्य प्रथमः प्रामाणिको ग्रन्थस्तावत् महाभाष्यम्। तदनन्तरं भर्तृहरिणा तत्त्वमिदं दार्शनिकस्तरे विवेचितम्। कालान्तरेण तत्त्वमिदं गङ्गेश-अपय्यदीक्षित–नागेशभट्टादीनां रचनासु सुसमृद्धं जातम्। अर्थात् भामहेन यत् स्फोटतत्त्वं तिरस्कृतं शाब्दिकनये तत्तु आदरेण सहाङ्गी-कृतम्।

**2. ज्ञापकविधिः**

शब्दशास्त्रेऽस्ति ज्ञापकविधेरेकं विशिष्टं स्थानम्। सन्दिग्धप्रयोगाणां सिद्ध्यर्थं ज्ञापकविधिराश्रीयते। भाषायां प्रयुक्तानां केषाञ्चन शब्दानां व्याकरणदृष्ट्या कदाचित् कुत्रचित् समर्थनं नोपलभ्यते। पुनश्च शिष्टजनस्य रचनायां तु एषां प्रयोगः परिलक्ष्यते। तदा शिष्टप्रयोगस्य प्रामाण्यं स्वीकृत्य सन्दिग्धानां शब्दानां साधुत्वं निश्चीयते। शब्दशास्त्रेऽयं विधिस्तु ज्ञापकविधिरूपेणोच्यते। शब्दशास्त्रेऽयं विधिस्तु सदाऽद्रियते। परन्तु भामहाचार्येण विधिरयं प्रत्याख्यातः। भामहाचार्यमतानुसारं स्वल्पमात्रेण ज्ञापकविधिना विहिताः शब्दाः काव्ये न प्रयोक्तव्याः। दृष्टान्तस्वरूपं तेनोक्तं काव्यालङ्कारे–

**नाप्रतीतान्यथार्थत्वं धात्वनेकार्थतावशात्।**
**न लेशज्ञापकाकृष्टं स हन्ति ध्याति वा यथा।।** (काव्यालङ्कारः,6.26)

ज्ञापकविधिना निष्पन्नं 'ध्याति' इत्येवं पदमत्र विचार्य्यते। '**ध्यै चिन्तायाम्**'[4] इति ध्यै–धातोः लटि तिप्–विभक्तौ 'कर्तरि शप्' (3.1.38) इत्यनेन सूत्रेण शप्–विकरणे 'ध्यायति' इत्येवं रूपं सम्पद्यते। अत्र भ्वादिगणपठितत्वात्तु शप्–विकरणो निश्चितः। परन्तु केषांचन मते, गणकार्यं तावदनित्यम्। विकरणप्रत्ययभेदेन गणव्यवस्था विहिता। परन्तु 'व्यत्ययो बहुलम्' (3.1.85) इत्यनेन यथायथं विकरणाः शबादयो विहिताः, तेषां छन्दसि विषये बहुलं व्यत्ययो भवति। अनेन ज्ञापकेन गणकार्यं तावत् न खलु

नित्यम् अपि तु अनित्यमिति। एवं प्रकारेण यदि कोऽपि गणकार्यमनित्यमिति मत्वा 'अदिप्रभृतिभ्यः शपः' (2.4.72) सूत्रेण ध्यै–धातोः शपो लोपं करोति तर्हि 'ध्याति' इत्येवं पदं भविष्यति। एवं पदं तु अप्रशस्तम्। भाषायां कदापि अस्य प्रयोगो नैव करणीयः। अत एव स्वल्पमात्रेण ज्ञापकेन विहितं पदं सर्वदा परिहरणीयमिति भामहाचार्यस्याशयः।

तथा च श्लोकान्तरेऽपि भामहेनोक्तम्–

**सूत्रज्ञापकमात्रेण वृत्रहन्ता यथोदितः।**

**अकेन च न कुर्वीत वृत्तिं तद्गमको यथा॥** (काव्यालङ्कारः, 6.37)

अत्र वृत्रहन्ता तद्गमकश्चेति पदद्वयं दृष्टान्तरूपेण विचार्य्यते भामहेन। 'वृत्रस्य हन्ता' इत्यस्मिन् विग्रहेऽत्र 'षष्ठी' (2.2.8) सूत्रेण षष्ठीतत्पुरुषसमासो दृश्यते। विग्रहस्थं 'हन्ता' इति पदं तावत् 'ण्वुल्तृचौ' (3.1.133)[5] सूत्रेण तृच्–प्रत्ययेन च निष्पद्यते। 'तृजकाभ्यां कर्तरि' (2.2.15) इत्यनेन सूत्रेण कर्तरि या षष्ठी सा तृचा अकेन च सह न समस्यते। अतोऽत्र 'वृत्रहन्ता' इत्येवं पदे षष्ठीसमासः कथं समर्थनीयः? विवक्षायामस्यां केनापि ज्ञापकसूत्रमवलम्ब्यते। 'जनिकर्तुः प्रकृतिः' (1.4.30) सूत्रस्यास्य 'जनिकर्तुः' (जनेः कर्ता (कृ + तृच्) = जनिकर्ता, तस्य) इत्यस्मिन् पदे भगवता पाणिनिनाऽपि षष्ठीसमासः स्वीक्रियते। अत एव ज्ञापकविधिमाश्रित्य 'वृत्रहन्ता'–पदे षष्ठीसमासस्य शुद्धता केनापि आचार्येण मन्यते। एवं प्रकारेण 'तस्य गमकः (गम् + ण्वुल्) = तद्गमकः' इत्येवं षष्ठीसमासेऽपि अकप्रत्ययान्तशब्दः परिदृश्यते। 'तृजकाभ्यां कर्तरि' (2.2.15) इति सूत्रेणाप्यत्र षष्ठीसमासस्य निषिद्धताऽस्ति। समालोचकेन अत्रापि ज्ञापकसूत्रमन्विष्यते। 'तत्प्रयोजको हेतुश्च' (1.4.55) इत्यस्य सूत्रस्य 'तत्प्रयोजकः' (तस्य प्रयोजकः (प्र–युज् + ण्वुल्) = तत्प्रयोजक, सः)– पदेऽपि सूत्रकारेण पाणिनिना षष्ठी समर्थ्यते। अनेन ज्ञापकसूत्रेण 'तद्गमकः' इति पदस्यापि समर्थनं दृश्यते। भामहाचार्यस्य मते, 'वृत्रहन्ता' इत्यादयः प्रयोगास्तावत् न तु समीचीनाः। एवंप्रयोगेषु षष्ठीनिषेधस्य स्पष्टविधानं 'तृजकाभ्यां कर्तरि' (2.2.15) इति सूत्रेण विहितम्। निषेधविधानं तावत् बलवत्तरं ज्ञापकविधेः। तस्मात् 'वृत्रहन्ता' इत्यादिषु षष्ठीसमासो नैव करणीयः। वस्तुतस्तु सूत्रलाघवार्थं भगवता पाणिनिना एवं प्रयोगः कृतः। यतश्चोक्तं शब्दशास्त्रे –

**अर्द्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः।**

एवंप्रकारेण भामहेन ज्ञापकविधिः तिरस्कृतः। परन्तु शब्दशास्त्रेऽस्य भूमिकाऽतीव प्रशंसनीया। भाषा तावत् प्रवहणशीला। कालान्तरे भाषायां बहूनां शब्दानां ग्रहणवर्जनं

तथा परिमार्जनं प्रचलितम्। तस्मात् व्याकरणशृङ्खलायां भाषायाः सर्वे शब्दाः न तु आबद्धाः। कतिपयसन्दिग्धशब्दाः भाषायां सदा वर्तन्ते। व्याकरणस्य सामान्यनियमेन तेषां समर्थनं नोपलभ्यते। अत एव तेषां शब्दानां समर्थने विविधाः पद्धतय आश्रिताः वैयाकरणैः। तत्र ज्ञापकस्य एकं विशिष्टस्थानं विद्यते। दृष्टान्तप्रदानेन विषयोऽयं स्पष्टीक्रियतेऽत्र। यथा– 'वलि' इत्यनेन 'अनुदात्तङित आत्मनेपदम्' (1.3.12)[6] इति सूत्रेण धातोरनुदात्तेत्त्वान्नित्यमात्मनेपदस्य प्राप्तिरस्ति। परन्तु 'लज्जालोलं वलन्ती' इत्यादिप्रयोगेषु वलि–धातोः परस्मैपदमपि दृष्टम्। अत्र वलि–धातोः परस्मैपदं कथं सिद्धम्? ज्ञापकात्। 'चक्षिङ् व्यक्तायां वाचि' इति चक्षिङ्–धातोः 'इ', 'ङ्' चानुबन्धद्वयमस्ति। अत्र केवलम् अनुदात्तेत् 'इ'– इत्यनेनानुबन्धेनैव 'अनुदात्तङित आत्मनेपदम्' (1.3.12) सूत्रेणात्मनेपदस्य प्राप्तिरस्ति। तथापि 'ङ्' इत्यनुबन्धस्यापि ग्रहणमत्र दृश्यते। शब्दशास्त्रे तु नास्ति किञ्चनाप्यनर्थकम्। अतश्चात्र ङित्करणस्यापि किञ्चित् प्रयोजनमवश्यमेवास्ति। किं तावत् प्रयोजनम्? इत्यत्र आह– 'अनुदात्तनिमित्तस्यात्मनेपदस्यानित्यत्वज्ञापनार्थम्।' अर्थात् अनुदात्तेत् यदात्मनेपदं तत्तु अनित्यम्। ङित्करणरूपज्ञापकेन विषयोऽयं स्पष्टीकृतः। एवंप्रकारेण वलि–धातोः परस्मैपदमपि समर्थितम्। तस्मात् 'लज्जालोलं वलन्ती' इत्यादिषु शिष्टप्रयोगेषु वलन्ती (वलि+शतृ+ङीप्) पदमपि न दुष्टम्। ज्ञापकविधिमाश्रित्य एवं-प्रयोगाणां शुद्धता व्याकरणशास्त्रे समर्थिता। तथोक्तं वामनाचार्येण–

**वलेरात्मनेपदमनित्यं, ज्ञापकात्।**

**'वलेरनुदात्तेत्त्वादात्मनेपदं यत्, तदनित्यं दृश्यते– 'लज्जालोलं वलन्ती' इत्यादिप्रयोगेषु। तत् कथमित्याह–ज्ञापकात्।'** (का.सू.वृ.5.2.3)

अत एव ज्ञापकस्यैका स्वतन्त्रा भूमिकाऽस्ति शब्दशास्त्रे।

**3. शिष्टप्रयोगः**

काव्यसर्जने कवीनां स्वतन्त्रता खलु सदाऽपेक्षिता। अपारे काव्यसंसारे कविरेव प्रजापतिः। काव्ये भावभागीरथीरूपस्वच्छन्दप्रवाहं रक्षितुं कदापि कुत्रापि व्याकरणशृङ्खलामुपेक्षन्ते कवयः। शाब्दिकदृष्ट्येयमुपेक्षा तावत् प्रामादिकत्वरूपेण परिगण्यते। परन्तु श्रद्धावन्तः सहृदया एनामुपेक्षां सदाऽद्रियन्ते। संस्कृतवाङ्मये एवमुपेक्षणीयप्रयोगस्तावत् सामान्यदृष्ट्या शिष्टप्रयोगः कविप्रयोगो वा कथ्यते। आचार्यभामहस्य मते, शिष्टप्रयोगं दृष्ट्वाऽशुद्धप्रयोगो नैव करणीयः। तथोक्तं काव्यालङ्कारे भामहेन–

**न शिष्टैरुक्तमित्येव न तन्त्रान्तरसाधितम्।**
**छन्दोवदिति चोत्सर्गान्न चापि च्छान्दसं वदेत्॥** (काव्यालङ्कारः 6.27)

शब्दशुद्धिविषये व्याकरणशास्त्रमेव प्रमाणम्, न तु शिष्टप्रयोगः। अत एव काव्ये पूर्ववर्तिना कविना प्रयुक्तः शिष्टप्रयोगः सदा परिहरणीयः। भामहाचार्यदृष्ट्या विषयोऽयं तावत् युक्तः। साधुकाव्यनिर्माणे कवीनामत्र विशेषसतर्कता प्रतिपादिता। नवीनकविगणं प्रति अयमुपदेशस्तु अतीव प्रशंसनीयः।

शिष्टप्रयोगप्रसङ्गे व्याकरणशास्त्रे आदरणीयं मतं प्राप्यते। ''यूस्त्र्याख्यौ नदी'' (1.4.3) इति पाणिनीयसूत्रस्य भाष्ये भगवता पतञ्जलिना उक्तम् –

**छन्दोवत् कवयो वदन्ति।**

अर्थात् कवीनां प्रयोगः वैदिकप्रयोगतुल्यो भवति। 'बहुलं छन्दसि' इति नियमानुसारेण वैदिकप्रयोगो सदा वैकल्पिकोऽस्ति। कविप्रयोगाणामपि एवं समादरो दृश्यते शब्दशास्त्रे। यत् समाकर्षति सर्वान् सहृदयान्। एवमुदारदृष्टिः खलु सर्वदा प्रशंसनीया। टीकाकारो मल्लिनाथोऽपि 'निरङ्कुशाः कवयः'(मल्लिनाथस्य सर्वङ्कषाटीका) इत्येवमुदारमतं विदधाति।

**4. योगविभागः**

इष्टप्रयोगस्य सिद्धये येषां विधीनां ग्रहणं शब्दशास्त्रे सदा वर्तते तेषां अन्यतमस्तावत् योगविभागः। सन्दिग्धशब्दानां सिद्ध्यर्थं किंचित् सूत्रं पृथक् पृथक् विभज्य तस्मिन् पृथक्-पृथग् विशिष्टस्यार्थस्य योग एव योगविभागः। योगविभागेन किञ्चित् सूत्रं द्विधा विभक्तं भवति। योगविभागस्यास्य प्रयोगविषये भामहस्य काचित् सङ्कीर्णता परिलक्ष्यते। भामहाचार्यमतानुसारं तु योगविभागः सदा परिहरणीयः। तथोक्तं भामहीये काव्यालङ्कारे–

**सिद्धो यश्चोपसंख्यानादिष्ट्या यश्चोपपादितः।**
**तमाद्रियेत प्रायेण न तु योगविभागजम्॥** (काव्यालङ्कारः, 6.29)

अर्थात् सूत्रेण, वार्तिकेन भाष्येण चैव सिद्धशब्दस्तावत् काव्ये प्रयोक्तव्यः न तु योगविभागादिति भामहस्याभिमतम्। वस्तुतस्तु व्याकरणसिद्धान्तेन येषां प्रयोगाणां समर्थनं नैवोपलभ्यते तत्रैव योगविभागोऽवलम्ब्यते। सूत्रं विभज्य केनापि प्रकारेण सन्दिग्धप्रयोगाणामत्र समर्थनं क्रियते। अनेन कारणेनैव भामहाचार्येण खलु योगविभागः परिहीयते।

परन्तु योगविभागस्य एकमनवद्यं माहात्म्यं वर्तते शब्दशास्त्रे। निदर्शनस्वरूपं 'सह सुपा' (2.1.4) सूत्रं तावदत्र विचार्य्यते। सूत्रेऽस्मिन् 'सुबामन्त्रिते पराङ्गवत्स्वरे' (2.1.2) इत्यतः 'सुप्' अनुवर्तते। तेन सुबन्तं सुबन्तेन सह समस्यते इति सूत्रार्थः। अत एव 'पूर्वं भूतः' इत्यस्मिन् विग्रहे 'पूर्वम्' इति सुबन्तं पदं 'भूतः' इत्यनेन समर्थसुबन्तपदेन सह समस्यते। 'भूतपूर्वे चरट्'(5.3.53) इति ज्ञापकात् भूतशब्दस्य पूर्वनिपातः। फलतः 'भूतपूर्वः' इति समासयुक्तं पदं भवति।

कुत्रचित् 'पर्यभूषयत्' इत्यादिकः प्राचीनप्रयोगः प्राप्यते। 'परि अभूषयत्' इत्यस्मिन् विग्रहे परि इति पदं सुबन्तमव्ययम् अपरं तु 'अभूषयत्' इति तिङन्तं पदम्। अत एव ''सह सुपा'' (2.1.4) इत्यनेन सामान्यतया समासो न युज्यते। अत्र समाससिद्ध्यर्थं ''सह सुपा'' (2.1.4) इति सूत्रे योगविभागः क्रियते। एवंप्रकारेण सम्पूर्णं सूत्रं तावत् द्विधा विभक्तम्–

(क) 'सह' अर्थात् सुबन्तं केनापि समर्थेन सह समस्यते। अतः 'परि' सुबन्तं पदम् 'अभूषयत्' इति समर्थतिङन्तपदेन सह समस्यते। फलतः 'पर्यभूषयत्' इत्येवं समासे नास्ति कश्चन संशयः।

(ख) 'सह सुपा' अर्थात् सुबन्तं सुबन्तेन सह समस्यते। मूलसूत्रस्यानुरूपोऽर्थः वर्तते चात्र। अत एव सन्दिग्धपदसमर्थने योगविभागस्य प्रशंसनीया भूमिका दृश्यते तावत् शब्दशास्त्रे।

**उपसंहृतिः**

काव्यालङ्कारस्य षष्ठे परिच्छेदे शब्दशुद्धिरूपो विषयः पर्यालोचितः। काव्ये प्रयोज्याप्रयोज्यशब्दानामेवालोचनमत्र विवेचितम्। अनेनालोचनेन सह शब्दस्वरूपविषये विविधाः दार्शनिकविषया अप्यत्र पर्यालोचिताः। मुख्यतया पाणिनीयव्याकरणसम्प्रदायमाश्रित्य एवं विचारधारा प्रचलिता। तथापि शब्दशास्त्रस्य कतिपयसिद्धान्तमवलम्ब्य भामहाचार्यस्य काचित् विप्रतिपत्तिरपि परिदृश्यते। व्याकरणस्य निरपेक्षविचारधारायाम् एवं विप्रतिपत्तिस्तु सङ्कीर्णतादुष्टा। तथापि भामहस्यैवं बलिष्ठसिद्धान्तः सदाऽकर्षणीयः। वस्तुतः काव्यिकदृष्ट्या भामहस्येवं विचारधारा विकसिता। तस्मात् शब्दशास्त्रस्य काचिदुपेक्षा तु स्वाभाविकी। तथापि शब्दशास्त्रं प्रति आचार्यस्य या श्रद्धा वर्तते साऽतीवादरणीया। नवीनकवीनां शब्दशास्त्रे प्रवृत्त्यर्थं भामहस्यैवमालोचना खल्वतीव प्रशंसनीयेति वक्तुं शक्यते।

*

## सन्दर्भाः


1. काव्यालङ्कारः, 6.65-66
2. परमलघुमञ्जूषा, विजयागोस्वामिसम्पादिता, पृ.37
3. महाभाष्यम्, 1.1 सू.68
4. धातुपाठः 980, भ्वादयः, परस्मैपदी, अकर्मकः
5. धातोरिति वर्तते। सर्वधातुभ्यो ण्वुल्तृचौ प्रत्ययौ भवतः। कारकः, कर्ता, हारकः, हर्ता, (काशिकावृत्तिः)
6. अनुदातेत् उपदेशे यो ङित्तदन्ताच्च धातोर्लस्य स्थाने आत्मनेपदं स्यात्। (सि.कौ., तिङन्तप्रकरणम्)


*

# शब्दकौस्तुभ–उद्द्योतदिशा कारकलक्षणविमर्शः

**डॉ. लक्ष्मीकान्त मुर्मू**

संस्कृतवाङ्मये व्याकरणशास्त्रस्य चर्चापरम्परा अतीव प्राचीना, ऋक्तन्त्रव्याकरणे शाकटायनेन निगद्यते– ''इदमक्षरच्छन्दो वर्णशः समनुक्रान्तं यथाऽऽचार्या ऊचुर्ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्रायेन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यस्तं खल्विदम-क्षरसमाम्नायमित्याचक्षते, न भुक्त्वा न नक्तं प्रब्रूयात् ब्रह्मराशिः'' इति। ततः क्रमेण ऋषिभ्यः व्याकरणस्य परम्परा विस्तृता, मूलतः शब्दस्य अष्टौ सम्प्रदायाः अति प्राचीनकालादेव विद्यन्ते।

शाब्दिकाः अपि अष्टौ यथा –

**ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।**
**सारस्वतं चापिशलं शाकलं पाणिनीयकम्॥** इति।

अद्यतने अर्वाचीने पाणिनिव्याकरणमेव सर्वजनप्रसिद्धं तथा प्रामाणिकञ्च वर्तते। पाणिनीयव्याकरणं त्रिमुनिव्याकरणमिति उच्यते। एतस्य व्याकरणस्य मूलं भवति 'अष्टाध्यायी' इति ग्रन्थः। अष्टाध्यायीग्रन्थस्य अनेके व्याख्यानग्रन्थाः लभ्यन्ते, तेषु 'काशिका' इति ग्रन्थः सुप्रसिद्धः। तथापि फणिमुनिना विरचितः 'महाभाष्यम्' इति ग्रन्थो भवति प्रामाणिकः। यतो हि 'यथोत्तरं मुनीनां प्रामाण्यम्' इति आचार्याः सूत्रस्थगूढार्थान् तत्रत्यमाशयञ्च अतीव गाम्भीर्येण लौकिकोदाहरणेन सह प्रतिपादितवन्तः। तत्र पुनः केचन अंशाः अद्यतनीयानाम् अल्पमतीनां बोधाभावात् श्रीमता कैयटेन 'प्रदीपः' इति टीका विरचिता, तत्रापि क्लेशदूरीकरणाय करुणाघनः श्रीमन्नागेशः सर्वार्थसरलतया प्रतिपादनार्थम् 'उद्द्योतः' इति नाम्ना प्रसिद्धटीकां विरचितवान्।

एवमेव पुनः महाभाष्यस्य उपरि श्रीमद्भट्टोदीक्षितेन कश्चन 'शब्दकौस्तुभः' इति ग्रन्थः विरचितः, वस्तुतः ग्रन्थोऽयं अष्टाधाय्याः व्याख्यानग्रन्थः। तत्राप्यत्र महाभाष्यस्थ-

गूढार्थानाम् अंशानां सरलतया प्रतिपादनं तथा स्वकीयमतानाम् उपस्थापनञ्च वर्तते।

'उद्द्योतः' तथा च 'शब्दकौस्तुभः' इति ग्रन्थद्वयमपि महाभाष्यस्य विषयम् उपस्थापयति। तत्र उभयोः विषयः समानः परन्तु ग्रन्थकारौ भिन्नौ इति धिया मतानां पार्थक्यं विद्यते, कुत्र भेदः तदेव प्रतिपादयितुम् अयं प्रबन्धः, परन्तु, विस्तरभयात् कारकस्य लक्षणमेव आलोच्यते।

'**अनिर्दिष्टाः प्रत्ययाः स्वार्थे**'[1] इति नियमेन स्वादिप्रत्ययाः स्वार्थे न भवन्ति, अपि च '**अर्थवदधातुरप्रत्ययः प्रातिपदिकम्**'[2] इति सूत्रेण सुबन्तसमुदायनिष्ठमर्थवत्त्वं प्रकृतिमात्रम् आरोप्य स्वादिप्रत्ययानां विधानं कृतं परन्तु तेषां प्रत्ययानाम् अर्थविशेषो नैव निर्दिष्टः, अतः स्वादिप्रत्ययाः स्वार्थे न भवेयुः इति विषयं मनसि निधाय आरब्धमाचार्येण कारकप्रकरणम्। कारकं षड्विधं भवति, उद्दिष्टस्य लक्षणं लक्षितस्य च विभागः इति नियमेन कारकं नाम किम् इति जिज्ञासायां विभिन्नेषु ग्रन्थेषु आचार्याणां विविधानि मतानि दृश्यन्ते।

**चत्वारि शृङ्गा त्रयोऽस्य पादा द्वे शीर्षे सप्त हस्तासोऽस्य।**
**त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्यां आ विवेश।।** इति।

सप्त हस्तासोऽस्य, अर्थात् सप्त विभक्तयः भवन्ति। मनुजो यथा हस्तादीन्द्रियमन्तरेण लेखनार्चनाद्वारा वागधिष्ठात्रीं समुपासितुं सर्वथाऽसमर्थो भवति, तथैवास्य महादेवस्य सप्त विभक्तीः अन्तरेण कारकत्वं न गण्यते। अत एव सप्तविभक्तिविधायकसूत्राणां प्रकरणमिदं कारकनान्माऽभिधीयते। उक्तञ्च – 'सर्वोपकारकं ज्ञेयं कारकं सर्वकारकम्' इति।

करोति इति क्रियां निर्वर्तयति वेति व्युत्पत्त्यनुसारेण क्रियाजनकत्वं कारकत्वमिति कारकलक्षणं भवति। 'कारके' इति पाणिनीयसूत्रे करोति कर्तृकर्मादिव्यापदेशान् इति अनुसारेण कारकशब्दः क्रियापरः, सप्तम्यर्थे निरूपितत्वं जनकतावत् पदमत्र अध्याह्रियते। तेन क्रियानिरूपितजनकत्वमिति सम्भवति। महाभाष्यकारेणापि उक्तं 'कारक इति संज्ञानिर्देशश्चेति संज्ञिनोऽपि निर्देशः कर्तव्यः साधकं निर्वर्तकं कारकसंज्ञं भवतीति वक्तव्यम्। इतरथा हि कर्मसंज्ञाप्रसङ्गश्चाऽकथितस्य – 'ब्राह्मणस्य पुत्रं पन्थानं पृच्छति।' नैव दोषः, 'कारक' इति महती संज्ञा क्रियते। संज्ञा च नाम यतो न लघीयः। कुतः एतत्, लघ्वर्थं हि संज्ञाकरणं तत्र महत्याः संज्ञा यथा विज्ञायेत करोतीति कारकमिति।'[3]

परन्तु, कारकलक्षणविषये विदुषां मतभेदः दृश्यते, श्रीमद्भट्टोजीदीक्षितमतेन – क्रियान्वयित्वं कारकत्वम् इति कारकस्य लक्षणम्, अर्थात् क्रियायाम् अन्वेति इति। करोति

स्वसम्बन्धेन क्रियायां विशेषरूपतामापादयति इति व्युत्पत्तेः महासंज्ञया क्रियान्वयित्वं कारकत्वम् इति समायाति। अपि च 'कारके' इति सूत्रानुसारेण करोति कर्तृकर्मादिव्यपदेशान् इति व्युत्पत्त्या क्रियापरः कारकशब्दः, क्रियायामित्यर्थः।

अपि चोक्तम् – '**अन्वर्था चेयं संज्ञा करोतीति कारकमिति**'[4], अग्रेऽपि अत्र कारकशब्दः क्रियापरः, करोतीति कर्तृकर्मादिव्यपदेशान् इति व्युत्पत्त्या, तथा च क्रियायामित्यस्योपस्थित्या क्रियान्ययिनामेव तत्तत्संज्ञाः स्युः।[5] अपादानादिसंज्ञाविधौ प्रौढमनोरमायामुक्तम् – '**अन्वर्था चेयं संज्ञा-करोति कारकमिति, तेन क्रियानन्वयिनो न भवति**'।[6] प्रकृतलक्षणे क्रियापदं तु 'राज्ञः पुरुषः' इत्यादौ नामार्थोन्वयिनः राज्ञः कारकत्वापत्तिरतस्तद्वारणाय।

प्रकरणेऽस्मिन् वस्तुतः शब्दकौस्तुभस्य उद्द्योतस्य आश्रयेण च अत्र प्राचीननवीनयोः मतमेव उपस्थाप्यते।

**कारकलक्षणविमर्शः**

आदौ 'कारके' (1.4.23) इति सूत्रं प्रारभ्यते। कारकलक्षणं यथा– शब्दकौस्तुभे 'अन्वर्था चेयं संज्ञा करोतीति कारकमिति।' एवमग्रे च तैरुक्तम् 'अत्र कारकशब्दः क्रियापरः करोतीति कर्तृकर्मादिव्यपदेशान् इति व्युत्पत्त्या। तथा च अपादानादिसंज्ञाविधौ क्रियायामित्यस्योपस्थित्या क्रियान्वयिनामेव तत्तत्संज्ञाः स्युः।'[7] अन्यत्र च उक्तं - 'अन्वर्था चेयं संज्ञा–करोति कारकमिति, तेन क्रियानन्वयिनो न भवति।'[8] इति। एवं प्रकारेण लक्षणं प्रतिफलति 'क्रियान्वयित्वं कारकत्वम्' इति। 'करोति स्वसम्बन्धेन क्रियायां विशेषरूपतामापादयति' इति व्युत्पत्तेः महासंज्ञया क्रियान्वयित्वं कारकत्वम् इति कारकसामान्यलक्षणं स्वीकुर्वन्ति। अथवा 'कारके' इति सूत्रे करोति–कर्तृकर्मादिव्यपदेशान् इति व्युत्पत्त्या कारकशब्दः क्रियापरः। तेन 'कारके' इत्यस्य क्रियायाम् इत्यर्थः। महाभाष्ये च प्रोक्तं– 'यावद् ब्रूयात् कारके तावद् ब्रूयात् क्रियायाम्' इति। अन्वेति इति पदं च अध्याह्रियते तथा च यत् क्रियायाम् अन्वेति इति सूत्रार्थानुरोधेन लक्षणं समायाति। तेन 'राज्ञः पुरुषः' इत्यादौ नामार्थान्वयिनः राज्ञः अपि कारकत्वापत्तिरतस्तद्वारणाय क्रियापदमुपात्तम्। तथा च न दोषः।

'करोति क्रियां निर्वर्तयति' इति व्युत्पत्त्यनुरोधेन 'क्रियाजनकत्वं कारकत्वम्' इति लक्षणं तु आचार्याः नागेशाः अङ्गीकुर्वन्ति, यतो हि 'कारके' इति सूत्रे करोति कर्तृकर्मादिव्यपदेशान् इति व्युत्पत्त्या कारकशब्दः क्रियापरः, सप्तम्यर्थो निरूपितत्वम्, जनकतावद् पदं चाध्याह्रियते। तस्यैकदेशे जनकतायां निरूपितस्तस्यान्वयः, शरैः शातितपत्रः

इत्यत्रेव। तथा च क्रियानिरूपितजनकतावद् इति सूत्रार्थानुरोधेनापि 'क्रियाजनकत्वम्' इति लक्षणं सङ्गच्छते। विषयेऽस्मिन् महाभाष्यसूत्रमपि प्रमाणं यथा– 'कारक इति संज्ञानिर्देशश्चेत् संज्ञिनोऽपि निर्देशः कर्तव्यः साधकं निर्वर्तकं कारकसंज्ञं भवतीति वक्तव्यम्। इतरथा हि कर्मसंज्ञा-प्रसङ्गश्चाऽकथितस्य–ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति। नैष दोषः। कारकम् इति महती संज्ञा क्रियते। संज्ञा च नाम यतो न लघीयः। कुत एतत्, लघ्वर्थं हि संज्ञाकरणम्। तत्र महत्याः संज्ञायाः करणे एतत्प्रयोजनम् अन्वर्था संज्ञा यथा विज्ञायेत करोतीति कारकमिति'[७] इति।

'नन्वन्वर्थं नाम योगरूढत्वम्', अपि च 'ननु करोतीत्यस्य निष्पादयति इत्यर्थः एवं च निष्पादकत्वे लब्धेऽपि क्रियानिर्वर्तकत्वमित्यर्थलाभः, अतः आह क्रियैवेति। क्रियायाः एव शब्देन साध्यत्वप्रतीतेः निर्वर्तकार्थे कारकशब्दे सम्बन्धाकाङ्क्षायां सैव सम्बध्यत इति भावः। सम्प्रदानादीनामपि स्वज्ञानद्वारा जनकत्वं बोध्यम्' इति उद्द्योते।

अर्थात् क्रियाजनकत्वं नाम क्रियानिष्ठजन्यतानिरूपितजनकताश्रयत्वम्। अत्र क्रियापदेन व्यापारस्यैव ग्रहणम्। क्रियते इति व्युत्पत्त्या क्रियायाः फलम् अप्यर्थः, एवं च क्रियापदेनात्र व्यापारस्य ग्रहणम्, योगरूढत्वात् इति पूर्वक्तोपदेशेन। व्यापारः धातुवाच्यः एव साध्यभूतः। तथा च धातुवाच्यव्यापारनिष्ठजन्यतानिरूपितजनकतावत्त्वम् धातुवाच्यव्यापारोत्पत्त्यनुकूल-व्यापारवत्त्वं वा कारकत्वमिति निष्कर्षः। एवं च 'चैत्रः काष्ठैः स्थाल्यां तण्डुलं पचति' इत्यादौ पच्धात्वर्थव्यापारः, व्यापारनिष्ठा या जन्यता, तादृशजन्यतानिरूपितजनकत्वं चैत्रादि-कर्तरि यत्नादिरूपमनोव्यापारे तद्वत्त्वात् कर्तुः कारकत्वम्। एवं पच्धातुवाच्याधिश्रयणादि-व्यापारनिष्ठजन्यतानिरूपितजनकत्वं कर्मणि तण्डुलादौ विद्यमाने विक्लित्तिधारणरूपव्यापारे करणे काष्ठादौ वर्तमाने ज्वलनादिव्यापारे अधिकरणे स्थाल्यादौ विद्यमाने धारणरूपव्यापारे चास्ति। अतः तत्तदाश्रयत्त्वात् तेषां समेषां कारकत्वं सिद्ध्यति इति नागेशपादस्य अभिप्रायः। एवमन्यत्रापि बोध्यम्।

प्राचीननवीनयोः न केवलं कारकलक्षणविषये मतविरोधः, अपि तु एवमपादान-त्वम्, अधिकरणत्वम् इत्यादि विषयेऽपि विमर्शः विश्लेषणं च परिलक्ष्यते।

*

## सन्दर्भाः


1. प.भा., सं. 122
2. पा. सू., 1.2.45
3. कारके (1.4.23) इति सूत्रे महाभाष्ये
4. कारके (1.4.23) इति सूत्रे शब्दकौस्तुभे
5. तत्रैव सूर्य शब्दकौस्तुभे
6. कर्तुरीप्सिततमं कर्म (1.4.47) इति सूत्रे प्रौढमनोरमायाम्
7. कारके इति सूत्रे शब्दकौस्तुभे, पृ.115
8. तत्रैव
9. कारके (1.4.23) इति सूत्रे महाभाष्ये, पृ.240


*

# किञ्चित् पारिभाषिकम्

काशिकावृत्तौ अष्टाध्यायीगतानां सूत्राणां शब्दाः यथा परिभाषिताः तथा सूत्र-तत्संख्योल्लेखपुरःसरम् अध्यायक्रमेणात्र संगृह्यन्ते।

| | |
|---|---|
| ३३ द्वितीयः | द्वयोः सहयुक्तयोरप्रधानो यः स द्वितीयः। |
| अनुपाख्यः | उपाख्यायते प्रत्यक्षत उपलभ्यते य स उपाख्यः। उपाख्यादन्योऽनुपाख्योऽनुमेयः। |
| | का. द्वितीये चानुपाख्ये ६.३.८० |
| ३४. उपसर्जनम् | उपसर्जनसर्वावयवः समास उपसर्जनम्। यस्य सर्वेऽवयवाः उपसर्जनीभूताः स सर्वोपजनो बहुव्रीहिर्गृह्यते। का. वोपसर्जनस्य ६.३.८२ |
| ३५. ब्रह्मचारी | ब्रह्म वेदस्तदध्ययनार्थं यद् व्रतं तदपि ब्रह्म, तच्चरतीति ब्रह्मचारी। समानस्तस्यैव ब्रह्मणः समानत्वादित्ययमर्थो भवति। |
| | का. चरणे ब्रह्मचारिणि ६.३.८६ |
| ३६. समापम् | समापं नाम देवयजनम् |
| | वा. समाप ईत्वे प्रतिषेधो वक्तव्यः। |
| | का. द्व्यन्तसर्गेभ्योऽप ईत् ६.३.९७ |
| ३७. पृषोदरम् | पृषद् उदरं यस्य पृषोदरम्। |
| पृषोद्वानम् | पृषद् उद्वानं यस्य पृषोद्वानम्। |
| बलाहकः | वारिवाहको बलाहकः। |
| जीमूतः | जीवनस्य मूतः जीमूतः। |
| श्मशानम् | शवानां शयनं श्मशानम्। |
| उलूखलम् | ऊर्ध्वं खमस्येति उलूखलम्। |
| पिशाचः | पिशिताशः पिशाचः। |
| बृसी | ब्रुवन्तोस्यां सीदन्तीति बृसी। |
| मयूरः | मह्यां रौतीति मयूरः। |
| ३८. दूडाशः,दूणाशः,दूडभः | कृच्छ्रेण दाश्यते नाश्यते दभ्यते च यः सः। |
| दूढ्यः | दुष्टं ध्यायतीति दूढ्यः। |
| | का. पृषोदरादीनि यथोपदिष्टम् ६.३.१०९ |

# अनन्तदेवकृतश्रीकृष्णभक्तिचन्द्रिकानुसारेण वैष्णवमते परमपुरुषार्थस्वरूपम्

**डॉ. सनातन दासः**

**प्रबन्धसारः**

अनन्तदेवविरचितं श्रीकृष्णभक्तिचन्द्रिकाख्यं दृश्यकाव्यं दशरूपकेषु प्राधान्येन व्यायोगपर्यायभूतम्। काव्यमार्गेण धर्मार्थकाममोक्षरूपचतुर्वर्गफलप्राप्तिर्भवति इति तु प्रसिद्धमेव। प्रत्येकमपि काव्यस्य विद्यते किञ्चन निगूढं दार्शनिकतत्त्वम्। आनन्दप्राप्तिरेव तत्र मूलभूता भवति। मोक्षः अपि परमानन्दस्वरूपः। स एव काव्यस्य मुख्यं फलम्। तत्प्राप्तये काव्येषु व्यापारः परिदृश्यते। सम्पूर्णे श्रीकृष्णभक्तिचन्द्रिकारूपके भगवतः श्रीकृष्णस्य भजनं चरणकमलसेवनमाराधनं वा परमपुरुषार्थरूपेण प्रदर्शितम्। तदुक्तं तत्र श्रीकृष्णभक्तेन– 'श्रीकृष्णभक्तिरेव परमः पुरुषार्थः' इति। कृष्णः तु परमः पुरुषः। तद्भक्तिश्च परमः पुरुषार्थः। सैव श्रीकृष्णभक्तिरिति परमपुरुषार्थलाभाय भक्तानामध्यवसायः कर्त्तव्यः। अत्रापि रूपके मीमांसककृष्णभक्तादिपात्राणां तत्प्राप्तये प्रयत्नो दृश्यते। कृष्णभक्तिरेव नाट्यस्यास्य मुख्यं फलम्। अपरवैष्णवग्रन्थेषु अपि मोक्षापेक्षया कृष्णभक्तिरुत्कृष्टा जीवनस्य मुख्यं प्रयोजनञ्चेति बहुधा प्रतिपादितम्।

प्रकृतस्य श्रीकृष्णभक्तिचन्द्रिकाख्यरूपकस्य विषयः खलु शैवतार्किकमीमांसकादि-सम्प्रदायानां स्वमतानि निराकृत्य श्रीकृष्णभक्तेरुत्कर्षप्रतिपादनम् इति। अत्र शैवतार्किक-मीमांसकवेदान्तिशाब्दिकप्रभृतीनां सम्प्रदायानां मूलभूताः सिद्धान्ताः श्रीकृष्णभक्तेन युक्त्या निराकृताः। सर्वदा कृष्णभक्तेनात्र श्रीकृष्णस्यैव माहात्म्यं प्रकटितम्। भगवान् श्रीकृष्णः परमपुरुषः, तस्मिन् च भक्तिः परमपुरुषार्थः। अतः श्रीकृष्णभक्तिरूपपरमपुरुषार्थलाभाय सर्वैः प्रयत्नो विधेयः। अयमेव विषयः शैवादिपात्राणां वादविवादेन शास्त्रोक्तिप्रत्युक्तिमाध्यमेन निष्कर्षितः। अतः प्रबन्धेऽस्मिन् प्रकृतरूपकमनुसृत्य वैष्णवकाव्येषु मोक्षः परमपुरुषार्थस्वरूपं श्रीकृष्णभक्तिश्च युक्त्या निरूपयिष्यन्ते।

**कुञ्जीशब्दाः—** मोक्षः, परमपुरुषार्थः, श्रीकृष्णभक्तिः, पुरुषोत्तमः, ब्रह्म, रसः, भावः, वैष्णवः, रूपकम्।

मीमांसान्यायप्रकाशकर्तुरापदेवस्य सूनुनानन्तदेवेन विरचितस्य श्रीकृष्णभक्तिचन्द्रिकाह्वय-व्यायोगस्य विषयः खलु शैवादिसम्प्रदायानां स्वकीयमतानि निराकृत्य श्रीकृष्णभक्तेरुत्कर्ष-प्रतिपादनम् इति। अत्र शैवतार्किकमीमांसकप्रभृतीनां सम्प्रदायानां सिद्धान्ताः श्रीकृष्णभक्तेन युक्त्या निराकृताः। सर्वदा तेन श्रीकृष्णस्यैव माहात्म्यं प्रकटितम्। तन्मते अपरेषां सम्प्रदाया-नामुपास्येभ्यः अस्मदुपास्यः श्रीकृष्णः श्रेष्ठः इति। भगवान् श्रीकृष्णः एव परमपुरुषः, तस्मिन् च भक्तिः परमपुरुषार्थः इत्यत्र समुपवर्णितम्। अतः श्रीकृष्णभक्तिरूपपरमपुरुषार्थ-लाभाय सर्वैः प्रयत्नः कर्तव्यः। अयमेव विषयः शैवशाब्दिकतार्किकमीमांसकवेदान्ति-कृष्णभक्तानां वादविवादेन शास्त्रोक्तिप्रत्युक्तिमाध्यमेन निष्कर्षितः। स्वसिद्धान्तप्रतिष्ठार्थं प्रत्येकमपि पात्रं स्वस्वदर्शनप्रतिपादितान् विचारान् उपस्थापितवत्। तस्मादत्र दृश्यकाव्ये सर्वाणि एव शैवादिपात्राणि स्वमतपोषणार्थं शास्त्रसम्बद्धानि पाण्डित्यपूर्णानि च वचनानि प्रायुञ्जन्।

काव्ये रसः एव सारः। **'न हि रसादृते कश्चिदर्थः प्रवर्तते'** इति भरतमुनिना नाट्यशास्त्रे यथार्थमेवोक्तम्। रस्यते आस्वाद्यते इति रसः। मुमुक्षूणां जीवनस्य मोक्ष इव कवीनां कवनस्य रसः एव पारमार्थिकः। यावन्न काव्यस्य रसः आस्वाद्यते तावत्प्रकृत-चमत्कारलेशोऽपि नोपपद्यते। चमत्काराधायकत्वेऽपि प्रकृतव्यङ्ग्यार्थनिरूपणासामर्थ्यात् गुणालङ्काराणां नास्ति परमाह्लादजनकताशक्तिः। ते च गुणालङ्कारादयः आपेक्षिकं वाच्यगम्यात्मकमस्थिरमानन्दमस्मच्चेतसि सहृदयमनसि वा काव्यस्याध्ययनेन दर्शनश्रवणाभ्यां वा जनयन्ति, न तु शाश्वतिकं पारमार्थिकमानन्दम्। वस्तुतः गुणालङ्कारादीनां काव्यशोभावर्धने चारुत्वसम्पादने मनोरञ्जने चास्ति विशेषप्रयोजनम्, न तु पारमार्थिकतत्त्वनिरूपणे। शाश्वतचमत्कारजनकरसबोधादनन्तरं काव्यं तु ब्रह्मास्वादसहोदरानन्ददायकं भवति। काव्यस्य रसः पारमार्थिकमानन्दं जनयति। रसः एव आनन्दस्वरूपः। काव्यरसास्वादनेन परमानन्दप्राप्तिर्भवति। सहृदयहृदयसंवेद्यः स चाह्लादः अविनश्वरः ब्रह्मास्वादतुल्यो भवति। तैत्तिरीयोपनिषत्सु **रसं ह्येवायं लब्ध्वानन्दीभवतीति** उच्चारितम्।[1] काव्यस्य प्रकृतरहस्यमपि रसबोधेनैव उन्मोचितं भवति। अतः रसादृते काव्यस्य न किञ्चित् तत्त्वं ज्ञायते। काव्ये रसः एव प्रधानः। अपरे च गुणालङ्कारादयः प्रधानं रसं पोषयन्ति। रसस्य परिपोषणे दृढीकरणे वा गुणादयः सहायकाः भवन्ति। रसास्वादनेन सहृदयहृदये आह्लादिते कवेः कर्म सार्थकतां याति। काव्यस्य मुख्यं फलञ्च लभ्यते। तस्मात् काव्यफललाभाय[2] परमाह्लादप्राप्तये च रसबोधः अनिवार्यः।

वैष्णवालङ्कारशास्त्रेषु भक्तिरसो नामापूर्वः एको रसो निरूपितः। निःस्वार्थेन भगवत्पादभजनमेव वैष्णवानां परमो धर्मः। स एव भक्तिरिति कथ्यते। भगवति समर्पितं वेदाध्ययनादिकमपि भक्तिरित्युच्यते श्रीकृष्णभक्तिचन्द्रिकेति प्रस्तुतग्रन्थे– **'वेदाध्ययनादिकमपि हरिभक्तिरेव। किन्तु भगवति समर्पितं नान्यथा।'** भक्तिभावादेव पुरुषोत्तमः श्रीकृष्णः सेव्यते। वैष्णवकाव्येष्वियं भक्तिः पूर्णतया राजते। तस्माद्वैष्णवसाहित्येषु भक्तिरसः एवाङ्गिरसो भवति। भक्तिरसास्वादनेन सहृदयभक्तचित्ते परमाह्लादः समुत्पद्यते। भक्तिरसस्य स्थायी भावो भवति कृष्णविषयिणी रतिः। भगवति श्रीकृष्णे भक्तिः प्रेम वा कृष्णरतिरित्युच्यते। न केवलेयं रतिः भक्तिरसास्वादनयोग्यचमत्कारहेतुर्भवति अपि च विभावानुभावादिभिः युक्ता कृष्णरतिः सहृदयभक्तहृदयेषु भक्तिरसास्वाद्यत्वमुत्पाद्य चमत्कारजननी भवति। अतः विभावानुभावव्यभिचारसत्त्वयुक्ता श्रीकृष्णरतिः भक्तिरसे पर्यवस्यति। तस्मात् भक्तिरसामृतसिन्धौ श्रीरूपगोस्वामिना श्रवणादिभिः विभावानुभावसात्त्विकव्यभिचारिभिः भक्तहृदये उन्मिषितं स्वाद्यत्वमेव कृष्णरतिः इत्युक्तम्। सा च रतिः भक्तिरसस्य स्थायिभावः इति।[3]

अस्मद्ग्रन्थकारः अनन्तदेवः श्रीकृष्णभक्तः आसीत्। तस्मात्तस्य रचनासु कृष्णभक्तिरेव दरीदृश्यते। कृष्णभक्तिमाश्रित्यैव श्रीकृष्णभक्तिचन्द्रिकाख्यं सम्पूर्णं रूपकं सः रचयामास। समग्रे ग्रन्थे श्रीकृष्णः एव परमाराध्यत्वेनाभिवन्दितः। रमेशचरणारविन्दसेवनमेव नाट्यस्यास्य मुख्यं फलम्। मुख्यफललाभाय पात्राणां प्रयत्नादिकं परिलक्ष्यते। यथा शैवमुद्दिश्य वैष्णवेनोक्तम् –

**किन्तु सन्ति पुरुषाः सहस्त्रशः स्वस्वशक्तिपरिणाहविश्रुताः।**
**एष एव पुरुषोत्तमाभिधां भूषयन् जगति भाति केशवः॥[4]**

अपि च शैववैष्णवौ प्रति महावैष्णवसंलापे–

**'सत्यं यद्गिरिशः समस्तजगतामाद्यो महापूरुषो... श्रीगोविन्दपदारविन्दयुगले लावण्यलग्नं मनः॥'**[5] पुनः कृष्णभक्तः मीमांसकादीन् प्रति हरिसेवनाय अकथयत् – **'श्रूयताम्। श्रीकृष्णभक्तिरेव परमः पुरुषार्थः। तथा हि–**

**कविभिर्भुक्तिविमुक्ती पुरुषार्थेषु प्रकर्षतो गणिते।**
**तृणलतिके इव ते हरिभक्तेः पुरतः सतां स्फुरतः॥[6]**

**तस्माद्धरिभक्तिसाधनं श्रवणकीर्त्तनादिकमेव कर्त्तव्यमिति महान्तो मन्यन्ते।'** इति। अत्र ब्रह्मलाभमुपेक्ष्य सर्वकारणभूतमाधवसेवनमेव समुचितमिति परिगण्यन्ते। अतो वेदान्तिना उच्यते–

**'वैराग्यं गगनप्रसूनमिव न प्रादुर्भवत्येव चेत्... श्लाघ्ये सम्प्रति मे मनो भगवति श्रीवल्लभे धावति॥'**[7]

रूपकस्यान्ते सर्वे श्रीकृष्णाराधनाय समुद्यताः अभवन्। यथा– **'मीमांसकः भगवतो भक्तवत्सलत्वमवगम्य भक्तिमेव साधयितुकामो निष्क्रान्तः।' 'वेदान्ती– तदहमधुना भगवदाराधनानुरक्त एव कालं परिकलयिष्यामि। श्रीकृष्णभक्तः– एवं तर्ह्यागच्छ गच्छावः श्रीमथुरायामाराधयावः श्रीभगवन्तम्**। एवमत्र श्रीकृष्णभक्ति-रूपमुख्यफलप्राप्तिरभवत्। परमाह्लादजननीतया परमपुरुषार्थरूपेण च श्रीकृष्णभक्तिरिति प्रतिष्ठिताऽभवत्।

प्रसिद्धेषु पुरुषार्थचतुष्टयेषु मोक्षः परमपुरुषार्थः इति सर्वविदितम्। प्राप्ते च मोक्षे जीवः सच्चिदानन्दरूपं ब्रह्म भवति। तस्मात् मोक्षः उत्कृष्टः सर्वाकाङ्क्षितश्चेति वेदान्तादिषु गण्यते। वैष्णवदर्शने तु मोक्षापेक्षया श्रीकृष्णभक्तिः उत्कृष्टेति प्रतिपादिता। रूपगोस्वामिविरचिते नाटकचन्द्रिकेति वैष्णवनाट्यशास्त्रेऽपि पुरुषेषु उत्तमः श्रीकृष्णः इति वर्णितम्। तस्मात् सर्वोत्तमनायकः खलु पुरुषोत्तमः श्रीकृष्णः एव। तत्रोच्यते– **'एषु कृष्णो गुणाधिकः। नायकानां गुणाः सर्वे यत्र सर्वविधाः स्मृताः?'**[8] स खलु सर्वविधो नायकलक्षणसम्पन्नः पुरुषः। तदुक्तम् भक्तिरसामृतसिन्धौ–

**'अयं नेता सुरम्याङ्गः सर्वसलक्षणान्वितः।**
**रुचिरस्तेजसा युक्तो बलीयान् वयसान्वितः॥'**[9]

श्रीकृष्णः चतुःषष्टिगुणसम्पन्नो दिव्यनायकः इत्यपि तत्र कथितम्। चैतन्यचरितामृते श्रीकृष्णस्य परब्रह्मत्वं पुरुषोत्तमत्वं श्रेष्ठत्वञ्च बहुधा प्रतिपादितम्। चैतन्यचरितामृतस्य आदिलीलायामुच्यते–

**यदद्वैतं ब्रह्मोपनिषदि तदप्यस्य तनुभा**
**य आत्मान्तर्यामी पुरुष इति सोऽस्यांशविभवः।**
**षडैश्वर्यैः पूर्णो य इह भगवान्स स्वयमयं**
**न चैतन्यात् कृष्णाज्जगति परतत्त्वं परमिह॥**[10]

नाट्यशास्त्रादिग्रन्थेषु– **'प्रख्यातवस्तुविषयं प्रख्यातोदात्तनायकञ्चैव। राजर्षि-वंशचरितं तथा च दिव्याश्रयोपेतम्॥'**[11] इति नायकस्य यानि वैशिष्ट्यानि प्रतिपादितानि तानि सर्वाण्यपि दिव्यनायके श्रीकृष्णे विद्यन्ते। श्रीकृष्णाश्रितकाव्यरसास्वादनेन कृष्णप्रेणा वा चरमप्रीतिः मधुरा रतिर्वा जायते। तदा भक्तहृदयेषु परमानन्दोऽनुभूयते। तस्यैव परमानन्दस्य

हेतुः भक्तिरित्यभिधीयते। सा च भक्तिः परमाह्लादजननी परमपुरुषार्थरूपा कृष्णभक्तिरेव।

भगवतः श्रीकृष्णस्य भक्ताः श्रीकृष्णसेवया विना सालोक्यादिमुक्तिपञ्चकं न गृह्णन्ति। निर्गुणब्रह्मानुभवात् अपि श्रीकृष्णचैतन्यसाक्षात्कारजनित आनन्दोऽधिक उत्कृष्टः। सालोक्यादिपञ्चविधायां मुक्तौ माया अपगता भवति चेदपि कृष्णसेवालाभार्थं कृष्णभक्तिरेव मूलं प्रयोजनम्। पञ्चविधमुक्तौ कृष्णभक्तिस्तु न अन्तर्भवति। मोक्षेच्छया कृष्णभक्तिः तिरोहिता भवति। मोक्षं लब्धवतः पुरुषस्य 'सोऽहं ब्रह्म' इत्येवं भावः तिष्ठति। अतस्तस्य हृदये कृष्णभक्तिस्तु नैव तिष्ठति। अतः मोक्षेच्छा अपि कैतवप्रधानेति चैतन्यचरितामृतकारस्य मतम्।

भगवत्कीर्त्तनस्मरणचरणपरिचरणार्चनादिरूपभक्त्या शुद्धचित्तस्य पुरुषस्य यदा तदन्तर्गतज्ञानेनाहं ब्रह्मस्वरूपमनुभविष्यामि इत्येतत् निश्चयात्मिका एकैकविषयिणी बुद्धिर्भवति तदा भगवति रतिः जायते। सा बुद्धिरेव व्यवसायात्मिका बुद्धिरिति अचिन्त्यभेदाभेद-वादिनामाशयः। वस्तुतः तु अचिन्त्यभेदाभेदवादे ज्ञानभक्त्योरभेदः कल्पितः। एवञ्च भगवत्कृतलीलापुरस्सरं भगवदनुसन्धानमेव भक्तिरिति। एतदेव गीताभूषणभाष्ये गद्यते यत् '**विचित्रलीलारसाश्रयतयानुसन्धिस्तु भक्तिः, तया क्रोडीकृतसालोक्यादित-द्वरिवस्यानन्दलाभः पुमर्थः, भक्तेः ज्ञानत्वं तु सच्चिदानन्दैकरसे भक्तियोगे तिष्ठति इति श्रुतेः सिद्धम्**'[12] इति। पुरुषोत्तमः श्रीकृष्णः एव ब्रह्म। तदुक्तं श्रीकृष्णभक्तिचन्द्रिकादृश्यकाव्ये–

**योऽयं पूर्णसुखात्मको यमनुभान्त्येते रवीन्द्वादयो**
**येनेयं धरणी धृता सुरवरा यस्मै बलिं तन्वते।**
**यस्मादेव चराचरं समभवद्यस्यैव लीलेदृशी**
**यस्मिन्नेव विलीयते च सकलं तद्ब्रह्म कृष्णाभिधम्॥**[13]

श्रीकृष्णे भक्तिरेव साक्षात् मोक्षप्राप्तिः। कृष्णचरणप्राप्तिः खलु ब्रह्मलाभः। परन्तु यः कृष्णं वेद न कृष्णो भवति। कृष्णः तु परं ब्रह्म तदुक्तमत्र मीमांसकेन कृष्णभक्तमुद्दिश्य– '**अयं किल महापुरुषः श्रीकृष्णाख्यं परं ब्रह्म निरूपयति। तद्भक्तिं च परमपुरुषार्थं वर्णयति।**' इति। भगवान् कृष्णः सेवकानां भक्तानां वा सकलसुखप्रदायकः।[14] श्रीकृष्णभक्त्या अमृतत्वं लभ्यते। कलियुगे भक्त्या एव श्रीकृष्णचरणप्राप्तिः शक्या, तद्विना अन्या कापि गतिरेव नास्ति। अत एव उच्यते चैतन्यचरितामृते–

**हरेर्नाम हरेर्नाम हरेर्नामैव केवलम्। कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा॥**[15]

बृहन्नारदीयपुराणेऽपि वचनमिदं प्राप्यते। भक्तिः खलु श्रवणं कीर्त्तनं स्मरणं पादसेवनमर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनं चेति नवलक्षणयुता। सेयं नवलक्षणाभक्तिः भगवति विष्णौ कर्त्तव्येति कथितं श्रीमद्भागवते–

**श्रवणं कीर्तनं विष्णोस्स्मरणं पादसेवनम्।**
**अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्।।**
**इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा।**
**क्रियते भगवद्भक्त्या तन्मन्येऽधीतमुत्तमम्।।**[16]

भगवन्तं श्रीकृष्णं संश्रयतो भक्तजनान् परितः सुखार्णवाः सततं स्फुरन्ति। भक्त्या ते आनन्दसिन्धुं प्राप्नुवन्ति। अत्रापि नाट्यान्ते श्रीकृष्णाराधनानुरक्तेन वेदान्तिना तदुच्यते।[17] प्रकृते तु शैवाः शिवमुपासते, वैष्णवाः विष्णुं भजन्ते, शाब्दिकाः स्फोटब्रह्म परं मन्यन्ते, तार्किकाः परमात्मानं श्रेष्ठं मन्वते, मीमांसकाः कर्म वरेण्यं मन्यन्ते, वेदान्तिनः ब्रह्म कीर्त्तयन्ति कृष्णभक्ताश्च हरिं स्तुवन्ति। प्रत्येकमपि अनुगामी स्वेष्टं पुरुषं परं मनुते। अत्रापि श्रीकृष्णभक्तिचन्द्रिकाग्रन्थे तथैव सर्वैः स्वेष्टदेवाः श्रेष्ठत्वेन अभिवन्दिताः। रूपकस्यान्तिमे तु कृष्णभक्तमतं स्वीकृत्य कृष्णभक्तेरुत्कर्षत्वं तथा भगवच्छ्रीकृष्णस्य श्रेष्ठत्वं सर्वैरपि पात्रैः अङ्गीकृतम्। समस्तसंसारसारपरमेश्वरः तु एक एव। विभिन्नैः ऋषिभिः सः विविधैः रूपैः प्रकाशितः वन्दितश्च। तस्मात् कस्याः अपि एकस्याः मूर्त्याः अनुरागातिशयेन भजनेन परमानन्दो लभ्येत। तदुक्तमत्र महावैष्णवेन–

**कस्यामपि चैकस्यां मूर्त्तावनुरागमुत्कटं कृत्वा।**
**एकं खलु जगदीशं सादरमनिशं निषेवध्वम्।।**[18]

तासां विविधमूर्त्तीनां श्रेष्ठत्वप्रतिपादनाय शास्त्रार्थकोलाहलो नैव करणीयः। भगवान् श्रीकृष्णः एव सेव्यः। सर्वलोकसमाश्रयत्वात् पुरुषोत्तमत्वात् पूर्णसुखात्मकत्वाच्च धरणीधर-श्रीपतेः त्रिकालभजनजनितः आनन्दो लभ्यतामिति आशयः श्रीकृष्णभक्तस्य।[19] प्रस्तुते ग्रन्थे अयमेव भावो विकसितः। स्मरणीयञ्चात्र श्रुतिवाक्यम्– '**एकं सद्विप्रा बहुधा वदन्त्यग्निं...**' इत्यादि। विषये अस्मिन् साधु उपदिशति हनुमन्नाटकम्–

यं शैवाः समुपासते शिव इति...वाञ्छितफलं त्रैलोक्यनाथो हरिः।।[20]

अद्वैतमतप्रणेतृभिः शङ्कराचार्यैरपि स्वरचितचर्पटपञ्जरीस्तोत्रे यथार्थमुक्तम्– **भज गोविन्दं भज गोविन्दमिति।**

**उपसंहारः**

श्रीकृष्णभक्तिचन्द्रिकाख्यं रूपकमिदं शास्त्रकाव्यम्। अत्र दृश्यकाव्यमाध्यमेन दर्शनशास्त्रस्याध्ययनं भवति। प्रबोधचन्द्रोदयादिवत् इदमपि रूपकात्मकं नाट्यम्। शैवतार्किकमीमांसकवेदान्तिवैष्णवादिसम्प्रदायानां सिद्धान्ताः अत्र युक्त्या प्रतिपादिताः। तेषु सिद्धान्तेषु वैष्णवसिद्धान्तः श्रीकृष्णभक्तसिद्धान्तो वा प्रधानत्वेन प्रतिष्ठापितः। श्रीकृष्णभक्त-सिद्धान्तप्रतिष्ठापनमेव ग्रन्थकारस्य कृष्णभक्तस्यानन्तदेवस्याभिप्रायः। काव्यमार्गेण कृष्णभक्ति-प्रचारोऽपि कवेराशयः। भगवतः श्रीकृष्णस्य श्रेष्ठत्वप्रतिपादनेन कृष्णभक्तिमाहात्म्यकथनमस्य मुख्यमुद्देश्यम्। वस्तुतः भक्तिरेव मुक्तिः इति भावोऽत्र अभिव्यञ्जितः।

*

## सन्दर्भाः


1. रसो वै सः। रसं ह्येवायं लब्ध्वाऽऽनन्दीभवति। तैत्तिरीयोपनिषत् 2.7.1
2. चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि। काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते।।
   साहित्यदर्पणः 1.2
   धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च। करोति प्रीतिं कीर्तिं च साधुकाव्यनिबन्धनम्।।
   भामहः, काव्यालङ्कारः
3. विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः। स्वाद्यत्वं हृदि भक्तानामानीतं श्रवणादिभिः।। एषा कृष्णरतिः स्थायी भावो भक्तिरसो भवेत्। भक्तिरसामृतसिन्धुः 2.1.5
4. श्रीकृष्णभक्तिचन्द्रिका, 48
5. श्रीकृष्णभक्तिचन्द्रिका, 63
6. श्रीकृष्णभक्तिचन्द्रिका, 96
7. श्रीकृष्णभक्तिचन्द्रिका, 175
8. नाटकचन्द्रिका 8
9. भक्तिरसामृतसिन्धुः, दक्षिणः 1.23
10. चैतन्यचरितामृतम्, आदिलीला 1.3
11. नाट्यशास्त्रम् 20.10

12. श्रीमद्भगवद्गीता, गीताभूषणभाष्येण सारार्थवर्षिण्या च समलङ्कृता, पृ.5
13. श्रीकृष्णभक्तिचन्द्रिका, 97
14. सकलसुखसमीहापूरकः सेवकानां यदुपतिरयमेकः सेव्यतां किं ततोऽन्यैः।।
श्रीकृष्णभक्तिचन्द्रिका, 26
15. चैतन्यचरितामृतम् 1.7.3
16. श्रीमद्भागवतम् 7.5.23-24
17. अध्यात्मप्रतिपादनं प्रतिदिनं शिष्येषु सम्पादितं/तत्तु क्ष्मातलवर्त्तिवाग्मिविहितस्वर्वर्त्तिवार्त्तोपमम्।
युष्मत्सङ्गमस्तदेतदध्रुवा ज्ञातं कथञ्चिद्रमा,
नाथं संश्रयतः स्फुरन्ति परितः पुंसः सुखस्यार्णवाः।। श्रीकृष्णभक्तिचन्द्रिका 176
18. श्रीकृष्णभक्तिचन्द्रिका, 68
19. युष्माभिः परिशील्यतां प्रतिदिनं शास्त्रार्थकोलाहल-
स्तत्रैवानिशवर्द्धमानशुभताध्यासानुवृत्तेर्वशात्।
प्रागङ्गीकृत एव सोऽयमधुना नास्माभिराद्रीयते
श्रीगोपालपतेस्त्रिकालभजनानन्दानुबन्धादिह।। श्रीकृष्णभक्तिचन्द्रिका, 102
20. हनुमन्नाटकम् 1.3

*

# श्रीमद्भगवद्गीतायाः दार्शनिकमीमांसा

**डॉ. प्रीति वर्मा**

श्रीमद्भगवद्गीता संस्कृतसाहित्यगगनस्य अतीव देदीप्यमानं तारकं वर्तते। एषा महर्षिवेदव्यासेन प्रणीते महाभारते प्रसङ्गैकरूपेण स्थिता। महाभारतस्य कौरव–पाण्डवयुद्धस्य आरम्भे, कुरुक्षेत्रे सम्मुखे एव युद्धार्थम् उपस्थितान् बन्धुबान्धवान् अवलोक्य अर्जुनः मोहोपपन्नः भूत्वा युद्धविमुखः अभवत्। तदा श्रीकृष्णः एतस्याः उपदेशेन तं प्रबोधयामास। अस्यां सप्तशतश्लोकाः सन्ति, ते च अष्टादशाध्यायेषु संगृहीताः। भगवद्गीतायाः महत्त्वम् अतुलनीयं विद्यते। अतः अस्याः अनुवादः विविधासु भारतीयभाषासु भारतीयेतरभाषासु च कृतो वर्तते। श्रीमद्भगवद्गीतायां सर्वासाम् उपनिषदां सारः प्राप्यते। अत एव उक्तम् –

**सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।**
**पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्॥**

भगवद्गीतायाः गुणगौरवं के विद्वांसः न जानन्ति? प्रस्थानत्रये स्थानापन्ना इयं गीता सर्वासाम् उपनिषदां सारं प्रस्तौति, अपि च श्रुतिसारमपि प्रतिपादयति। अत्र दर्शनसारः अपि सूक्ष्मतया उपलभ्यते। सांख्य–योगदर्शनयोः सिद्धान्तानां प्रतिपादनं तु अस्यां विशदतया वर्तते।

श्रीमद्भगवद्गीतायाः सर्वधर्मान् प्रति समन्वयात्मिका दृष्टिः एव तस्याः महत्त्वाधायकं कारणमस्ति। सुबोध–सरसायां भाषायाम् अनेकगूढविषयाणां प्रतिपादनं श्रीमद्भगवद्गीतायां कृतम्, येन साधारणसंस्कृतज्ञः अपि अस्याः शिक्षाम् अवगच्छति। अस्याः आदर्शभूता शिक्षा काल–देश–धर्म–निरपेक्षा सर्वमानवान् प्रति समानरूपेण आचरणीया।

श्रीमद्भगवद्गीतायाम् अध्यात्मतत्त्वस्य, दार्शनिकचिन्तनस्य, अपि च आचारस्य निरूपणम् अस्ति। अध्यात्मपक्षे तु ब्रह्मजीवप्रकृतिप्रभृतयः उपनिषदि वर्णिताः विषयाः निरूपिताः। श्रीमद्भगवद्गीता ब्रह्मणः सगुणनिर्गुणयोः रूपयोः बोधं कारयति। भगवतः अपरभावस्य परभावस्य च सत्ता अपि श्रीमद्भगवद्गीतायां प्रतिपादिता। सः अपरभावः

अस्ति येन ईश्वरः योगमायामाधृत्य जगति अभिव्यक्तः भवति। परम् ईश्वरो न जगन्मात्रमेव, अपितु सः तत् अतिक्रम्य अपि विराजते। वेदे अपि मन्त्रः वर्तते–

**सहस्रशीर्षाः पुरुषः सहस्राक्षः सहस्रपात्।**
**स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम्।।**[1]

इदमेव तस्य परमार्थरूपम्। एतदेव परभावः इति उच्यते। तत् दूरस्थमपि अन्तिकस्थमपि, अचरमपि चरमपि च अस्ति। तत् प्राणिभ्यः अपृथगपि, तदभ्यन्तरेऽपि अस्ति, तद् बहिरपि च अस्ति। तस्मात् एव भगवतः चराचरात्मकं जगत् इदम् उत्पद्यते तस्मिन्नेव च विलीयते। सूत्रे मणयः इव तस्मिन् सर्वमपि जगदिदं प्रोतम्। भगवान् स्वयं कथयति–

**मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय।**
**मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव।।**[2]

जगतः उत्पत्तिः प्रकृतिपुरुषाभ्यां भवति। तत् तत्त्वद्वयम् एकस्य अपरस्य सर्वव्यापकस्य अव्यक्तस्य ब्रह्मणः विभूतिमात्रम्। श्रीमद्भगवद्गीतानुसारेण परमेश्वरस्य प्रकृतिः द्विविधा, अपरा परा च। अपरा क्षरपुरुषः इति, परा च अक्षरपुरुषः इति उच्यते। अपरायाः नामान्तरं क्षेत्रम्, परायाः च नामान्तरं क्षेत्रज्ञमिति प्रसिद्धम्। परा उत्कृष्टा प्रकृतिरस्ति। तत्र जीवस्य अपि गणना भवति। सर्वेऽपि भौतिकाः पदार्थाः क्षरपुरुषः (अपरा प्रकृतिः वा) इत्येतेन नाम्ना उदाह्रियन्ते। श्रीमद्भगवद्गीता स्पष्टं वदति–

**द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।**
**क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते।।**[3]

श्रीमद्भगवद्गीतायां सांख्यस्य सिद्धान्तो लक्ष्यते, परम् इच्छा–द्वेष–सुख–दुःख–संघाताः, चेतनाः, धृतिश्च क्षेत्रस्य विकाराः सन्ति, न तु क्षेत्रज्ञस्य (आत्मनः)। श्रीमद्भगवद्गीता–मते एषां सम्बन्धः शरीरेण (क्षेत्रेण वा) सह अस्ति न तु आत्मना (क्षेत्रज्ञेन वा) सह। आत्मा नित्यः विद्यते। न क्षेत्रज्ञः जायते न च म्रियते। श्रीमद्भगवद्गीता वदति–

**न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः।**
**अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे।।**[4]

अयं जीवः न छिद्यते न च भिद्यते। श्रीमद्भगवद्गीतायाम् एवमुक्तम् –

**नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।**
**न चैनं क्लेदयन्त्यापो न शोषयति मारुतः।।**[5]

अयं दिव्यः आनन्दस्वरूपो जीवः आत्मानं कर्तारं, भोक्तारं, कर्मफलधारिणं च मत्वा, पुनः पुनः शरीरं धारयति, रागद्वेषसुखदुःखादिभिः च कष्टमनुभवति। एतेषां दुःखानां निवृत्तिः तदैव भवति यदा जीवः आत्मानं परमात्मनः अंशरूपेण अभिजानाति। एषः जीवः परमात्मनः अंशः अस्ति। उक्तं स्वयं भगवता श्रीकृष्णेन–

**ममैवांशो जीवलोके जीवभूतः सनातनः।**[6]

शरीरं नश्वरं भवति आत्मा तु नित्यः विद्यते। शरीरमेव सत्यम्, एवं मत्वा कदापि मोहः न करणीयः, यतोहि एकं शरीरं विहाय अन्यं धारयति आत्मा। एषा परम्परा कर्मफलभोगपर्यन्तं प्रचलति। अत्र पुनर्जन्मस्य अवधारणा अपि प्रतिपादिता–

**वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।**
**तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही।।**[7]

यदा मनुष्यः स्व–वास्तविकस्वरूपं सम्यक् रूपेण जानाति, तदा सम्यग्–आचारं आचरितुं शक्नोति। भगवद्गीतायां भगवान् श्रीकृष्णः विविधशैल्या रीत्या च आचारं शिक्षयति। मानवस्य परमं कर्तव्यमस्ति स्वकर्तव्यपालनम्। जीवनस्य साफल्यं कर्तव्यपालनेनैव अस्ति–

**स्वे स्वे कर्मण्यभिरतः, संसिद्धिं लभते नरः।।**[8]

आत्मज्ञानार्थं लोके ज्ञान–कर्म–भक्तिप्रभृतयः मार्गाः उपदिश्यन्ते। श्रीमद्भगवद्गीता तु तेषां समन्वयं दर्शयति। भगवान् वासुदेवः कथयति, मनुष्येण कर्म अवश्यमेव कर्तव्यम् यतो हि सर्वः प्रकृतिजैः गुणैः कार्यं करोति –

**न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।**
**कार्यते ह्यवशः कर्म सर्वो हि प्रकृतिजैर्गुणैः।।**[9]

अपि च विना कर्मणा तु शरीरयात्रापि न प्रचलितुं सम्भवति। अतः गीता निरन्तरं कर्मणि प्रेरयति–

**नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।**
**शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः।।**[10]

कर्मयोगस्य गूढोपदेशः अत्यन्तं सारगर्भितरीत्या प्रदत्तः। यदि कर्म कृत्वा अपि फलं न प्राप्यते तथापि कर्म न त्याज्यम्। यतः –

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।**
**मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि।।**[11]

कर्मणि सिद्धिः असिद्धिः वा, लाभः अलाभः वा भवेत्, समौ कृत्वा कर्मसु प्रवर्तितव्यम्। द्वन्द्वातीतः जनः कर्म कृत्वापि कर्मफलैः नैव निबध्यते। कर्मफलेन अप्रभावितः भूत्वा एव कर्मसु कुशलता आयाति, सः एव खलु 'योगः' इति उच्यते–

**बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।**
**तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्॥**[12]

एवं योगयुक्तः मनुष्यः यदा स्वस्मिन् स्वात्मना एव सन्तोषमनुभवति तदा सः स्थितप्रज्ञः इत्युच्यते–

**प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान्।**
**आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते॥**[13]

कर्मफलत्यागः तु ज्ञानात् – अभ्यासात् – ध्यानादिभ्यः अपि अधिकतरः शान्तिहेतुः च अस्ति। सहजं कर्म निन्दितमपि न त्याज्यम्, यतः–

**श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।**
**स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥**[14]

सर्वाणि कर्माणि कृत्वा तेषां फलं भगवते समर्पणीयम्। एतानि निष्कामकर्माणि गीतोक्तसाधनमार्गस्य प्रारम्भाः सन्ति। तस्य अन्तश्च शरणागतिः एव। हृदयस्थमन्तर्यामिनं स्वामिनं शरणं गत्वा सर्वेषामपि धर्माणां परित्यागः एव गीतायाः ज्ञानम्। उक्तं श्रीमद्भगवद्गीतायाम् –

**सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज।**
**अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥**[15]

एवं निरुद्धेन मनसा कर्मफलं त्यक्त्वा स्वधर्मः पालनीयः, आत्मसमर्पणं च भगवते कर्तव्यम् – इदमेव अस्ति गीतारहस्यम्। भगवद्गीता स्वकाले प्रचलितानां सांख्य–योग–वैशेषिक–पञ्चरात्रादीनां मतानाम् उपयोगितत्त्वम् अगृह्णात्। पौराणिकमतस्य अवतारवादं स्वीकुर्वती गीता कथयति–

**यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।**
**अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥**[16]

मानवजीवनस्य उत्थानाय न केवलम् आध्यात्मिकम् अपितु व्यावहारिकपक्षमपि गीतायां स्वीकृतम्। एतस्यां त्यागभक्तिकर्मज्ञानादीनां विशदं विवेचनं कृतम्। कर्मणा इन्द्रियार्थं

त्यक्त्वा मनसा यदि तेषां विषयाणां स्मरणं क्रियते, तदा सः त्यागः मिथ्याचारः उच्यते। विषयासक्तिः दुष्परिणामिनी भवति, अस्याः परम्परा ध्यानात् प्रारभ्य विनाशप्रभृति भवति। एतस्याः मनोवैज्ञानिकरीत्या क्रमशः प्रतिपादनं विद्यते भगवद्गीतायाम्–

**ध्यायतो विषयान् पुंसः, सङ्गस्तेषूपजायते।**

**सङ्गात्सञ्जायते कामः, कामात्क्रोधोऽभिजायते॥**

**क्रोधाद्भवति सम्मोहः, सम्मोहात्स्मृतिविभ्रमः।**

**स्मृतिभ्रंशाद् बुद्धिनाशो, बुद्धिनाशात्प्रणश्यति॥**[17]

इन्द्रियाणां संयमः सर्वेषु कार्यक्षेत्रेषु व्यावहारिके जीवने अपि साफल्यस्य आवश्यकं साधनम् इति न केनापि व्यपदेष्टुं पार्यते–

**तस्माद्यस्य महाबाहो, निगृहीतानि सर्वशः।**

**इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥**[18]

मनुष्यः अन्ततोगत्वा शान्तिमेव वाञ्छति। शान्तेः सोपानानि द्वादशाध्याये प्रतिपादितानि–

**श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते।**

**ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम्॥**[19]

गीतायां दैवीसम्पदः आसुरीसम्पदश्च वर्णनं विहितम्, येन मानवजीवनस्य आचारशास्त्रं कर्तव्यम् अकर्तव्यं च विवेचितम्–

**देवी संपद्विमोक्षाय, निबन्धायासुरी मता।**[20]

एवं श्रीमद्भगवद्गीतायां सर्वोपनिषदां, सर्वसम्प्रदायानां, सर्वदर्शनानां च सारः संगृहीतः। अतः उक्तम् –

'**सर्वोपनिषदो गावः...।**' गीताध्ययनेन सर्वाणि शास्त्राणि ज्ञायन्ते। अतः गीतामुद्दिश्य इदमुचितं प्रसिद्धम् –

**गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।**

**या स्वयं पद्मनाभस्य मुखपद्माद् विनिःसृता॥**

श्रीमद्भगवद्गीतायाः प्रतिपादितविषयेषु केषाञ्चित् विषयाणां संक्षेपेण उपस्थापनम् अस्मिन् शोधपत्रे कृतं, येन अस्याः उपदेशस्य वैशिष्ट्यं स्पष्टं जातम्। गीतायाः उपदेशम् उपेक्षमाणाः एव भारतीयाः कर्मविरताः फलासक्तित्वात् आत्महत्यादिभिः मनोरोगैः ग्रस्ताः परिक्लिष्टाश्च वर्तन्ते। यदि लौकिकजीवने एका भगवद्गीता एव मनुष्यैः अधीयते, चिन्त्यते,

व्यवह्रियते च तर्हि इदं मानवजीवनं सर्वप्रकारेण सुख–शान्ति–समन्वितं निश्चयेन भविष्यति। उपसंहारत्वेन वक्तुं शक्यते– अस्मिन् युगे गीतायाः उपदेशेन एव मानवजातेः उद्धारः सम्भवः।

*

## सन्दर्भाः


1. ऋग्वेदः, 10.90.1
2. भगवद्गीता, 7.7
3 भ.गी., 15.16
4. भ.गी., 2.20
5. भ.गी., 2.23
6. भ.गी., 15.7
7. भ.गी., 2.22
8. भ.गी., 18.45
9. भ.गी., 3.5
10. भ.गी., 3.8
11. भ.गी., 2.47
12. भ.गी., 2.50
13. भ.गी., 2.22
14. भ.गी., 3.35
15. भ.गी., 18.66
16. भ.गी., 4.7
17. भ.गी., 2.62-63
18. भ.गी., 2.68
19. भ.गी., 12.12
20. भ.गी., 16.5


*

# पुरुषोत्तमदेवविरचितायाः भाषावृत्तेः टीकासम्पदः

**शङ्खशुभ्र–गच्छितः**

**शोधसारः**

पुरुषोत्तमदेवेन अष्टाध्याय्याः सूत्रार्थबोधनाय एको वृत्तिग्रन्थो व्यलेखि। अस्मिन् ग्रन्थे केवलं लौकिकसूत्राणि एव पर्यालोचितानि सन्ति। अतः वृत्तिरियं भाषावृत्तिः इति नाम्ना प्रसिद्धिं गता। बङ्गप्रदेशे अस्याः वृत्तेः महान् प्रभावः प्रचारश्चासीत्। बङ्गीयपाठशालासु बालानां व्याकरणज्ञानाय मुख्यग्रन्थरूपेण भाषावृत्तिग्रन्थस्यैव अध्ययनम् अध्यापनं भवति स्म। अस्याः वृत्तेः प्राधान्यं परिलक्ष्य बहवः वैयाकरणाः भाषावृत्तेः व्याख्याग्रन्थप्रणयने यत्नम् अकार्षुः। एवमेव भाषावृत्तेः व्याख्याचतुष्टयम् उपलभ्यते इति प्राचीनग्रन्थालोडनेन विज्ञायते। तद्यथा उच्यते– भाषावृत्त्यर्थविवृतिः, फक्किकावृत्तिः, भाषावृत्तिपञ्जिका, तत्त्वार्थसन्दीपनी चेति (पुरुषोत्तमदेवकृत भाषावृत्ति का विवेचनात्मक एवं तुलनात्मक अध्ययन, पत्रम् - 13)। एतेषां व्याख्याग्रन्थानां रचयितारः के, एतेषां कियती उपलब्धिः, एतेषु व्याख्याग्रन्थेषु के ग्रन्थाः प्रकाशिताः, के च अप्रकाशिताः इत्येवं विविधविषयाः अद्यत्वे वैयाकरणैः प्रायः अज्ञाताः एव सन्तीति मदीयं चिन्तनम्। एते सर्वेऽपि विषयाः शाब्दिकानां पुरतः उपस्थापनीयाः इति धिया मम अयं प्रयासः। तस्मात् प्रकृतशोधप्रबन्धे पुरुषोत्तमदेवविरचितायाः भाषावृत्तेः व्याख्याग्रन्थान् आश्रित्य विचारः प्रस्तूयते।

**कूटशब्दाः -** भाषावृत्तिः, भाषावृत्त्यर्थविवृतिः, फक्किकावृत्तिः, भाषावृत्तिपञ्जिका, तत्त्वार्थसन्दीपनी।

**उपक्रमः**

इह खलु भारतीयवाङ्मये सत्स्वपि नैकेषु व्यवहारप्रवर्तकेषु प्रत्यक्षादिप्रमाणेषु वेद एव सर्वोत्कृष्टं प्रमाणमिति न परोक्षं विलक्षणधिषणानां विचक्षणानाम्। वेदार्थप्रतिपादकेषु व्याकरणज्योतिषनिरुक्तछन्दःशिक्षाकल्पेषु षट्सु वेदाङ्गेषु व्याकरणमेव प्राधान्यम् आधत्ते इति भगवता भाष्यकृता महाभाष्यपस्पशाह्निके स्पष्टं बभणे- ''**प्रधानं च षडङ्गेषु व्याकरणम्। 'प्रधाने च कृतो यत्नः फलवान् भवति**''[1] इति। '**तथैव लोके**

**विद्यानामेषा विद्या परायणम्**'[2] इति वाक्यपदीयकारिकया सर्वविद्यापेक्षया व्याकरणविद्याया एव श्रेष्ठत्वं जेगीयते। भगवन्तं महेश्वरं प्रसाद्य तदनुग्रहेण मन्त्ररूपाक्षरसमाम्नायं समवाप्य महता प्रणिधानेन '**अल्पाक्षरमसन्दिग्धम्**' इत्यादिसूत्रलक्षणानुसारं सूत्रमयीम् अष्टाध्यायीं निर्ममे पाणिनिराचार्यः। अस्याः अष्टाध्याय्याः सूत्रार्थबोधनाय बहवः वृत्तिग्रन्थाः समयान्तरे समुद्भूताः सन्ति। यथा– माथुरीवृत्तिः, केशववृत्तिः, भागवृत्तिः, काशिकावृत्तिश्चेति। एवमेव द्वादशशतकोद्भवेन बङ्गीयवैयाकरणेन पुरुषोत्तमदेवेन अष्टाध्याय्याः सूत्रार्थप्रतिपादनाय '**सूत्रस्यार्थविवरणं वृत्तिः**' इति लक्षणानुसारं भाषावृत्तिः इति ग्रन्थो व्यरचि। अस्याः भाषावृत्तेः व्याख्याचतुष्टयम् उपलभ्यते इति तत्त्वविदो वदन्ति।[3] तासु व्याख्यासु काश्चन व्याख्याः प्रकाशिताः काश्चन च अप्रकाशिताः सन्ति। तासां प्रकाशिताप्रकाशितानां व्याख्यानां विस्तृतं विवरणम् अग्रे प्रदीयते। इदानीं भाषावृत्तिग्रन्थस्य स्वरूपं कीदृशमस्ति इति ज्ञानाय भाषावृत्तेः सामान्यः परिचयः अधस्तात् उपन्यस्यते।

**भाषावृत्तेः परिचयः**

वङ्गीयवैयाकरणेन पुरुषोत्तमदेवेन अष्टाध्याय्याः सूत्रार्थप्रतिपादिका काचित् वृत्तिः व्यलेखि। सा च वृत्तिः अत्यन्तं सरला लघ्वी चावर्तत। इयं च वृत्तिः भाषावृत्तिः इत्याख्यया प्रख्यातिं गता। काशिकावृत्तिं भागवृत्तिञ्चाश्रित्य पुरुषोत्तमदेवेन इयं वृत्तिः प्रणीता इत्यपि उल्लेखः प्राचीनग्रन्थेभ्यः प्राप्यते। श्रूयते यत् राज्ञः लक्षणसेनस्य आज्ञया पुरुषोत्तमदेवेन इयं वृत्तिः विरचिता इति। अस्मिन् ग्रन्थे अष्टाध्यायीक्रमेणैव सूत्राणि आलोचितानि सन्ति। किन्तु भाषावृत्तौ केवलं लौकिकसूत्राणां विवरणं प्राप्यते, वैदिकसूत्राणाम् आलोचना अत्र न दृश्यते। क्वचित् वैदिकसूत्राणां ग्रहणे सत्यपि छान्दसम् इदं सूत्रम्, छान्दसम् इदं सूत्रद्वयम् इत्येवंप्रकारेण उल्लेखः प्राप्यते। एतेषां तथा व्याख्यानं ग्रन्थे न विहितम् इति ग्रन्थालोडनेन विज्ञायते।[4] प्राचीनकाले वङ्गप्रदेशे पुरुषोत्तमदेवेन विरचिता इयं वृत्तिः अष्टाध्यायीसूत्राणां सरलार्थबोधाय बालानां कृते अत्यन्तम् उपकाराय आसीत्। भाषावृत्तिरपि अष्टसु अध्यायेषु विभक्ता वर्तते। प्रत्येकम् अध्यायः पुनः चतुर्षु पादेषु विभक्तः अस्ति। तत्र प्रथमाध्यायस्य पादचतुष्टयं वर्तते– पठमापादः, कुटादिपादः, भूपादः, कारकपादः। द्वितीयाध्यायस्य पादचतुष्टयं विद्यते– समर्थपादः, अपरपादः, अनभिहितपादः, द्विगुपादः। तृतीयाध्याये चत्वारः पादाः सन्तिः, ते च– प्रत्ययपादः, कर्मणिपादः, बहुलपादः, धातुसम्बन्धपादः। चतुर्थाध्यायस्य चत्वारः पादाः भवन्ति– ङ्याप्पादः, रक्तपादः, युष्मत्पादः, ठक्पादः। पञ्चमाध्यायस्य पादचतुष्टयम् इत्थं वर्तते– क्रीतपादः, धान्यपादः, विभक्तिपादः, शतपादः। एकाच्पादः, बहुव्रीहिपादः, अलुक्पादः, अङ्गपादश्च इत्येते षष्ठाध्यायस्य

पादाः भवन्ति। सप्तमाध्याये युपादः, अङ्गपादः, देविकापादः, णौपादश्चेति पादचतुष्टयं विलसति। अन्तिमे अष्टमाध्याये सर्वपादः, सुसिद्धपादः, मतुप्पादः, रेफपादश्चैते पादाः विद्यन्ते।[5] तत्र अष्टमाध्यायस्य द्वितीयपादस्य नाम पुरुषोत्तमदेवेन सुसिद्धपादः इति स्थापितम्। वस्तुतः अयं पादः असिद्धपादरूपेण प्रसिद्धः वर्तते। किन्तु अनेन भिन्नतया अस्य पादस्य नामकरणं कृतम्। एतत् पुरुषोत्तमदेवस्य अद्वितीयं वैशिष्ट्यम् इति वक्तुं शक्यते। पण्डित–गिरीशचन्द्र–वेदान्ततीर्थमहोदयः 1912तमे शतके प्रथमम् अस्य ग्रन्थस्य सम्पादनं कृतवान्। अयं च ग्रन्थः तस्मिन्नेव समये कलिकाता–एशियाटिक सोसाइटि–संस्थातः प्रकाशितः। अयं च भाषावृत्तिग्रन्थः सृष्टिधराचार्यकृतभाषावृत्त्यर्थविवृतिसहितो वर्तते। किन्तु केवलं प्रथमाध्यायस्य प्रथमपादस्य कश्चन भागः एव अत्र प्राप्यते। ततः अग्रे विवरणं नास्ति। तत्र ग्रन्थारम्भः इत्थं वर्तते –

**भाषावृत्तिः**

**प्रथमोऽध्यायः, प्रथमः पादः**

**नमो बुद्धाय भाषायां यथात्रिमुनिलक्षणम्।**
**पुरुषोत्तमदेवेन लघ्वी वृत्तिर्विधीयते॥**[6] इति।

ततः परं श्रीशचन्द्रचक्रवर्ती इत्याख्येन महोदयेन 1918तमे शतके भाषावृत्तेः सम्पादनम् अकारि। स च ग्रन्थः राजशाहीप्रदेशस्य वरेन्द्र–रिसर्च–सोसाइटि इति संस्थातः प्रकाशितः। अयं च ग्रन्थः सम्पूर्णः प्राप्यते। अत्र प्रथमाध्यायतः आरभ्य अष्टमाध्यायं यावत् सूत्राणाम् अर्थविवरणं दृश्यते। तस्मिन् ग्रन्थे ग्रन्थारम्भः इत्थं दृश्यते–

‘‘**अथ महामहोपाध्यायश्रीपुरुषोत्तमदेवकृता भाषावृत्तिः -**

**नमो बुद्धाय भाषायां यथात्रिमुनिलक्षणम्।**
**पुरुषोत्तमदेवेन लघ्वी वृत्तिर्विधीयते॥1॥**

**अथ शब्दानुशासनम्। लौकिकानां प्रकृतिप्रत्ययविभागपरिकल्पनया...**’’[7] इति।

अस्य ग्रन्थस्य अन्तिमः भागः एवं वर्तते–

**काशिकाभागवृत्त्योश्चेत् सिद्धान्तं बोद्धुमस्ति धीः।**
**तदा विचिन्त्यतां भ्रातर्भाषावृत्तिरियं मम॥1॥**

**इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृतायां भाषावृत्तावष्टमाध्यायस्य चतुर्थः पादः॥ समाप्तश्च रेफपादोऽष्टमोऽध्यायश्च॥**

**इति महामहोपाध्यायश्रीपुरुषोत्तमदेवकृता भाषावृत्तिः समाप्ता॥''**[8] इति।

ततः परवर्त्तिनि काले द्वारिका–दास–शास्त्रिमहोदयः भाषावृत्तिग्रन्थं सम्पादितवान्। स च ग्रन्थः 1971तमे शतके वाराणसीप्रदेशस्य तारा–पब्लिकेशन्स् इति संस्थातः प्रकाशितः। इतः परं केनचित् अस्य ग्रन्थस्य सम्पादनं विहितं न वा इति न ज्ञायते। सम्प्रति भाषावृत्तिग्रन्थस्य व्याख्याग्रन्थाः के भवन्ति इति विषये आलोचना क्रियते। तत्रापि का व्याख्या प्रकाशिता का अप्रकाशिता इत्यपि चर्च्यते। तदर्थं भाषावृत्तेः टीकासम्पदः इत्ययं भागः आरभ्यते।

**भाषावृत्तेः टीकासम्पदः**

पुरुषोत्तमदेवविरचितायाः भाषावृत्तेः उपरि नैके विद्वांसः स्वस्ववैदुष्यमहिम्ना टीकाग्रन्थान् विरचयामासुः। तद्यथा– सृष्टिधराचार्यैः विरचिता भाषावृत्त्यर्थविवृतिः, सनातनतर्काचार्येण विरचिता फक्किकावृत्तिः, विश्वरूपाचार्यकृता भाषावृत्तिपञ्जिका, षष्ठीदास – मिश्राचार्य्येण विलिखिता तत्त्वार्थसन्दीपनी चेति।[9] किन्तु सम्प्रति भाषावृत्तेः एकापि टीका सम्पूर्णतया नोपलभ्यते। सृष्टिधराचार्येण कृता भाषावृत्त्यर्थविवृतेः प्रथमाध्यायस्य प्रथमपादस्य कश्चन भागः सम्प्रति उपलभ्यते। कलिकाता– एशियाटिक् –सोसाइटिसंस्थातः 1912तमे शतके अस्य ग्रन्थस्य प्रकाशनं जातम्। इमां व्याख्यां विहाय अन्याः व्याख्याः सम्पूर्णतया अप्रकाशिताः वर्तन्ते। एवम् अग्रे तासां प्रकाशिताप्रकाशितानां व्याख्यानां विषये विस्तरेण चर्च्यते।

**भाषावृत्त्यर्थविवृतिः**

पाणिनिविरचितायाः अष्टाध्याय्याः लघुवृत्तिर्वर्तते पुरुषोत्तमदेवविरचिता भाषावृत्तिरिति। तस्याः भाषावृत्तेः व्याख्या भवति सृष्टिधराचार्यैः विरचिता भाषावृत्त्यर्थविवृतिः इति। व्याख्यायां लिलेख–

**'नत्वा गुरून् विचार्य्य प्राचीनसंग्रहकृताच्च मतानि।**
**श्रीसृष्टिधराचार्य्यो लघुवृत्तेः गौरवं कुरुते॥'**[10] इति।

प्रत्येकं पादस्य अत्र व्याख्यानम् उपलभ्यते। अस्मिन् व्याख्याग्रन्थे काशिकाव्याख्यानस्य न्यासस्य महान् प्रभावः परिलक्ष्यते। तस्मात् एव ग्रन्थारम्भे सृष्टिधराचार्येण उच्यते–

**'न्यासग्रन्थार्थतात्पर्य्यपर्य्यालोचनशालिभिः।**
**शोध्योऽयं करुणावद्भिः कृतिभिर्मे परिश्रमः॥'**[11] इति।

अद्यत्वे सम्पूर्णा भाषावृत्त्यर्थविवृतिः नैव सम्प्राप्यते। 1912तमे शतके कलिकाता–

एशियाटिक्–सोसाइटि इति संस्थातः पण्डितगिरिशचन्द्रवेदान्ततीर्थेन सम्पादिता भाषावृत्त्यर्थविवृतिसहिता भाषावृत्तिः इत्येको ग्रन्थः प्रकाशितः।[12] तत्रापि भाषावृत्त्यर्थविवृतेः प्रथमाध्यायस्य प्रथमपादस्य एव निरूपणं वर्तते। तत ऊर्ध्वं न प्रकाशितम्। तत्रापि प्रथमाध्यायस्य प्रथमपादस्य प्रारम्भभागात् 'न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु' (पा.सू. 1.1.58) इति सूत्रं यावत् सम्पूर्णं व्याख्यानम् उपलभ्यते। ततः परं 'द्विर्वचनेऽचि' ( पा.सू. 1.1.59 ) इति सूत्रस्य सम्पूर्णं व्याख्यानं नैव प्राप्यते।[14] अस्य व्याख्याग्रन्थस्य प्रथमाध्यायस्य प्रथमपादं (द्विर्वचनेऽचि इति सूत्रं यावत्) विहाय इतरे पादाः अद्यावधि अप्रकाशिताः सन्तः मातृकागारेषु विद्यन्ते इति प्राप्ततथ्यपर्यालोचनेन वक्तुं शक्यते। अस्य व्याख्यात्मकग्रन्थस्य केवलम् अङ्कीयप्रतिकृतिः (पीडीएफ) एव सम्प्रति प्राप्यते। तत्रापि प्रकाशितग्रन्थस्य अत्यन्तं प्राचीनत्वात् बहुत्र पाठास्पष्टता दृश्यते। अतः पाठनिर्णये महान् क्लेशः अनुभूयते। किञ्च इमं ग्रन्थं विहाय भाषावृत्त्यर्थविवृतेः अन्यः कश्चन ग्रन्थः अद्यत्वे नैव प्राप्यते। 1906तमे वर्षे बाबु–प्रसन्न–कुमार भट्टाचार्यवर्यस्य पृष्ठपोषकत्वे पीताम्बर–तर्कालङ्कारमहोदयेन हरिशचन्द्र–गोस्वामिमहोदयेन च प्रप्रथमतया बङ्गप्रदेशस्य विविधप्रान्तेभ्यः मातृकाषट्कं संगृह्य भाषावृत्त्यर्थविवृतिसहिता भाषावृत्तिः इति ग्रन्थस्य सम्पादने प्रयासो व्यधायि। किन्तु बाबु–प्रसन्न–भट्टाचार्यमहोदयस्य मरणानन्तरं तस्मादित्युत्तरस्य (पा.सू. 1.1.67) इति सूत्रं यावत् एव व्याख्याग्रन्थस्य प्रकाशः जातः, अग्रे कार्यं न जातम्। ततः परं इमाः षट् मातृकाः स्वीकृत्य अस्य व्याख्याग्रन्थस्य सम्पादने कलिकाता–एसियाटिक्–सोसाइटि–संस्थया अपि यत्नः कृतः। किन्तु प्रथमाध्यायस्य प्रथमपादस्य कञ्चन भागं सम्पाद्य केनचित् अज्ञातकारणेन अग्रे एतत् कार्यं न सम्पन्नम्।[15] 1918तमे वर्षे श्रीशचन्द्रचक्रवर्तिमहोदयैः सम्पादिते भाषावृत्तिग्रन्थस्य भूमिकाभागे भाषावृत्त्यर्थविवृतिग्रन्थस्य आद्यन्तभागस्य निदर्शनं प्राप्यते। तत्र भूमिकाभागे ११तमे पत्रे आदिमभागः इत्थं सूचितः–

**'ॐ नमो गणेशाय।**

**अथ भाषावृत्त्यर्थविवृतिः।**

**सुरमथनं पुरमथनं मारमणमुमारमणम्।**

**फणधरतल्पं फणाधरतल्पं वन्दे वाणारिमसमवाणारिम्॥**

**नत्वा गुरून् विचार्य्य प्राचीनसंग्रहकृताच्च मतानि।**

**श्रीसृष्टिधराचार्य्यो लघुवृत्तेर्गौरवं कुरुते॥'**

स्वाभीष्टदेवतानतिरूपं मङ्गलं शिष्यशिक्षार्थमुपनिबध्नन् प्रयोजनार्थिनः प्रेक्षावतः प्ररोचयन्

ग्रन्थारम्भे वृत्तिकृत्पद्यमेकं समुदाजहार– नम इति।[16] इति। अस्य ग्रन्थस्य भूमिकाभागे १९तमे पत्रे भाषावृत्त्यर्थविवृतिग्रन्थस्य अन्तिमभागस्य निदर्शनं प्राप्यते– 'अ अ इति (8.4.68)। आद्यो विवृतो द्वितीयः संवृतः।

**भाषावृत्त्यर्थविवृतावष्टमाध्यायसङ्गतः।**

**चतुर्थो विवृतः पादः श्रीसृष्टिधरशर्मणा॥**

इति **श्रीसृष्टिधरचक्रवर्तिकृता भाषावृत्त्यर्थविवृतिः समाप्ता। श्रीरामः। श्रीः।**[17] एवं ग्रन्थस्यास्य आद्यन्तभागं दृष्ट्वा ज्ञायते यत् व्याख्येयं सम्पूर्णायाः भाषावृत्तेः उपरि एव विलिखिता आसीदिति। तत्र विश्वरूपनामकेन केनचित् विदुषा भाषावृत्तेः व्याख्याभूता विवरणपञ्चिका इति ग्रन्थः व्यलेखि। सृष्टिधरस्य भाषावृत्त्यर्थविवृतिग्रन्थे पञ्चिकायाः अष्टादशोल्लेखाः प्राप्यन्ते। अतः केचन वदन्ति विवरणपञ्चिकया सह अस्याः भाषावृत्त्यर्थविवृतेः साम्यं वर्तते इति। परन्तु दीनेशचन्द्रभट्टाचार्यस्य मते सा पञ्चिका विश्वरूपविरचिता न अपितु तद्भिन्ना काचित् इति। अनेन व्याख्याग्रन्थेन सह भाषावृत्त्यर्थ-विवृतेः साम्यं प्रायः नास्ति इति विश्वरूपविरचिता भाषावृत्तिविवरणपञ्जिका इति शोध-प्रबन्धस्य (The Bhashavrittivivaranapanjika of Visvarupa, The First Adhyaya and a detailed examination) दर्शनेन एव ज्ञायते। एवम्भूतस्य विशिष्टस्य भाषावृत्त्यर्थविवृतिग्रन्थस्य अध्ययनेन ग्रन्थस्य गभीरं तत्त्वं यथा प्रकटितं भवति तथैव तस्मिन् समये बङ्गीयानां विदुषां कियत् पाण्डित्यम् आसीत् इत्यपि ज्ञातुं शक्यते।

भाषावृत्तेः कियत्यः व्याख्याः आसन् इति विषये निश्चयः नास्ति। प्राप्तसामग्रीवशात् ज्ञायते यत् भाषावृत्तेः व्याख्याचतुष्टयम् आसीदिति। किन्तु सम्प्रति भाषावृत्त्यर्थविवृतिं विना अन्या कापि प्रकाशिता व्याख्या नैव दृग्गोचरीभवति। अतः भाषावृत्तेः गभीरज्ञानाय सर्वैः शाब्दिकैः भाषावृत्त्यर्थविवृतिः अवश्यम् अध्येतव्या। एवमेव भाषावृत्तेः अर्थप्रकाशने अष्टाध्याय्याश्च सूत्रार्थप्रतिपादने अयं ग्रन्थः वैयाकरणानां कृते अत्यन्तम् उपकारकः स्यात् इत्यत्र नास्ति सन्देहः। अस्मिन् ग्रन्थे अष्टाध्याय्याः सूत्रक्रमेण कानिचित् संज्ञासूत्राणि कानिचन विधिसूत्राणि, कतिचन परिभाषासूत्राणि, कानिचित् निषेधसूत्राणि, कतिचन च अतिदेशसूत्राणि स्वशैल्या व्याख्यातानि सन्ति। विविधसूत्राणाम् अर्थाः सरलरीत्या विस्तरेण च सह सृष्टिधराचार्येण अस्मिन् ग्रन्थे प्रतिपादिताः सन्ति इति ग्रन्थपरिशीलनेन विज्ञायते। भाषावृत्तेः स्वरूपं किम्, भाषावृत्तौ प्रतिपादिताः सूत्रार्थाः कथं भाषावृत्त्यर्थविवृतौ विशदीकृताः, भाषावृत्त्यर्थविवृतौ कीदृशी व्याख्यानशैली समाश्रिता, न्यासस्य काशिकायाः च कीदृशः प्रभावः अस्मिन् व्याख्याग्रन्थे दृश्यते, व्याख्याकर्तुः अत्र कीदृशम् अभिनवत्वं वर्तते,

उदाहरणानां संग्रहः केभ्यः ग्रन्थेभ्यः कृतः, अन्यैः वृत्तिग्रन्थैः अस्य गतार्थत्वम् अस्ति न वा चेत्यादयः विषयाः अद्यावधि अप्रकटिताः सन्ति। अतः अयं लघुप्रयासः विधीयते। सम्प्रति भाषावृत्त्यर्थविवृतेः मातृकाः केषु मातृकागारेषु संरक्षिताः सन्ति इत्यस्मिन् विषये उच्यते।

**भाषावृत्त्यर्थविवृतेः मातृकाः**

भाषावृत्त्यर्थविवृतेः अप्रकाशिताः मातृकाः बहुषु मातृकागारेषु संरक्षिताः सन्तीति NCC–सूचीं वीक्ष्य ज्ञातुं शक्यते। अतः NCC – सूच्यनुसारेण मातृकाणां सामान्यपरिचयः अत्र प्रदीयते[18]– बनारस–हिन्दू–विश्वविद्यालयः (बीएच्यू)–892. कोचविहारः–17, 23, 25, 28, 31. ढाकाविश्वविद्यालयः–1006, 1050, 1095, 1070, 4470, 4476. इण्डियान्– आफिस्–ग्रन्थागारः–605–05. गङ्गानाथ–झा– परिसरः–8959, 9005. सरस्वती–भवन–ग्रन्थालयः–38001, 38246, 38248, 38251–54, 38329, 38457–60, 39159–60, 39260, 40021, 40028. वाराणसी–1918–30. बङ्गीय–साहित्य–परिषत्– 1869. वरेन्द्र–संशोधन– केन्द्रम्–344, 348, 351, 357, 361, 368, 381, 390, 393, 395–96, 399, 404–05, 417, 423, 437, 548, 590, 592, 617, 619, 621–25, 841–43, 909–10, 1193, 1346, 1526, 1588, 1603, 1605, 1619–27. विश्वभारती–255, 257, 280, 553, 566.

एतेषु मातृकागारेषु स्थिताः मातृकाः संगृह्य आगामिनि काले अस्याः पूर्णतः प्रकाशनं भवतु इति शाब्दिकाः निवेद्यन्ते। सम्प्रति प्रकृते भाषावृत्त्यर्थविवृतिकर्तुः सृष्टिधराचार्यस्य सामान्यः परिचयः प्रस्तूयते।

**सृष्टिधराचार्यस्य परिचयः**

भाषावृत्त्यर्थविवृतेः कर्ता अस्ति सृष्टिधरः। तस्य च सृष्टिधरस्य सृष्टिधरचक्रवर्ती सृष्टिधराचार्यः, सृष्टिधरशर्मा चेति अपराभिधानानि सन्ति। भाषावृत्त्यर्थविवृतेः कासुचित् मातृकासु सृष्टिधरचक्रवर्ती इति नाम्नापि स्वात्मानं परिचाययति सृष्टिधरः। तद्यथा– '**इति श्रीसृष्टिधरचक्रवर्तिविरचिता भाषावृत्त्यर्थविवृतिः समाप्ता**'[19] इति। क्वचित् च सृष्टिधराचार्यः इत्यपि तस्य नाम सम्प्राप्यते। यथा–

**श्रीसृष्टिधराचार्य्यो लघुवृत्तेः गौरवं कुरुते।**[20] इति।

पुनः भाषावृत्त्यर्थविवृतेः प्रत्येकं पादस्य अन्ते सृष्टिधरशर्मा इत्यपि अभिधा समवाप्यते।

तद्यथा–

**भाषावृत्त्यर्थविवृतौ श्रीसृष्टिधरशर्म्मणा।**

**प्रथमो विवृतः पादः प्रथमाध्यायसङ्गतः॥**[21] इति।

सृष्टिधराचार्यः क्व जनिम् अलभत इति विषये निश्चप्रचं किमपि नोपलभ्यते। बङ्गप्रदेशस्य उत्तरप्रान्ते एव अस्याः व्याख्यायाः आधिक्येन प्रचारः प्रभावश्च आसीत् इत्यतः स बङ्गीयः इति तत्त्वविदः वदन्ति। अस्याः व्याख्यायाः नैकाः मातृकाः बङ्गप्रदेशेषु एव सम्प्राप्ताः इत्यतः सः बङ्गप्रदेशीयः इत्यपि वक्तुं शक्यते। किञ्च बङ्गीयानां ब्राह्मणानां चक्रवर्ती इत्युपाधिः भवति। सृष्टिधरस्यापि चक्रवर्ती इति उपाधिः आसीत् इत्यतः सः बङ्गीयः आसीत् इति कथयितुं शक्यते।[22] अस्य कालविषये तु विप्रतिपत्तयः सन्ति विद्वन्मण्डलेषु। श्रीशचन्द्रचक्रवर्तिमहोदयस्य मते सृष्टिधराचार्यस्य समयः प्रायः सप्तदशशतकमिति। सुशीलकुमारदेमहाभागः अपि इममेव समयं निर्दिष्टवान् अस्ति।[23] किन्तु दीनेशचन्द्रभट्टाचार्यस्य मते तु सृष्टिधराचार्यस्य कालः पञ्चदशशतकस्य अन्तिमभागः इति।[24] व्याख्याने अस्मिन् येषाम् उद्धरणं वर्तते तेषां समयम् आदायैव भट्टाचार्यमहोदयेन अयं कालः निर्धारितः। श्रीसृष्टिधराचार्येण तस्य भाषावृत्त्यर्थविवृतौ नैकेषां प्राचीनाचार्याणां नामानि कृतयः च उल्लिखिताः सन्ति। तेषु केचन श्रुताः केचन अश्रुताः सन्ति। तद्यथा– भट्टिकाव्यस्य व्याख्यानकारौ धृतिदास–उमापतिदासौ अनेन उदाहृतौ। वासवदत्तायाः उपरि व्याख्यानं रचितवतः तथागताचार्यस्य उद्धृतिरपि अस्मिन् व्याख्याने प्राप्यते। माघस्य कृतीनां व्याख्यानकर्ता वल्लभाचार्यः अपि अत्र स्मृतः।[25] तत्र सृष्टिधरेण प्राचीनानां नैकेषाम् अप्रसिद्धानाम् आचार्याणां नामानि तत्र तत्र उद्धृतानि, येषां नामानि कृतयश्च सम्प्रति नैव उपलभ्यन्ते। तत्र उदाहरणार्थं भाषावृत्त्यर्थविवृतौ उदाहृताः आचार्याः ग्रन्थाश्च उल्लिख्यन्ते[26] – मेदिनीकोषः, सरस्वतीकण्ठाभरणम्, मैत्रेयरक्षितः, केशववृत्तिः, उदात्तराघवः, धर्मकीर्तिः, उपाध्यायसर्वस्वम्, कैयटः, भाष्यटीका (भाष्यप्रदीपः), कविरहस्यम्, मुरारिः, कालिदासः, भारविः, भट्टिः, माघः, श्रीहर्षः (नैषधचरितम्), भास्करमिश्रः, वल्लभाचार्यः (माघकाव्यटीका), क्रमदीश्वरः, पद्मनाभः, मञ्जूषा इत्यादयः। सृष्टिधरशर्मा अमरकोशस्य सुभूतिव्याख्याविषये अपि आलोचयामास अस्मिन् ग्रन्थे। एवं विविधकाव्येभ्यः उदाहरणानि चित्वा स्वव्याख्याग्रन्थे निवेशितवान् सृष्टिधरचक्रवर्ती। एतेन विविधशास्त्रेषु तस्य कियत् वैदुष्यमासीत् इति तु अनायासेन वयं ज्ञातुं शक्नुमः। सृष्टिधराचार्यस्य भाषावृत्त्यर्थविवृतिं विहाय इतरकृतयः सन्ति न वा इत्यत्र तु तथा प्रमाणं नास्ति। प्राप्तसामग्रीवशात् सृष्टिधराचार्यस्य एका एव कृतिः भाषावृत्त्यर्थविवृतिः इति समवाप्यते।

**फक्किकावृत्तिः**

भाषावृत्तेः अपरा व्याख्या भवति सनातनतर्काचार्येण विरचिता फक्किकावृत्तिरिति। अत्रापि केचन क्लिष्टाः गभीराश्च विषयाः प्रतिपादिताः सन्ति। व्याख्यायाम् अस्यां शब्दानुशासनम् इति विषयम् अधिकृत्य प्रायः पत्रचतुष्टयस्य विस्तृतं व्याख्यानम् उपलभ्यते। अत्र नैकेषाम् आचार्याणां मतानि नामरहिततया उल्लिखितानि सन्ति। इमां फक्किकावृत्तिं परिशील्य वयम् ऊहितुं शक्नुमः यत् बङ्गप्रदेशे तदा भाषावृत्तेः कियान् प्रभावः आसीत् इति। अयं सनातनतर्काचार्यः प्रसिद्धस्य विदुषः वासुदेव–सार्वभौममहोदयस्य आत्मीयः आसीत् इति श्रूयते। अयं विद्वान् तन्त्रप्रदीपस्य प्रभाख्यां व्याख्यामपि अलिखत् इति प्राचीनग्रन्थात् ज्ञायते। अस्य च विदुषः कालः प्रायः पञ्चदशशतकमिति अनुमीयते।[27]

**भाषावृत्तिपञ्जिका**

विश्वरूपाचार्येण भाषावृत्तेः उपरि काचित् व्याख्या प्रणीता। तस्याश्च व्याख्यायाः नाम आसीत् भाषावृत्तिपञ्जिका इति। अस्याः व्याख्यायाः मातृकाः परिशील्य वक्तुं शक्यते यत् इयं भाषावृत्तेः उपरि प्रणीता सर्वप्राचीना व्याख्या इति। अस्याः प्रथमतः सम्पादनं शशिनाथ–झा–महोदयेन व्यधायि। आद्यम् अध्यायचतुष्टयम् आश्रित्य अनेन इदं सम्पादनकार्यं कृतम्। परन्तु अयं ग्रन्थः सम्प्रति नैव उपलभ्यते। ततः परम् अस्याः व्याख्यायाः प्रथमाध्यायमादाय मालगोरजाटा–विलिन्सका–सल्टवेडेल–महोदयः जर्मनदेशस्थात् हमवर्गविश्वविद्यालयात् विद्यावारिध्युपाधिम् अवाप्नोत् इति (The Bhashavrittivivarana-panjika of Visvarupa, The First Adhyaya and a detailed examination) इति शोधप्रबन्धात् विज्ञायते। नेपाल–जर्मन–मातृकासंरक्षणप्रकल्पात् कलिकाता–एशियाटिक्-सोसाइटि–मातृकालयात् च मातृकाद्वयं स्वीकृत्य एतेन अस्याः व्याख्यायाः सम्पादनम् अकारि। दरभङ्गाराजकीयग्रन्थालये (मातृकासंख्या–2014) अपि अस्याः व्याख्यायाः एका मातृका वर्तते इति NCC–सूच्यां निर्देशः प्राप्यते।[28] अस्याः विषये इतोऽपि अधिकं तथ्यं प्राचीनग्रन्थादिषु नैव उपलभ्यते।

**तत्त्वार्थसन्दीपनी**

षष्ठीदास–मिश्राचार्येण विलिखिता इयं व्याख्या तत्त्वार्थसन्दीपनी इति नाम्ना प्रख्याता आसीत्। NCC–सूच्याम् अपि भाषावृत्तेः व्याख्यात्वेन अस्याः व्याख्यायाः उल्लेखः नैव सम्प्राप्यते। बङ्गीयसाहित्यपरिषत्–संस्थायाः संग्रहे अस्याः व्याख्यायाः एकैव मातृका वर्तते।[29] तत्रापि केवलम् आदिमं प्रथमपत्त्रत्रयमेव उपलभ्यते। तत्रापि बहुत्र त्रुटयः सन्ति।

व्याख्येयम् एवम् आरभ्यते–

**नत्वा हैमवतीं गुरुं गणपतिं षष्ठीवराख्यः सुधीः**
**मिश्राचार्य्यपराभिदः प्रकुरुते तत्त्वार्थसन्दीपनीम्।**
**वृत्तिं न्यासमधेन्दुमित्ररचितं तन्त्रप्रदीपन्तथा**
**संसेव्यामलभाषितानथ गुरून् भाषादिवृत्तेर्मुदा।।** इति।

पुरुषोत्तमदेवमादाय किञ्चित् विशिष्टं मतं तस्य अत्र उपलभ्यते। देवः इति पदोपादानात् पुरुषोत्तमदेवः ब्राह्मणः आसीत् इति तस्य मतम्। तद्यथा– '**अथ देवशब्दोपादानादात्मनो ब्राह्मण्यमाह।**' इति व्याख्यायां पङ्क्तिः दृश्यते। भाषावृत्तौ आगतस्य बुद्धशब्दस्य निष्पत्तिविषये एतैः विशिष्टतया प्रत्यपादि– केचित्तु बुद्धिशब्दात् अर्श–आद्यचि बुद्धशब्दं साधयन्ति, तदसङ्गतम्... इत्येवम्। किन्तु षष्ठीदासाचार्यः तन्मतं निराकरोति। बङ्गनिवासी न्यायचूडामणिः प्रगल्भाचार्यः अस्य मित्रमासीत् इति श्रूयते। अस्यापि समयः प्रायः पञ्चदशशतकम् इति ऊह्यते।[३०]

**उपसंहारः**

अस्मिन् शोधप्रबन्धे अष्टाध्याय्याः सूत्रार्थप्रतिपादिकाः केचन वृत्तिग्रन्थाः उल्लिखिताः सन्ति। ततश्च भाषावृत्तिग्रन्थस्य सामान्यपरिचयः प्रदत्तः। भाषावृत्तिग्रन्थस्य सम्पादनं कैः कदा च कृतम् इत्यस्मिन् विषये अपि आलोचना विहिता। तत्रापि प्रकाशितग्रन्थात् भाषावृत्तिग्रन्थस्य आद्यन्तभागनिर्देशः कृतः। ततश्च भाषावृत्तिग्रन्थस्य व्याख्याचतुष्टयम् उक्तम्। तेषु व्याख्याग्रन्थेषु के प्रकाशिताः के च अप्रकाशिताः इत्यपि विचारः प्रस्तुतः। ततश्च भाषावृत्त्यर्थविवृतेः परिचयः प्रस्तुतः। तस्याः सम्पादनविषये अपि पर्यालोचनं कृतम्। अस्याश्च मातृकाः केषु मातृकागारेषु सुरक्षिताः सन्ति इत्यस्मिन् विषये अपि विवरणं प्रदत्तम्। ततश्च भाषावृत्त्यर्थविवृतेः कर्तुः सृष्टिधरस्य देशकालादिचर्चा कृता। तदनु फक्किकावृत्तेः, भाषावृत्तिपञ्जिकायाः, तत्त्वार्थसन्दीपन्याश्च प्राप्ततथ्यानुसारेण सामान्यपरिचयः प्रस्तुतः। एवमेव शोधलेखः अयं समाप्तिं गतः। अस्मात् शोधलेखात् भाषावृत्तिविषयकं विशिष्टं किञ्चित् ज्ञानं शाब्दिकानाम् अवश्यमेव भविष्यति इति मे आशा।

*

## सन्दर्भाः

1. व्याकरणमहाभाष्यम् (छायाव्याख्यासमेतम्), पस्पशाह्निकम्, पत्रम् – 23
2. वाक्यपदीयम् (ब्रह्मकाण्डम्), कारिकासंख्या– 15, पत्रम् – 25
3. भाषावृत्तिः (सम्पादकः– स्वामी द्वारिकादासशास्त्री), सम्पादकीयम्, पत्रम् – 9
4. अन्वीक्षा (संस्कृतशोधपत्रिका), जादवपुरविश्वविद्यालयस्य, पत्रम् – 12
5. भाषावृत्तिः (सम्पादकः– स्वामी द्वारिकादासशास्त्री), भूमिका, पत्रम् – 11–14
6. भाषावृत्तिः (भाषावृत्त्यर्थविवृतिसहिता), पत्रम् – 1
7. भाषावृत्तिः, पत्रम् – 1
8. भाषावृत्तिः, पत्रम् – 573
9. भाषावृत्ति का विवेचनात्मक एवं तुलनात्मक अध्ययन, पत्रम् – 13
10. भाषावृत्तिः (भाषावृत्त्यर्थविवृतिः), पत्रम् – 1
11. भाषावृत्तिः (भाषावृत्त्यर्थविवृतिसहिता), भूमिका, पत्रम् – 11
12. भाषावृत्तिः (भाषावृत्त्यर्थविवृतिसहिता), भूमिका।
13. भाषावृत्तिः (भाषावृत्त्यर्थविवृतिसहिता), पत्रम् – 95
14. भाषावृत्तिः (भाषावृत्त्यर्थविवृतिसहिता), पत्रम् – 96
15. भाषावृत्तिः, भूमिका, पत्रम् – 1
16. भाषावृत्तिः, भूमिका, पत्रम् – 11
17. भाषावृत्तिः, भूमिका, पत्रम् – 19
18. https://vmlt.in/ncc/17?page=38
19. भाषावृत्तिः, भूमिका, पत्रम् – 9
20. भाषावृत्तिः (भाषावृत्त्यर्थविवृतिसहिता), पत्रम् – 1
21. भाषावृत्तिः, भूमिका, पत्रम् – 9
22. संस्कृत–व्याकरणशास्त्र का इतिहास, युधिष्ठिर मीमांसकः, पत्रम् – 175
23. The Bhasavrttivivaranapañjika of Visvarupa. The First Adhyaya and a detailed examination. pp. 167
24. Paninian Studies in Bengal. Dineshchandra Bhattacharyya. pp. 204

25. A Fundamental Discussion About the Commentaries on Bhasavrtti. pp. 401
26. भाषावृत्तिः, भूमिका, पत्रम् – 10
27. The Bhasavrttivivaranapañjika of Visvarupa. The First Adhyaya and a detailed examination. pp. 59.
28. https://vmlt.in/nce/17?page=38
29. See the Manuscript no – 2108 of Vangiya Sahitya Parishad, Calcutta. as referred to in the introduction of D.C. Bhattacharya's परिभाषावृत्तिः, ज्ञापक-समुच्चयः, कारकचक्रम्'
30. Sahitya Parishat Patrika, 1347 B.E. p. 73.

*

आरण्यकम् (XXXII.2) सितम्बर 2024
अर्धवार्षिकी सन्दर्भिता संस्कृतशोधपत्रिका ( UGC Carelisted )

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्) - स्व. पण्डित कमलाकान्त उपाध्यायः
15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः)
-श्री देवकुमार मिश्रः 'अलमस्त'
15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा -श्री नर्मदेश्वर ओझा
15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा
51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा
51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः'
41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
- श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः
60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः
204 रूप्यकाणि
18. सोमश्रद्धार्णव - डॉ. गोपबन्धु मिश्रः
1000 रूप्यकाणि